# ॥ श्रीगच्छाचार प्रकीर्णकम् ॥



|| श्रीशङ्खेश्वरपार्श्वनाथाय नमः ||
|| तपागच्छाचार्य-श्रीप्रेम-भुवनभानु-जयघोष-जितेन्द्र-गुणरत्न-रश्मिरत्नसूरिसद्गुरुभ्यो नमः ||
|| तस्स भुवणेक्कगुरुणो नमो अणेगंतवायस्स ||
|| ऐँ नमः ||

अवचूरिद्वयसमन्वितम्
श्रीवानर्षिगणिविहितवृत्तिसमलङ्कृतञ्च
श्रीपूर्वाचार्यप्रणीतम्

# || श्रीगच्छाचारप्रकीर्णकम् ||

❖ આચારશુદ્ધિ ❖ વિચારશુદ્ધિ ❖ આત્મશુદ્ધિ
શુદ્ધિત્રયસંપાદિકા સુરમ્ય કૃતિ

❖ પ્રેરક-માર્ગદર્શક ❖

દીક્ષાદાનેશ્વરી, પ. પૂ. આ. ભ. શ્રી વિ. **ગુણરત્નસૂરીશ્વરજી** મહારાજા
પ. પૂ. આ. ભ. શ્રી વિ. **રશ્મિરત્નસૂરીશ્વરજી** મહારાજા

❖ પ્રકાશક ❖

જિનગુણ આરાધક ટ્રસ્ટ

# પરિચય પરિમલ

| | | |
|---|---|---|
| ✱ **કૃતિ** | : | શ્રીગચ્છાચારપ્રકીર્ણક **ભાષા-શૈલી :** પ્રાકૃત-પદ્ય |
| ✱ **રચયિતા** | : | પૂર્વાચાર્ય **ગાથા પ્રમાણ :** ૧૩૭ |
| ✱ **વિષય** | : | ગચ્છના આચારોનું પ્રતિપાદન |
| ✱ **વૃત્તિ** | : | પૂજ્યવાનર્ષિગણિવિરચિતા (સંક્ષિપ્ત અને રોચકશૈલીમાં પદાર્થોનું સુંદર આલેખન...) |
| ✱ **અવચૂરિદ્વય** | : | ગ્રંથનું સંક્ષેપમાં સુંદર અર્થઘટન... |
| ✱ **સંપાદન** | : | અનેક હસ્તપ્રતોના આધારે શુદ્ધીકરણ સાથે વિશુદ્ધ સંપાદન... |
| ✱ **દિવ્યાશીર્વાદ** | : | કર્મસાહિત્યનિષ્ણાત પ. પૂ. આ. ભ. શ્રી વિ. **પ્રેમસૂરીશ્વરજી** મહારાજા.<br>ન્યાયવિશારદ પ. પૂ. આ. ભ. શ્રી વિ. **ભુવનભાનુસૂરીશ્વરજી** મહારાજા.<br>મેવાડદેશોદ્ધારક પ. પૂ. આ. ભ. શ્રી વિ. **જિતેન્દ્રસૂરીશ્વરજી** મહારાજા. |
| ✱ **શુભાશીર્વાદ** | : | સિદ્ધાંતદિવાકર, સુવિશાલગચ્છાધિપતિ પ. પૂ. આ. ભ. શ્રી વિ. **જયઘોષસૂરીશ્વરજી** મહારાજા. |
| ✱ **પ્રેરક-માર્ગદર્શક** | : | દીક્ષાદાનેશ્વરી પ. પૂ. આ. ભ. શ્રી વિ. **ગુણરત્નસૂરીશ્વરજી** મહારાજા તથા<br>પ્રવચનપ્રભાવક પ. પૂ. આ. ભ. શ્રી વિ. **રશ્મિરત્નસૂરીશ્વરજી** મહારાજા. |
| ✱ **સહાયક** | : | વિદ્વદ્વર્ય પ. પૂ. મુ. શ્રી **સૌમ્યાંગરત્ન**વિજયજી મ. સા.,<br>પ. પૂ. મુ. શ્રી **તીર્થરત્ન**વિજયજી મ. સા. |
| ✱ **સંપાદક** | : | મુનિશ્રી યશરત્નવિજયજી મ. સા. |
| ✱ **પ્રકાશક** | : | જિનગુણ આરાધક ટ્રસ્ટ |
| ✱ **પ્રકાશનવર્ષ** | : | વિ. સં. ૨૦૭૧, વીર સં. ૨૫૪૧, ઈ. સ. ૨૦૧૫ |
| ✱ **આવૃત્તિ** | : | પ્રથમ **મૂલ્ય :** ૨૫૦ |
| ✱ **પ્રીન્ટીંગ-કમ્પોઝીંગ-ડીઝાઈનીંગ** | : | **નવરંગ પ્રીન્ટર્સ** - અપૂર્વભાઈ, મો. ૯૪૨૮૫૦૦૪૦૧ |
| ✱ **સૂચના** | : | આ ગ્રંથનું પ્રકાશન જ્ઞાનનિધિના સદ્વ્યયથી થયું હોવાથી ગૃહસ્થોએ માલિકી કરવી નહીં. જ્ઞાનભંડાર તથા સાધુ-સાધ્વી ભગવંતોને ભેટ. |

# સાદર સમર્પણમ્

શાસ્ત્રસાપેક્ષ જીવનસંવ્યવહારકુશળ...
ત્રિશતાધિક શ્રમણ-શ્રમણી ગુરુમૈયા, દીક્ષાદાનેશ્વરી
પ. પૂ. આ. ભ. ગુરુદેવ શ્રી વિજય
**ગુણરત્નસૂરીશ્વરજી** મહારાજાની
પવિત્ર અંજલીમાં
તથા
નિખાલસતાનીરધિ
પ્રવચનપ્રભાવક, ષડ્દર્શનનિષ્ણાત
પ. પૂ. આ. ભ. ગુરુદેવશ્રી વિજય
**રશ્મિરત્નસૂરીશ્વરજી** મહારાજાની
સુરમ્ય હસ્તકમળમાં
અવચૂરિ-વૃત્તિસમન્વિત શ્રી ગચ્છાચારપ્રકીર્ણક ગ્રંથનું
સાદર સમર્પણ...

**કૃપાકાંક્ષી**

**મુનિ યશરત્નવિજય**

# અહો ! સુકૃતમ્

પ્રસ્તુત ગ્રંથના પ્રકાશનનો સંપૂર્ણ લાભ લેનાર
દીક્ષાદાનેશ્વરી પ. પૂ. આ. ભ. શ્રી વિ. **ગુણરત્નસૂરીશ્વરજી** મ. સા. તથા
પ. પૂ. આ. ભ. શ્રી વિ. **રશ્મિરત્નસૂરીશ્વરજી** મ. સા. ની પ્રેરણાથી
પોતાની પવિત્ર શ્રુતનિધિનો સદ્વ્યય કરનાર...

**શ્રી અઠવાલાઈન્સ શ્વે. મૂ. પૂ. જૈન સંઘ**

**તથા**

**ફૂલચંદ કલ્યાણચંદ ઝવેરી ટ્રસ્ટ (સુરત)**

વાત્સલ્યનિધિ પ. પૂ. સા. શ્રી **પુણ્યરેખાશ્રીજી**ના શિષ્યવરેસ્યા
પ. પૂ. સા. શ્રી **સૌમ્યરેખાશ્રીજી**ની પ્રેરણાથી
**અનુમોદના... અભિનંદન... ધન્યવાદ...**

**લિ.**

**જિનગુણ આરાધના ટ્રસ્ટ**

## ✵ પ્રાપ્તિસ્થાન ✵

(૧) **શાહ બાબુલાલ સરેમલજી**
C/o સિદ્ધાચલ, સેન્ટ એન્સ સ્કૂલ સામે,
હીરાજૈન સોસાયટી, સાબરમતી
અમદાવાદ-૩૮૦૦૦૫.
(મો.) : ૯૪૨૬૫૮૫૯૦૪

(૨) **જિનગુણ આરાધના ટ્રસ્ટ**
C/o સિન્થેટિક્સ, ૧/૫, રાજદા ચાલ,
અશોકનગર, જુના હનુમાન ક્રોસલેન,
બીજો માળ, રૂમ નં. ૧૧, મુંબઈ-૪૦૦૦૦૧
(મો.) : ૯૮૨૦૪ ૫૧૦૭૩,
૯૮૯૦૫ ૮૨૨૨૦

(૩) **હેમંતભાઈ આર. ગાંધી**
C/o ૬૦૩, ૨૫-B, શિવકૃપા સો.
ભિવંડી, જિ. ઠાણા-૪૨૧૩૦૨
(મહારાષ્ટ્ર)
ફોન (રહે.) : ૦૨૫૨૨-૨૪૬૧૨૬

(૪) **ભંવરભાઈ ચુનીલાલજી**
C/o ભૈરવ કોર્પોરેશન,
S-૫૫, વૈભવલક્ષ્મી કોમ્પ્લેક્ષ,
ઘીકાંટા રોડ, અમદાવાદ-૧
(મો.) : ૯૪૨૭૭ ૧૧૭૩૩

# આશીર્વચનમ્

**महानिसीहकप्पाओ, ववहाराउ तहेव य ।**
**साहुसाहुणिअट्ठाए, गच्छायारं समुधिअं ॥**

પરમપવિત્ર મહાનિશીથસૂત્ર, બૃહત્કલ્પસૂત્ર અને વ્યવહારસૂત્ર આ ત્રણેય છેદગ્રંથોમાંથી ઉદ્ધૃત થયેલ આ અદ્ભુત આગમિક ગ્રંથ 'ગચ્છાચારપયન્ના' જૈનશાસનમાં અત્યંત આદરપાત્ર છે.

મુખ્ય ત્રણ અધિકારોમાં વ્હેંચાયેલ આ ગ્રંથમાં આચાર્યસ્વરૂપનિરૂપણ, સાધ્વાચારનિરૂપણ, સાધ્વીઆચારનિરૂપણ સુંદર અને સચોટ રીતે કરવામાં આવ્યું છે.

જગદ્ગુરુ શ્રીહીરસૂરિ મહારાજાના સમકાલીન પૂજ્ય **વાનર્ષિગણિ**એ સંક્ષિપ્ત ટીકાની રચના કરેલ... પૂર્વે છપાયેલ આ ટીકાને વિવિધ પ્રાચીન ભંડારોથી પ્રાપ્ત હસ્તપ્રતોના આધારે સંશોધિત કરવાની અને અપ્રગટ બે અવચૂરિઓને હસ્તપ્રતોના આધારે શુદ્ધીકરણ સાથે પ્રગટ કરવાની જહેમત મુનિશ્રી યશરત્નવિજયજીએ ઉઠાવી... તેમણે ખૂબ જ ચોક્કસાઈ પૂર્વક સંશોધન કર્યું છે.

સંશોધનક્ષેત્રે જૈનશાસનમાં મોટો શૂન્યાવકાશ સર્જાયો છે. માત્ર ગણ્યા-ગાંઠ્યા જ્ઞાન ઉપાસકો આ કાર્યમાં ઝંપલાવે છે.

જેમ જીર્ણોદ્ધારમાં આઠગણું પુણ્ય કહેવાય છે, તેમ પૂર્વના મહર્ષિની રચના શુદ્ધરૂપે અભ્યાસુઓના હાથમાં પહોંચે તે વધુ ઈચ્છનીય હોઈ વિશિષ્ટ પુણ્યકૃત્ય છે.

નાની વયમાં સંયમનો સ્વીકાર કરી **અનેકાંતજયપતાકાદિ** અનેક શાસ્ત્રોના ભાવાનુવાદાદિનું કાર્ય પૂર્ણ કરી આગમસાહિત્યમાં પ્રવેશ કર્યો છે. આ જ રીતે સ્વાધ્યાયયોગમાં લીન રહી પઠન-પાઠન-લેખન-સંશોધનમાં આત્મહિત મેળવતા રહે અને સ્વ-પરના કલ્યાણમાં નિમિત્ત બની અવિચલ મોક્ષસુખ પામે તેવી શુભાશિષ...

આસો વદ ૮ — **લિ.**

ગુરુપુષ્યામૃતસિદ્ધિયોગ — **આચાર્ય વિ.ગુણરત્નસૂરિ**

જૈન સોસાયટી, અમદાવાદ — **આચાર્ય વિ.રશ્મિરત્નસૂરિ**

नमोऽस्तु तस्मै जिनशासनाय

# પ્રસ્તાવના

ગચ્છાચાર પયન્નામાં ત્રણ વિભાગ છે.

(૧) ગચ્છાચાર્યના આચારો

(૨) સાધુઓના આચારો

(૩) સાધ્વીજીઓના આચારો

આમાં જે મૂળગાથાઓ છે, એમાં મોટા ભાગે ઉત્સર્ગનું વર્ણન છે. શાસ્ત્રોના વચનો આચાર બાબતમાં છ પ્રકારના હોય છે.

(૧) ઉત્સર્ગવચન

(૨) અપવાદવચન

(૩) ઉત્સર્ગ-અપવાદ વચન

(૪) અપવાદ-ઉત્સર્ગ વચન

(૫) ઉત્સર્ગ-ઉત્સર્ગ વચન

(૬) અપવાદ-અપવાદ વચન

આ ગ્રન્થની મૂળગાથાઓમાં પ્રાયઃ ક્યાંય અપવાદવચન જોવા નહિ મળે. એનું કારણ એ કે શરૂમાં તો સંયમીને ઉત્સર્ગથી જ ભાવિત કરવાનો હોય છે. અપવાદથી નહિ. અપવાદ ઇન્દ્રિયોની સુખશીલતાનો માર્ગ છે, ઉત્સર્ગ ઇન્દ્રિયોને પ્રતિકૂળ માર્ગ છે. જીવ આમ પણ સુખશીલતાના સ્વભાવવાળો છે, એટલે જો અપવાદ બતાવવામાં આવે, તો એ એમાં જ ખુંચી જાય. આ તો વાંદરાને દારુ પીવડાવવા જેવું થાય. માટે શરૂમાં સંયમીને ઉત્સર્ગના પદાર્થો પીરસવામાં આવે અને એ ઉચિત જ છે.

પણ આ કાળ એકદમ પડતો કાળ છે.

સંઘયણ નબળા...

સંયમાનુકૂળ નિમિત્તો ઓછા...

જીવોની એવી વિશિષ્ટતમ પાત્રતા પણ દુર્લભ...

એટલે સંયમજીવનમાં નાના-મોટા દોષો તો પ્રાયઃ દરેકના જીવનમાં રહ્યા જ કરે છે.

એટલે

ઉત્સર્ગમાર્ગનું વર્ણન વાંચીને-સાંભળીને એનાથી ભાવિત થયેલો સંયમી બીજા સંયમીઓમાં તે તે દોષો જોઈને, ગચ્છાચાર વિરુદ્ધ આચાર જોઈને જો એવું વિચારવા માંડે કે 'આ બધા તો ભ્રષ્ટ છે, સાચા સાધુ જ નથી...' તો આ દોષદૃષ્ટિ દ્વારા એ પોતાનું આત્મહિત ગુમાવી બેસે.

વળી ખરી હકીકત એ છે કે

ગચ્છાચારમાં બતાવેલા તમામ આચારો પાળે, તે સાજો જીવતો માણસ !

ગચ્છાચારમાં ન દર્શાવેલા અપવાદોને પુષ્ટાલંબનથી યતનાપૂર્વક સેવે, તે પણ સાજો જીવતો માણસ !

ગચ્છાચારથી વિપરીત આચારો સેવનારામાં બે ભેદ પડી જાય. તે આ રીતે-

એક માંદો પણ જીવતો માણસ !

બીજો માંદગીના કારણે મૃત્યુ પામેલો માણસ !

અમુક દોષોનું સેવન એવું છે કે એના કારણે સંયમ મલિન ચોક્કસ બને, પણ સંયમી મરી ન જાય, એ મેલ પછી પ્રાયશ્ચિત્ત દ્વારા ધોઈ જ શકાય છે.

અમુક દોષોનું સેવન એવું છે કે એના કારણે સંયમ મરી જાય, એટલે કે ગુણસ્થાન બદલાઈ જાય, જતું રહે. આ મૃત્યુ કહેવાય.

પણ મૃત્યુ પામેલું સંયમ પણ ફરી જીવંત થાય છે પ્રાયશ્ચિત્તાદિ દ્વારા !

આમ

(૧) શુદ્ધ અપવાદ સેવનારા પણ બહારથી ગચ્છાચારવિરૂદ્ધ આચરણ કરનારા લાગે,

(૨) અતિચાર સેવનારાને દોષ લાગે છે, પણ એમાં ચારિત્ર મરી જતું નથી,

(૩) અનાચાર સેવનારાને (એટલે કે મોટા દોષ સેવનારાને) ચારિત્ર તત્કાળ મરી જાય છે, પણ પછી પ્રાયશ્ચિત્ત દ્વારા એ જીવતું થઈ જાય છે.

આ ત્રણેય જણ મોક્ષમાર્ગના આરાધક બને છે.

પણ જે સંયમી આ બધું ન સમજે, અને માત્ર ગચ્છાચારપયન્ના ગ્રન્થના આધારે આ ત્રણ પ્રકારમાંથી કોઈના પણ માટે અસદ્ભાવ-નિંદા-તિરસ્કારાદિ કરે, તો એ સંયમી સ્વયં આચારપાલક શ્રેષ્ઠ કોટિનો હોય, તો પણ આત્મહિત ગુમાવી બેસે એવી શક્યતા પાકી છે.

માટે...

આ ગ્રન્થ વાંચનાર સંયમીઓને ખાસ વિનંતિ છે કે

(૧) 'આ આચાર મારામાં શી રીતે આવે,' એનો જ વિચાર કરવો.

(૨) શક્તિ હોય, તો સહવર્તીઓમાં પણ એ આચારની સ્થાપના કરવી.

(૩) પણ આચાર ન પાળનારાઓ માટે કોઈપણ જાતનો અભિપ્રાય આપવો નહિ.

એ તમારો-આપણો વિષય જ નથી, એમ જ સમજવું. કમ સે કમ છેદગ્રન્થોના કે ગુરૂતત્ત્વવિનિશ્ચય જેવા વિશિષ્ટ ગ્રન્થોના તલસ્પર્શી અભ્યાસ વિના તો એકપણ અક્ષર આ બાબતનો ઉચ્ચારવો નહિ કે 'આ શિથિલ છે...' વગેરે.

હા ! કેટલીક બાબતો એવી પણ હશે કે 'જે આ ગ્રન્થમાં આચાર રૂપે બતાવી હોય, પણ વર્તમાનમાં એની આખી સામાચારી પણ બદલાઈ ગયેલી દેખાય.' એટલે આ બધી બાબતોમાં શાસ્ત્રવચન વાંચ્યા પછી પણ વડીલો પાસે સામાચારી-પરંપરા જાણી લઈને તટસ્થ બનીને, મધ્યસ્થ બનીને આગળ વધવું. એટલે જ એમ કહેવાનું મન થાય કે આ ગ્રન્થ પરિપક્વ સંયમી પાસે ભણવો.

અંતે

પૂજ્યપાદ દીક્ષાદાનેશ્વરી **ગુણરત્નસૂરીશ્વરજી** મહારાજા

પૂજ્યપાદ **રશ્મિરત્નસૂરિજી** મહારાજ

આ ગ્રન્થના સંપાદક મુનિપ્રવર યશરત્ન વિ.

વગેરે એટલી પ્રસિદ્ધ વ્યક્તિઓ છે કે એમના માટે કશું લખવાનું ગૌણ રાખીને પ્રસ્તાવનાને વિરામ આપું છું.

યુગપ્રધાનઆચાર્યસમ પૂજ્યપાદ પંન્યાસપ્રવર શ્રી
ચન્દ્રશેખરવિજયજી મ. સાહેબનો શિષ્ય
**મુનિ ગુણહંસ વિ.**
લક્ષ્મીવર્ધક જૈનસંઘ
પાલડી, અમદાવાદ
આસો વદ-એકમ

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

॥ तपागच्छाचार्य-श्रीप्रेम-भुवनभानु-जयघोष-जितेन्द्र-गुणरत्न-रश्मिरत्नसूरिसद्गुरुभ्यो नमः ॥

॥ ऐँ नमः ॥

# પવિત્રતાનો પરમપંથ : આચાર

જેમ આહાર-પાન એ ક્ષુધાશમન અને તૃષાવિલય માટે છે, તેમ જિનશાસનના કોઈપણ આચાર-અનુષ્ઠાન માત્ર કોઈ એક માટે કહેવા હોય, તો એ છે : 'રાગ-દ્વેષવિલય!'

❁ રાગના હ્રાસથી 'વૈરાગ્ય' કેળવાતું જાય...

❁ દ્વેષના હ્રાસથી 'સામ્યપરિણતિ' કેળવાતી જાય...

આમ રાગ-દ્વેષની ઓછાશથી ગુણવિકાસ પરાકાષ્ઠાએ પહોંચે છે અને એ વિના કે એના ધ્યેય વિના બાહ્ય તમામ આચારો માત્ર આડંબરનું સ્થાન લે છે... એટલે સ્પષ્ટ છે કે રાગ-દ્વેષના વિલયનું અતિ-અતિ મહત્ત્વ છે.

અને એ પામવા વીતરાગ પરમાત્માના માર્ગ સિવાય બીજું કોઈ શરણ નથી... આવેશ, અપેક્ષા, આસક્તિ, અહંકાર... એ જો સંસારનો માર્ગ છે, તો વિવેકના માધ્યમે એ બધાને દૂર કરીને ગુણવત્તા કેળવવી એ પ્રભુનો માર્ગ છે...

પ્રભુના માર્ગને પામવા આચારનું પાલન અનિવાર્ય છે... અને એ એટલા માટે કે કોઈપણ વિશુદ્ધ પરિણતિ એ આચારરૂપ પ્રવૃત્તિ વિના પ્રાયઃ પ્રગટ કે સ્થિર થઈ શકે નહીં... જો આચાર છે, તો જ વિશુદ્ધ પરિણતિ અકબંધ છે, નહીં તો નહીં... એટલે જ પરમાત્માએ તે તે પરિણતિ કેળવવા તે તે આચાર માર્ગ બતાવ્યો છે... જેમકે -

❁ અહોભાવની પરિણતિ કેળવવા વંદનાદિ વ્યવહાર...

❁ પાપજુગુપ્સાની પરિણતિ કેળવવા પ્રતિક્રમણાદિ વ્યવહાર...

❁ અંતર્મુખતાની પરિણતિ કેળવવા સ્વાધ્યાયાદિ વ્યવહાર... વગેરે...

એટલે આચારનું પાલન આવશ્યક છે એ સ્પષ્ટ છે. પણ એનાં જ્ઞાન વિના એનું પાલન અસંભવિત હોઈ 'કઇ કઇ અવસ્થામાં કયા કયા આચારો સેવવા ?' ઇત્યાદિ જણાવવા દ્વારા કોઈ પૂર્વાચાર્ય સ્થવિરમહર્ષિએ ઉપકાર કર્યો છે આપણા જેવા બાળ જીવો પર !

એ પૂજ્ય સ્થવિર ભગવંતે, મહાનિશીથ-કલ્પ-વ્યવહાર વગેરે શાસ્ત્રોમાંથી ગચ્છના આચારોનું સુંદર સંકલન કરીને **'ગચ્છાચારપ્રકીર્ણક'** નામની અદ્ભુત કૃતિનાં નિર્માણ દ્વારા વિવેક-અર્પણ કર્યું આપણા વિકાસ માટે ! અને અવચૂરિકારોએ એ વિવેકને વિશદ બનાવવાનું

કામ કર્યું, તો વૃત્તિકારોએ એ વૈશદ્યનો વિસ્તાર પાથરવાનું કામ કર્યું... ખરેખર અદ્ભુત ઉપકાર કર્યો છે એ મહાપુરુષોએ !

બહુશ્રુત મહાપુરુષો શાસ્ત્રનું સર્જન કરીને અનેક અદ્ભુત પદાર્થો ભવ્યજીવો સમક્ષ રજુ કરે છે... પણ એ શાસ્ત્રનું ભણતર જો સંવેદનશીલતાપૂર્વક કે વિવેકપરિકર્મિતમતિ દ્વારા ન કરવામાં આવે, તો એ જ શાસ્ત્ર તે તે ભારેકર્મી જીવો માટે સંસારનું નિમિત્ત પણ બની જ શકે છે...

એટલે જ આ ગ્રંથમાં જે પણ આચારો બતાવ્યા છે, તે જાણીને આચારહીન જીવો પર દ્વેષ-દુર્ભાવ ન થઈ જાય તેની કાળજી રાખવી અતિ આવશ્યક છે... હા, તે તે આચારો આપણા જીવનમાં આવે એ માટે ચોક્કસ પ્રયત્ન કરવો... પણ બીજાને 'દોષવાન્' જોઈ આપણે 'દ્વેષવાન્' બનવું એ ઉચિત માર્ગ નથી... માટે આ વિષયમાં સાવધાન બનીને રહેવું એવી ખાસ ભલામણ છે.

પ્રસ્તુત ગ્રંથ વિશે જણાવવાનું કે, આ નૂતન પ્રકાશનમાં પૂર્વાચાર્યવિરચિત ગચ્છાચારપયન્ના ગ્રંથની મૂળગાથા અને તેની સંસ્કૃતછાયા સાથે પૂજ્ય વાનર્ષિગણિવિરચિત વૃત્તિ તેમજ પૂર્વાચાર્યવિરચિત બે અવચૂરિઓનું પણ સંપાદન કરવામાં આવ્યું છે...

એમાં પૂજ્ય વાનર્ષિગણિ વિરચિત વૃત્તિ યદ્યપિ પૂર્વપ્રકાશિત હતી જ... પણ છતાં પૂર્વપ્રકાશનમાં ઘણી અશુદ્ધિઓ નજરે ચડી... એટલે શુદ્ધ સંસ્કરણ પ્રકાશિત કરવું આવશ્યક જણાયું... અને એ માટે અનેક સંસ્થાઓના સુંદર સહયોગે વિવિધ હસ્તપ્રતો સંગૃહીત થઈ... અને એના આધારે યથાક્ષયોપશમ શુદ્ધ સંપાદન કરવાનો પ્રયત્ન કર્યો છે... સાથે જ હજી સુધી પ્રાયઃ અપ્રગટ બે અવચૂરિઓનું પણ સંપાદન થયું છે... અજ્ઞાનતાવશાત્ મારાથી કોઈ ક્ષતિ રહી હોય, તો તેનું હું અંતઃકરણપૂર્વક મિચ્છામિ દુક્કડમ્ માંગું છું.

આ અદ્ભુત આગમગ્રંથનું મનન-પરિશીલન કરીને સહુ અભ્યાસીવર્ગ પોતાના જીવનને **આચારમય** બનાવે અને પ્રત્યેક આચારને **આદરમય** બનાવે એ જ અરિહંત પરમાત્માને અંતિમ અભ્યર્થના કરી વિરમું છું.

જિનાજ્ઞાવિરુદ્ધ લખાયું હોય તેની ક્ષમાયાચના...

દ.

શ્રીપ્રેમ-ભુવનભાનુ-જયઘોષ-જિતેન્દ્ર

ગુણરત્ન-રશ્મિરત્નસૂરિ ચરણરજ

**મુનિ યશરત્નવિજય.**

# કૃતજ્ઞતા-અભિવ્યક્તિ

* દીક્ષાદાનેશ્વરી, ત્રિશતાધિક શ્રમણ-શ્રમણીગુરુમૈયા, પરમપૂજ્ય આ. ભ. શ્રી વિ. **ગુણરત્નસૂરીશ્વરજી** મહારાજે કરેલ બેજોડ ઉપકાર...
* પ્રવચનપ્રભાવક, ષડ્દર્શનનિષ્ણાત, પરમપૂજ્ય આ. ભ. શ્રી વિ. **રશ્મિરત્નસૂરીશ્વરજી** મહારાજા દ્વારા થયેલ અનહદ અનુગ્રહ...
* વિદ્વદ્વર્ય પ. પૂ. મુ. શ્રી **ગુણહંસવિજયજી** મ. સા. એ પ્રસ્તાવના લખી આપીને કરેલો સુંદર અનુગ્રહ...
* વિદ્યાગુરુવર્ય પ. પૂ. મુ. શ્રી **સૌમ્યાંગરત્નવિજયજી** મ. સા. અને પ. પૂ. મુ. શ્રી **તીર્થરત્નવિજયજી** (પિતાજી મ. સા.) મ. સા. ની અનન્ય સહાય...
* સહવર્તી તમામ **આત્મીય મુનિવરોનો** બેજોડ સહાયકભાવ...
* વાત્સલ્યનિધિ પ. પૂ. સા. શ્રી **પુણ્યરેખાશ્રીજી** મ. સા. ના સુશિષ્યા સા. શ્રી **સૌમ્યરેખાશ્રીજી**ના શિષ્યા સા. શ્રી **નિરૂપમરેખાશ્રીજી** (બા મ. સા.) અને સા. શ્રી **ધન્યરેખાશ્રીજી** (બેન મ. સા.) આ બંને સાધ્વીજી ભગવંતોની સતત વહેતી શુભકામના...

આ તમામ ઉપકારીઓના ઉપકારનું હું કૃતજ્ઞભાવે સ્મરણ કરું છું... અને હરહંમેશ તેઓશ્રીની પરમકૃપાનું હું ભાજન બનતો રહું એવા આશીર્વાદને ઇચ્છું છું...

**✸ કૃપાકાંક્ષી ✸**

મુનિ યશરત્નવિજય

સંપાદન-સંશોધનાદિમાં ઉપયુક્ત
ગચ્છાચારપયન્ના મૂળગ્રંથની વિવિધ સંસ્થાઓથી સંપ્રાપ્ત

# હસ્તલિખિતપ્રતો

A - प्रत


॥ ॐ ह्रीँ श्रीँ अर्हं नमः॥
卐
नमिऊण महावीरं तिअसिंदनमसिअं महाभागं।
गच्छायारं किंची उद्धरिमो सुअसमुद्दाओ ॥१॥
अत्थेगे गोयमा पाणी, जे उम्मग्गपइट्ठिए।
गच्छंमि संवसित्ताणं, भमइ भवपरंपरं ॥२॥
जामद्धं जाम दिण पक्खं, मासं संवच्छरंपि वा।
संमग्गपट्ठिए गच्छे, संवसमाणस्स गोयमा ॥३॥

સ્થિતિ : સુંદર  પૃષ્ઠ : ૧૮
સ્થળ : ગીતાર્થગંગા સંસ્થા

## B- प्रत



**સ્થિતિ : સરસ  મૂળસ્થાન : શ્રી જૈનજ્ઞાનભંડાર - સંવેગીનો ઉપાશ્રય**
**સહયોગ : શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

## C - प्रत



૧

**સ્થિતિ : સુંદર  પૃષ્ઠ : ૪  મૂળસ્થાન : લા.દ. વિદ્યામંદિર**
**નંબર : ૩૭૫૭  સહયોગ : શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

D- प्रत

સ્થિતિ : પ્રકાશિતગ્રંથ  પ્રકાશક : આગમોદયસમિતિ - સુરત
સંપાદક : પૂ.આગમોદ્ધારક આ. શ્રી. સાગરાનંદસૂરીશ્વરજી મ.સા.  નામ : प्रकीर्णकदशकम्

E - प्रत

સ્થિતિ : ત્રુટક અને અપૂર્ણ  સ્થળ : જેસલમેર - શ્રી જિનભદ્રસૂરિ જૈનજ્ઞાનભંડાર
નંબર : ૧૪૬  પ્રત : તાડપત્ર પર આલેખિત

F- प्रत

સ્થિતિ : સુંદર  સ્થળ : સંઘવી વાડા જૈન જ્ઞાનભંડાર - પાટણ
નંબર : ૬૫  પ્રત : તાડપત્ર પર આલેખિત

G - प्रत

સ્થિતિ : સરસ  સંગ્રહ : પૂ. મુનિશ્રી પુણ્યવિજયજી મ. દ્વારા સંગ્રહિત
વિદ્યામાન : લા.દ. વિદ્યામંદિર - અમદાવાદ  ક્રમાંક : ૧૪૫૮

## H- प्रत



गच्छायारपइण्णयं

[गा. १. मंगलमभिधेयं च]

२८८४. नमिऊण महावीरं तियसिंदनमंसियं महाभागं ।
गच्छायारं किंची उद्धरिमो सुयसमुद्दाओ ॥ १ ॥

[गा. २. उम्मग्गगामिगच्छसंवासे हाणी]

२८८५. अत्थेगे गोयमा! पाणी जे उम्मग्गपइट्ठिए ।
गच्छम्मि संवसित्ताणं भमई भवपरंपरं ॥ २ ॥

[गा. ३–६. सदायारगच्छसंवासे गुणाइ]

२८८६. जामद्धं जाम दिण पक्खं मासं संवच्छरं पि वा ।
सम्मग्गपट्ठिए गच्छे संवसमाणस्स गोयमा! ॥ ३ ॥

२८८७. लीलाअलसमाणस्स निरुच्छाहस्स वीमणं ।
पेक्खोविक्खाइ अन्नेसिं महाणुभागाण साहुणं ॥ ४ ॥

२८८८. उज्जमं सव्वथामेसु घोर-वीरतवाइयं ।
लज्जं संकं अइक्कम्म तस्स विरियं समुच्छले ॥ ५ ॥

२८८९. वीरिएणं तु जीवस्स समुच्छलिएण गोयमा! ।
जम्मंतरकए पावे पाणी मुहुत्तेण निद्दहे ॥ ६ ॥

[गा. ७–४० आयरियसरूववण्णणाहिगारो]

२८९०. तम्हा निउणं निहालेउं गच्छं सम्मग्गपट्ठियं ।
वसेज्ज तत्थ आजम्मं गोयमा! संजए मुणी ॥ ७ ॥

२८९१. मेढी आलंबणं खंभं दिट्ठी जाणं सुउत्तमं ।
सूरी जं होइ गच्छस्स तम्हा तं तु परिक्खए ॥ ८ ॥

**સ્થિતિ : અદ્‌ભુત + શુદ્ધ　　પ્રકાશન : પુસ્તકકારે પ્રકાશિત**

**સંપાદક : પૂ. મુનિશ્રી પુણ્યવિજયજી મ.સા.　　નામ : पइण्णयसुत्ताइं　　ભાગ : ૨**

## I - प्रत



સંપાદન-સંશોધનાદિમાં ઉપયુક્ત
ગચ્છાચારપયન્ના ગ્રંથની પ્રથમ-અવચૂરિની
વિવિધ સંસ્થાઓથી સંપ્રાપ્ત

# હસ્તલિખિતપ્રતો

A - प्रत



સ્થિતિ : સરસ   પૃષ્ઠ : ૧૦   પોથીનં : ૫૮   પ્રતનં : ૬
સ્થળ : શ્રી નીતિવિજય શાસ્ત્રસંગ્રહ-ખંભાત   વિશેષ : ત્રિપાઠી

## B - प्रत



**સ્થિતિ : સરસ  પૃષ્ઠ : ૮  પોથીનં : ૨૩  પ્રતનં : ૪૧**
**સ્થળ : શ્રી નીતિવિજય શાસ્ત્રસંગ્રહ-ખંભાત  વિશેષ : ત્રિપાઠી**

## C- प्रत



**સ્થિતિ : સુંદર  પૃષ્ઠ : ૧૫  પ્રતનં : ૧૯૦**
**સ્થળ : જૈન આત્માનંદ સભા-ભાવનગર  વિશેષ : ત્રિપાઠી**

D - प्रत



**સ્થિતિ : સરસ  પૃષ્ઠ : ૧૪  નંબર : ૭૯૨૯**

**સ્થળ : શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર કોબા...  વિશેષ : ત્રિપાઠી**

E- प्रत



**સ્થિતિ : સુંદર  પૃષ્ઠ : ૬  નંબર : ૨૫૬૪**

**સ્થળ : શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર કોબા...**

## F - प्रत



**સ્થિતિ : સરસ  પૃષ્ઠ : ૯**

**સ્થળ : શ્રી જિનશાસન આરાધના ટ્રસ્ટ...  વિશેષ : ત્રિપાઠી**

### સંપાદન-સંશોધનાદિમાં ઉપયુક્ત
### ગચ્છાચારપયન્ના ગ્રંથની દ્વિતીય-અવચૂરિની
### વિવિધ સંસ્થાઓથી સંપ્રાપ્ત

# હસ્તલિખિતપ્રતો

A- प्रत



**સ્થિતિ :** સુંદર **પૃષ્ઠ :** ૯ **મૂળસ્થાન :** સંવેગીનો ઉપાશ્રય-અમદાવાદ

**સહયોગ :** શ્રી જિનશાસન આરાધના ટ્રસ્ટ

## B - प्रत



**સ્થિતિ : સરસ  પૃષ્ઠ : ૯  મૂળસ્થાન : સંવેગીનો ઉપાશ્રય-અમદાવાદ**
**સહયોગ : આ. શ્રી હેમચંદ્રસૂરિ મ.સા. પ્રેરિત શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

## C- प्रत



**સ્થિતિ : સુંદર  પૃષ્ઠ : ૪  વિશેષ : પંચપાઠી**
**સ્થળ-સહયોગ : શ્રી ડોસાભાઈ અભેચંદજી જ્ઞાનભંડાર-ભાવનગર**

સંપાદન-સંશોધનાદિમાં ઉપયુક્ત
ગચ્છાચારપયન્ના ગ્રંથની શ્રી વાનર્ષિગણિવિરચિત વૃત્તિની
વિવિધ સંસ્થાઓથી સંપ્રાપ્ત

# હસ્તલિખિતપ્રતો

A - प्रत



**સ્થિતિ :** સુંદર **પૃષ્ઠ :** ૨૪ **મૂળસ્થાન :** એલ.ડી.ઈન્ડોલાજી
**નંબર :** ૩૭૬૪ **સહયોગ :** શ્રી જિનશાસન આરાધના ટ્રસ્ટ

B - प्रत



સ્થિતિ : સરસ  પૃષ્ઠ : ૨૧  મૂળસ્થાન : આણંદજી કલ્યાણજી જ્ઞાનભંડાર - લીંબડી
ડા. : ૧૮  ગ્રંથ : ૨૦૩  વિશેષ : ત્રિપાઠી  સહયોગ : શ્રી જિનશાસન આરાધના ટ્રસ્ટ

C - प्रत



સ્થિતિ : સુંદર  પૃષ્ઠ : ૨૨  નંબર : ૨૨૪૪૭
સ્થળ - સહયોગ : લા.દ. ભારતીય સંસ્કૃતિ વિદ્યામંદિર - અમદાવાદ  વિશેષ : ત્રિપાઠી

## અનુક્રમ


**અવલોકન** **પાઠ**

(૧) વૃત્તિસહિત ગચ્છાચાર... ............................... ૧-૯૧

(૨) અવચૂરિદ્વયસમન્વિત ગચ્છાચાર............................. ૯૨-૧૫૫


## ગ્રંથવિષયનિર્દેશ


**વિષય** **ગાથા**

મંગલ અને અભિધેય............................................ ૧

ઉન્માર્ગગામી ગચ્છમાં રહેવામાં નુકશાન ........................... ૨

આચારસંપન્ન ગચ્છમાં રહેવાના ફાયદા.............................. ૩-૬

આચાર્યસ્વરૂપ વર્ણનાધિકાર.................................... ૭-૪૦

સાધુસ્વરૂપ વર્ણનાધિકાર..................................... ૪૧-૧૦૬

આર્યાસ્વરૂપ વર્ણનાધિકાર ................................. ૧૦૭-૧૩૪

ઉપસંહાર................................................ ૧૩૫-૧૩૭


## પ્રસ્તુત ગ્રંથવિષયક પ્રકાશનો

(૧) પૂજ્યવાનર્ષિગણિવિરચિત વૃત્તિ તેમજ અવચૂરિદ્વયસમન્વિત ગચ્છાચારપ્રકીર્ણક

(૨) પૂજ્ય વિજયવિમલગણિવિરચિત વૃત્તિસમન્વિત શ્રીગચ્છાચારપ્રકીર્ણક
A-અર્થવિવેક, B-છાયાસન્મિત્ર, C-પાઠપાઠાંતર નોંધાદિથી સમન્વિત સુંદર સંપાદન

(૩) પૂજ્ય વિજયવિમલગણિવિરચિત વૃત્તિસમન્વિત શ્રીગચ્છાચારપ્રકીર્ણક
A-અર્થવિવેક, B-વિશદવિવરણ, C-શાસ્ત્રસંલોક
D-છાયાસન્મિત્ર, E-પાઠ-પાઠાંતરનોંધાદિથી સમલંકૃત, અને વિવિધ
હસ્તપ્રતોના આધારે પરિમાર્જિત સુંદર-સુઘડ સંપાદન...

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः॥

॥ तस्स भुवणेक्कगुरुणो णमो अनेगंतवायस्स ॥

॥ परमपूज्यसुविहितश्रुतस्थविरपरम्परायै नमः ॥

॥ तपागच्छाचार्यश्री-प्रेम-भुवनभानु-जयघोष-जितेन्द्र-गुणरत्न-रश्मिरत्नसूरिसद्‌गुरुभ्यो नमः ॥

**पूज्यवानर्षिगणिविरचितवृत्तिसमलङ्‌कृतम्**

# ॥ श्रीगच्छाचारप्रकीर्णकम् ॥

**श्रीपार्श्वजिनमानम्य, तीर्थाधीशं वरप्रदम् ।**
**गच्छाचारे गुरोर्ज्ञातां, वक्ष्ये व्याख्यां यथाऽऽगमम् ॥१॥**

शास्त्रस्यादौ प्रयोजनाभिधेयसम्बन्धमङ्गलान्यभिधातव्यानि, तत्र प्रयोजनमनन्तर-परम्परभेदाद् द्विधा, पुनरेकैकं कर्तृश्रोतृभेदाद् द्विधा, तत्र गच्छाचारप्रकीर्णककर्त्तुर-नन्तरप्रयोजनं शिष्यावबोधः, परम्परं त्वपवर्गप्राप्तिः, श्रोतुरप्यनन्तरं तदर्थावगमः, परम्परं तु मुक्तिपदप्राप्तिः १, अभिधेयं तु गच्छाचारः, तस्यैव भणिष्यमाणत्वात् २, सम्बन्धश्चोपायोपेयभावलक्षणः, तत्र वचनरूपापन्नमिदमेव गच्छाचारप्रकीर्णकमुपायः, उपेयं तु तदर्थपरिज्ञानम् ३, मङ्गलं द्विधा द्रव्यभावभेदात्, तत्र द्रव्यमङ्गलं पूर्ण-कलशादि, तद् अनैकान्तिकत्वात् मुक्त्वा भावमङ्गलं तु शास्त्रकर्त्तुरनन्तरोपकारित्वाद-भीष्टदैवतस्य वर्द्धमानस्वामिनो नमस्कारद्वारेणाह –

**नमिऊण महावीरं, तियसिंदनमंसिअं महाभागं ।**
**गच्छाचारं किंची, उद्धरिमो सुअसमुद्दाओ ॥१॥**

नत्वा महावीरं त्रिदशेन्द्रनमस्यितं महाभागम् ।
गच्छाचारं किञ्चिदुद्धरामः श्रुतसमुद्रात् ॥१॥

व्याख्या – 'नत्वा' प्रणम्य, कम् ?-महांश्चासौ वीरश्च महावीरस्तं महावीरम्, किंविशिष्टम् ?-त्रिदशाः=सुमनसस्तेषामिन्द्रैः=ईशैर्नमस्यितं=नमस्कृतं 'महाभागं' विश्व-विख्यातचतुस्त्रिंशन्महाऽतिशयविराजमानं अचिन्त्यशक्त्यन्वितं वा, गच्छस्य=भाव-मुनिवृन्दस्य आचारो=ज्ञानाचारादिः गणमर्यादारूपो वा तं गच्छाचारं 'किञ्चित्'

**स्वल्पमुद्धरामो वयं, श्रुतमेव=द्वादशाङ्गीलक्षणमेव समुद्रः=सागरः श्रुतसागरस्तस्मात्-** श्रुतसमुद्रात् ॥१॥

**अथ प्रथमं तावदुन्मार्गस्थिते गच्छे वसतां फलं दर्शयति –**

**अत्थेगे गोयमा ! पाणी, जे उम्मग्गपइट्ठिए ।**
**गच्छम्मि संवसित्ताणं, भमई भवपरंपरं ॥२॥**

सन्त्येके गौतम ! प्राणिनः ये उन्मार्गप्रतिष्ठिते ।
गच्छे संवस्य भ्रमन्ति भवपरम्पराम् ॥२॥

व्याख्या – **अस्तीत्यव्ययं बहुवचनार्थे** 'अस्ति' **सन्ति, विद्यन्त इत्यर्थः,** 'एके' **केचित्=वैराग्यवन्तः** 'प्राणिनो' **जीवाः हे गौतम !** 'ये' **जीवाः अज्ञानत्वेन पण्डितं-मन्यत्वेन च मार्गदूषणपूर्वकमुत्सूत्रप्ररूपणा यत्र स** उन्मार्गः **अथवा यत्र पञ्चाश्रव-प्रवृत्तिः स उन्मार्गः, तस्मिन् प्रतिष्ठिते=प्रकर्षेण स्थिते एवंविधे** 'गच्छे' **साध्वाभासगणे** 'संवसित्ताणं' **ति उषित्वा** 'भ्रमन्ति' **परिभ्रमणं कुर्वन्तीत्यर्थः, कां ?**-भवस्य=**चतुर्गति-लक्षणस्य** परम्परा=**परिपाटी तां भवपरम्पराम्** ॥२॥

**अथ किञ्चित्प्रमादवतामपि सन्मार्गस्थिते गच्छे वसतां गाथापञ्चकेन फलं दर्शयति –**

**जामद्ध जाम दिण पक्खं, मासं संवच्छरंपि वा ।**
**सम्मग्गपट्ठिए गच्छे, संवसमाणस्स गोयमा ! ॥३॥**

**लीला अलसमाणस्स, निरुच्छाहस्स वीमणं ।**
**पिक्खविक्खाइ[1] अन्नेसिं, महाणुभागाण साहुणं ॥४॥**

**उज्जमं सव्वथामेसु, घोरवीरतवाइअं ।**
**लज्जं[2] संकं अइक्कम्म, तस्स वीरिअं समुच्छले ॥५॥**

---

१. 'पक्खाविक्खीइ' **A-D** प्रतपाठः । 'पिक्खाविक्खिइ' **B-C**-प्रतपाठः । 'पेक्खाविक्खिइ' **E-F**-प्रतपाठः । 'पेक्खोविक्खाइ' **H**-प्रतपाठः । २. 'ईसक्का संक भय लज्जा तस्य' **F**-प्रते, 'इकासंत भय लज्जा तस्स' **G**-प्रते ।

**वीरिएणं तु जीवस्स, समुच्छलिएण गोयमा! ।**
**जम्मंतरकए पावे, पाणी मुहुत्तेण निद्दहे ॥६॥**

**तम्हा निउणं निहालेउं, गच्छं सम्मग्गपट्ठिअं ।**
**वसिज्ज तत्थ आजम्मं, गोयमा ! संजए मुणी ॥७॥**

यामादर्धं यामं दिनं पक्षं, मासं संवत्सरमपि वा ।
सन्मार्गप्रस्थिते गच्छे, संवसमानस्य गौतम ! ॥३॥

लीलालसायमानस्य, निरुत्साहस्य विमनस्कस्य ।
पश्यतः अन्येषां महानुभागानां साधूनाम् ॥४॥

उद्यमं सर्वस्थामसु, घोरवीरतपः-आदिकं ।
लज्जां शङ्कामतिक्रम्य, तस्य वीर्यं समुच्छलेत् ॥५॥

वीर्येण तु जीवस्य समुच्छलितेन गौतम ! ।
जन्मान्तरकृतानि पापानि प्राणी मुहूर्तेन निर्दहेत् ॥६॥

तस्मान्निपुणं निभाल्य, गच्छं सन्मार्गप्रस्थितम् ।
वसेत्तत्र आजन्म गौतम ! संयतो मुनिः ॥७॥

व्याख्या – 'यामादर्धं' **प्रहरादर्धं** 'यामं' **प्रहरं** 'दिनं' **अहोरात्रं** 'पक्षं' **मासादर्धं** 'मासं' **पक्षद्वयं** 'संवत्सरं' **प्रतीतं, अपिशब्दाद् वर्षद्वयादिकं यावत्, वाशब्दो विकल्पार्थः,** 'सन्मार्गप्रतिष्ठिते' **जिनोक्तवचने यथाशक्ति स्थिते** 'गच्छे' **सत्साधुगणे** 'संवसमानस्य' **निवासं कुर्वाणस्य साधोर्वक्ष्यमाणलक्षणस्येति शेषः हे गौतम ! ॥३॥**

**किम्भूतस्य ?**-लीलया=**सुखत्वेन** 'अलसमाणस्स'**त्ति आलस्यं कुर्वाणस्य** 'निरुत्साहस्य' **निरुद्यमस्य** 'वीमणं'**ति षष्ठ्यर्थे द्वितीया** 'विमनस्कस्य' **शून्यचित्तस्य** 'पिक्खविक्खाइ' **त्ति पश्यतः साधूनां** 'महानुभागानां' **प्रौढप्रभावाणाम् ॥४॥**

'उद्यमं' **अनालस्यं** 'सर्वस्थामसु' **सर्वक्रियासु, किंभूतमुद्यमं ?**-'घोरवीरतवाइअं'**ति घोरं=दारुणमल्पसत्त्वैर्दुरनुचरत्वात्,** 'वीर'**न्ति वीरे=कर्मरिपुविदारणसमर्थे भवं वैरं, एवंविधं तप आदिर्यत्र तम्, आदिशब्दाद्दुष्करगुर्वादिवैयावृत्त्यं,** 'लज्जां' **व्रीडां** 'शङ्कां'

जिनोक्ते गुरुवचने च संशयरूपां 'अतिक्रम्य' सर्वथा परित्यज्य 'तस्य' सुखशीलादि-दोषयुक्तस्यापि साधोः 'वीर्यं' जीवोत्साहरूपं समुच्छलेत्, अहमपि जिनोक्तक्रियां करोमि येन दुष्टदुःखसागरान्मुञ्चामीत्यर्थः, षष्ठाङ्गोक्तशेलकाचार्यवत् ॥५॥

वीर्योच्छलने फलमाह-वीर्येण तु जीवस्य समुच्छलितेन हे गौतम ! 'जन्मान्तर-कृतानि' बहुभवोपार्जितानि 'पापानि' ज्ञानावरणादिदुष्कर्माणि 'प्राणी' आसन्नमोक्षकः 'मुहूर्त्तेन' अन्तर्मुहूर्तमात्रेण 'निर्दहेत्' भस्मसात्कुर्यादित्यर्थः, स्कन्धकाचार्यशिष्य-दृढप्रहारि-मरुदेव्यादिवदिति ॥६॥

यस्मादालस्यवतामपि सद्गणे एते गुणास्तस्मात् 'निपुणं' आत्ममोक्षकरं यथा स्यात्तथा 'निभाल्य' ज्ञानचक्षुषाऽवलोक्य 'गच्छं' गणं 'सन्मार्गप्रस्थितं' जिनोक्त-मार्गव्यवस्थितं 'वसेत्' गुर्वाज्ञापूर्वकं निवासं कुर्यादित्यर्थः, 'तत्र' सद्गणे जन्म मर्यादीकृत्य 'आजन्म' यावज्जीवमित्यर्थः 'हे गौतम !' 'संयतः' षड्जीवपालनतत्परः 'मुनिः' गुर्वभिप्रायाऽऽगमवेत्ता ॥७॥

अथ सद्गणः सदाचार्येणैव भवति, अतः सदाचार्यलक्षणमाह –

मेढी आलंबणं खंभं, दिट्ठी जाणं सुउत्तिमं[१] ।
सूरी [२]जं होइ गच्छस्स, तम्हा तं तु परिक्खए ॥८॥

मेढिरालम्बनं स्तम्भो दृष्टिर्यानं सुयुक्तिमान् ।
सूरिर्यस्माद्भवति गच्छस्य तस्मात्तं तु (एव) परीक्षेत ॥८॥

व्याख्या – 'मेढी'त्ति मेढिः=पशुबन्धार्थं खलमध्ये स्थूणा, यथा तया बद्धानि बलीवर्दादिवृन्दानि मर्यादया प्रवर्त्तन्ते । 'आलम्बनं' यथा गर्त्तादौ पतज्जन्तोर्हस्ताद्याधार आलम्बनं तथा भवगर्त्तायां पततां भव्यानामाचार्य आलम्बनं, कामातुरस्वशिष्यं प्रति नन्दिषेणवत् । 'खंभं' यथा स्तम्भो गृहाधारो भवति तथाऽऽचार्यः साधुसंयम-गृहाधारः, मेघसंयमगृहं प्रति श्रीवीरवत् । 'दिट्ठी'ति नेत्रम्, यथा नेत्रेण हेयोपादेयं विलोक्यते तथाऽऽचार्यरूपनेत्रेण हेयोपादेयं ज्ञायते प्रदेशिवत् । 'यानं' यानपात्रम्,

---

१. 'सुउत्तमं' पूर्वमुद्रिते । २. 'सूरी उ' F-प्रते ।

यथा अच्छिद्रं यानपात्रं सत्संयोगे तीरं प्रापयति तथाऽऽचार्योऽपि भवतीरं प्रापयति, जम्बूस्वामिनं प्रति श्रीसुधर्मस्वामिवत् । 'सुउत्तिम'मिति सुष्ठु=अत्यर्थं दृढा गुप्तिः= नवब्रह्मचर्यरूपा अस्यास्तीति सुगुप्तिमान्, यद्वा सुष्ठु=अतिशायिनी कुमतकर्कशप्रस्तर-टङ्कणायमाना सङ्घपद्मचन्द्रायमाना युक्तिरस्यास्तीति सुयुक्तिमान्, अथवा 'सुउत्तम'मिति पाठे तु सुष्ठु=अतिशयेनाचार्यगुणैरुत्तमः 'यत्' यस्मात् एवंविधः 'सूरिः' आचार्यो भवति 'गच्छस्य' गणस्य योग्यस्तस्मात् 'तं' आचार्यं 'परिक्खए'त्ति तस्य परीक्षां कुर्यादित्यर्थः ॥८॥

सन्मार्गस्थिताचार्यस्वरूपं किञ्चिद्दर्शितम्, अथैतद्विपरीतस्वरूपं प्रश्नयन्नाह –

**भयवं ! केहि लिंगेहि, सूरिं उम्मग्गपट्ठियं ।**
**वियाणिज्जा छउमत्थे, मुणी ! तं मे निसामय ॥९॥**

भगवन् ! कैर्लिङ्गैः, सूरिमुन्मार्गप्रस्थितम् ।
विजानीयात् छद्मस्थः, मुने ! तन्मे निशामय ॥९॥

व्याख्या – 'हे भगवन् !' हे पूज्य ! कैः 'लिङ्गैः' लक्षणैः सूरिं 'उन्मार्गप्रस्थितं' विरुद्धमार्गव्यवस्थितं विजानीयात् 'छद्मस्थः' केवलज्ञान-केवलदर्शनशून्यः ?, इति परप्रश्ने सति गुरुराह-'हे मुने' हे भिक्षो ! 'तत्' उन्मार्गप्रस्थिताचार्यचिह्नं 'मे' मम कथयतस्त्वं 'निसामय'त्ति शृणु=आकर्णय ॥९॥

**सच्छंदयारिं दुस्सीलं, आरंभेसु पवत्तयं ।**
**पीढयाइपडिबद्धं, आउक्कायविहिंसगं ॥१०॥**

**मूलुत्तरगुणब्भट्ठं, सामायारीविराहयं ।**
**अदिन्नालोयणं निच्चं, निच्चं विगहपरायणं ॥११॥**

स्वच्छन्दचारिणं दुःशीलमारम्भेषु प्रवर्तकम् ।
पीठकादिप्रतिबद्धं, अप्कायविहिंसकम् ॥१०॥

मूलोत्तरगुणभ्रष्टं, सामाचारीविराधकम् ।
अदत्तालोचनं नित्यं, नित्यं विकथापरायणम् ॥११॥

व्याख्या – स्वच्छन्देन=स्वाभिप्रायेण न तु जिनवचनेन चरति स्वपूजार्थं मुग्धकुमतिपातनार्थं च यः स स्वच्छन्दचारी तं स्वच्छन्दचारिणम्, दुष्टं=जिनगुर्वाज्ञा-भञ्जकत्वेन शीलम्=आचारः पञ्चाचारलक्षणो यस्य स दुःशीलस्तं दुःशीलम्, अथवा दुरिति कुत्सितः=परवञ्चनाऽनाचारसेवनादिलक्षणः शीलं=स्वभावो यस्य स दुःशीलस्तं दुःशीलं, 'आरंभेसु'त्ति बहुवचनात्संरम्भसमारम्भयोर्ग्रहणम्, तत्रारम्भः=पृथिव्यादि-जीवोपघातः १, संरम्भो=वधसङ्कल्पः २, समारम्भः=परितापः ३, तेषु प्रवर्त्तकम्, वर्षाकालं विनेति शेषः, पीठम्=आसनमुपवेशनार्थं, आदिशब्दात्पट्टिकादयस्तेषु प्रतिबद्धं=कारणं विना सेवनतत्परमित्यर्थः, आपो=जलमेव कायः=शरीरं यस्य सोऽप्कायः=अप्रासुकजलं तस्य विविधं=अनेकधा पदक्षालनपात्रक्षालनादिप्रकारेण हिंसकं=घातकं अप्कायविहिंसकम् ॥१०॥

चारित्रकल्पवृक्षस्य मूलकल्पा गुणाः=प्राणातिपातविरमणादयो मूलगुणाः, मूलगुणापेक्षया उत्तरभूता गुणाः=पिण्डविशुद्ध्यादयो वृक्षस्य शाखा इवोत्तरगुणा-स्तेभ्यो भ्रष्टं=सर्वथा [१]तत्राप्रवर्त्तकं, 'सामायारीविराहयं'ति त्रिधा सामाचारी – ओघनिर्युक्ति-जल्पितं सर्वमोघसामाचारी, सा च नवमपूर्वात्तृतीयाद्वस्तुन आचाराभिधानात् तत्रापि विंशतितमात् प्राभृतात् तत्राप्योघप्राभृतान्निर्व्यूढेति १, पदविभागसामाचारी जीतकल्प-निशीथादिच्छेदग्रन्थोक्ता, साऽपि नवमपूर्वादेव २, चक्रवालसामाचारी तु अभ्यर्थनैव तावत्साधूनां न कल्पते, कारणे तु यद्यभ्यर्थयेत् परं तत्रेच्छाकारः कार्यः, यद्वा तस्य कुर्वतः किञ्चित् कश्चिन्निर्जरार्थी ब्रूते, यथा-तव कार्यमहं विधास्ये, तत्रापी-च्छाकारो न बलात्कारः, दुर्विनीते बलात्कारोऽपि १, कल्पाकल्पे ज्ञाननिष्ठां प्राप्तस्य संयमतपोभ्यामाढ्यस्य गुरोर्निर्विकल्पं वाचनादौ यद्यूयं वदत तत्तथेति वाच्यं २, संयमयोगेऽन्यथाऽऽचरिते सति मिथ्याकारः ३, ज्ञानाद्यर्थमवश्यं गमने आवश्यिकी कार्या ४, वसतिचैत्यादौ प्रविशन्नैषेधिकीं कुर्यात् ५, कार्योत्पत्तौ गुरोरापृच्छनं ६, गुरुणा पूर्वनिषिद्धेनावश्यंकार्यत्वात्प्रतिपृच्छा, पूर्वनिरूपितेन वा करणकाले पुनः प्रतिपृच्छा ७, पूर्वगृहीतेनाशनादिना छन्दनम्=आह्वानं साधूनां कार्यम् ८, अटनार्थं गच्छता निमन्त्रणं ९, ज्ञानाद्यर्थमन्यगुरोराश्रयणमुपसंपत् १०-३ । अन्या वा निशीथोक्ता

---

१. 'तत्रापव०' इति पूर्वमुद्रिते, अत्र A-B-C प्रतपाठः ।

दशधा सामाचारी, यथा प्रातःप्रभृति क्रमशः प्रतिलेखना उपधेः १, ततः प्रमार्जना वसतेः २, भिक्षा कार्या ३, आगतैरीर्या प्रतिक्रम्या ४, आलोचनं कार्यं गृहानीतानां ५, 'असुरसुरं'ति भोक्तव्यं ६, कल्पत्रयेण पात्रकाणां धावनं कार्यं ७, विचारः= संज्ञोत्सर्गार्थं बहिर्यानं ८, स्थण्डिलानि 'बारस २ तिन्नि य'त्ति २७ कार्याणि ९, प्रतिक्रमणं कार्यं १० इत्यादि, विशेषतस्तु पञ्चवस्तुकद्वितीयद्वारे ज्ञेया, तस्या विराधको=भञ्जकस्तं सामाचारीविराधकम्, नित्यं=यावज्जीवमित्यर्थः, दत्ता=अर्पिता आलोचना=स्वपापप्रकाशनरूपा येन स दत्तालोचनो न दत्तालोचनः अदत्तालोचन-स्तमदत्तालोचनं=स्वपापाप्रकाशकमित्यर्थः, महानिशीथोक्तरूपीसाध्वीवत्, आलोचना-ग्रहणं किञ्चिद् यथा – प्रथमं स्वकीयाचार्यपार्श्वे आलोचयितव्यं १ तदभावे स्वोपाध्याये २ तदभावे स्वप्रवर्त्तके ३ तदभावे स्वस्थविरे ४ तदभावे गणावच्छेदिनि ५, अथ स्वगच्छे पञ्चानामप्यभावे परगच्छे सांभोगिके आचार्यादिक्रमेणालोचयितव्यं, सांभोगिके गच्छे पञ्चानामप्यभावे संविग्नेऽसांभोगिके पञ्चाचार्यादिक्रमेणालोचयितव्यं, संविग्नासाम्भोगिकानामप्यभावे गीतार्थपार्श्वस्थसमीपे तदभावे सारूपिके=संयतवेष-गृहस्थे तदभावे गीतार्थपश्चात्कृते=त्यक्तचारित्रवेषगृहस्थे तदभावे सम्यक्त्वभावित-देवतायां, यतो देवता महाविदेहादौ जिनानापृच्छ्य कथयत्यतः, तदभावे जिनप्रतिमा-पुरतः, तदभावे पूर्वाद्यभिमुखोऽर्हतः सिद्धानभिसमीक्ष्य जानन् प्रायश्चित्तविधिं स्वयमेव प्रायश्चित्तं प्रतिपद्यते, एवं प्रतिपद्यमानः शुद्ध एवेति, तथा नित्यं=सदा सर्वत्र विरुद्धा कथा विकथा, तत्र स्त्रीकथा १ भक्तकथा २ देशकथा ३ राजकथा ४ मृदुकारुणिकाकथा ५ दर्शनभेदिनीकथा ६ चारित्रभेदिनीकथा ७ रूपा सप्तधा, आद्याश्चतस्रः कण्ठ्याः, श्रोतृहृदयमार्दवजननान्मृद्वी सा चासौ पुत्रादिप्रलापप्रधानत्वा-त्कारुण्यवती मृदुकारुणिका, यथा –

"हा पुत्त ! २ हा वच्छ ! २ मुक्काऽसि कहमणाहाऽहं ।
एवं कलुणपलावा जलंतजलणेऽज्ज सा पडिया ॥१॥" [ ]

दर्शनभेदिनी ज्ञानाद्यतिशयतः कुतीर्थिकनिह्नवप्रशंसारूपा ६, यस्यां कथायां कथ्यमानायां कृतचारित्रमनसः प्रतिपन्नव्रतस्य वा चारित्रं प्रति भेदो भवति ७, अथवा विविधरूपा परपरिवादादिलक्षणा कथा विकथा तस्यां 'परायणं'ति=भृशं

तत्परमित्यर्थः, भुवनभानुकेवलिपूर्वभवरोहिणीश्राविकावत् । यद्वा कथा चतुर्धा यथा – आक्षिप्यते=मोहात्तत्त्वं प्रत्याकृष्यते श्रोता यया साऽऽक्षेपणी १, विक्षिप्यते=कुमार्गविमुखो विधीयते श्रोता यया सा विक्षेपणी २, संवेद्यते=मोक्षसुखाभिलाषी विधीयते यया सा संवेदनी ३, निर्वेद्यते=संसारनिर्विण्णो विधीयते यया सा निर्वेदिनी ४, तद्विपरीता विकथा तस्यां तत्परस्तं, हे सौम्य ! एवंविधं सूरिमुन्मार्गगामिनं जानीहीति ॥११॥

पूर्वं दोषवतामदत्तालोचनानां दोषवत्त्वमुक्तम्, अथ किं गुणवतामालोचना-स्वरूपवेत्तॄणां सा गृहीता विलोक्यते न वा ? इत्याह –

छत्तीसगुणसमण्णागएण तेणवि अवस्स कायव्वा[१] ।
परसक्खिया विसोही, सुट्ठुवि ववहारकुसलेण ॥१२॥

षट्त्रिंशद्गुणसमन्वागतेन तेनापि अवश्यं कर्तव्या ।
परसाक्षिका विशोधिः सुष्ट्वपि व्यवहारकुशलेन ॥१२॥

व्याख्या – देशकुलादयः षट्त्रिंशद्गुणा यथा-आर्यदेशोत्पन्नः सुखावबोधवाक्यः स्यात् १, पैतृकं कुलं, सुकुलोद्भवो यथोत्क्षिप्तभारोद्वहने न श्राम्यति २, मातृकी जातिस्तत्संपन्नो विनयान्वितः स्यात् ३, रूपवान् आदेयवाक्यः स्याद्, आकृतौ गुणा वसन्तीति ४, संहननयुतो व्याख्यानादिषु न श्राम्यति ५, धृतिः=चित्तावष्टम्भस्तद्युतो गहनेष्वप्यर्थेषु न भ्रमं याति ६, अनाशंसी=न श्रोतृभ्यो वस्त्राद्याकाङ्क्षते ७, अविकत्थनो=न बहुभाषी स्यात् ८, अमायी=शाठ्यत्यक्तः ९, स्थिरपरिपाटिः, तस्य हि सूत्रमर्थश्च न गलति १०, गृहीतवाक्यः=अप्रतिघातवचनः स्यात् ११, जितपर्षत्=परप्रवादिक्षोभ्यो न स्यात् १२, जितनिद्रः=अल्पनिद्रः १३, मध्यस्थः=सर्वशिष्येषु समचित्तः १४, देश १५ काल १६ भाव १७ ज्ञः सुखेन विहरति १७ आसन्न-लब्धप्रतिभः=परतीर्थिकादीनामुत्तरदाने समर्थः १८, नानाविधदेशभाषाज्ञो नानादेशज-विनेयान् सुखेन शास्त्राणि ग्राहयति १९, पञ्चविधाचारयुतः श्रद्धेयवचनः स्यात् २४, सूत्रार्थोभयज्ञः सम्यगुत्सर्गापवादप्ररूपकः स्यात् २५, आहरणं=दृष्टान्तः २६, हेतुर्द्विधा-कारको ज्ञापकश्च, तत्र कारको यथा घटस्य कर्त्ता कुम्भकारः, ज्ञापको यथा तमसि

---

१. 'दायव्वा' A-B-C-D-E-F-G-H, अत्र श्रीवानर्षिगणिविरचितवृत्त्याः हस्तादर्शानुसारेण 'कायव्वा' इति ।

घटादीनामभिव्यञ्जकः प्रदीपः २७, उपनयः=उपसंहारो दृष्टान्तदृष्टस्यार्थस्य प्रकृते योजनमिति भावः, क्वचित् कारणं=निमित्तं २८, नयाः=नैगमादयस्तेषु निपुणः २९, स हि श्रोतारमपेक्ष्य तत्प्रतिपत्त्यनुरोधतः क्वचिद् दृष्टान्तोपन्यासं २६ क्वचिद्धेतूपन्यासं २७ क्वचिदधिकृतमर्थमुपसंहरति २८, नयप्रस्तावे नयानवतारयति २९, ग्राहणाकुशलः=प्रतिपादनशक्तियुक्तः ३०, स्वसमयं परसमयं वेत्ति, परेणाक्षिप्त उभयं निर्वाहयति ३१, ३२, गम्भीरः=अतुच्छस्वभावः ३३, दीप्तिमान्=परवादिनामक्षोभ्यः ३४, शिवो=मारिरोगाद्युपद्रवविघातकृत् ३५, सौम्यः=शान्तदृष्टितया प्रीत्युत्पादकः ३६, तैः समन्वागतेन=संयुक्तेन तेनापि, अन्य आस्ताम्, अवश्यं=निश्चयेन कर्त्तव्या, का ?-परेषामाचार्याणां साक्षिकी परसाक्षिकी विशेषेण=निर्मायत्वेन शुद्धिः= दोषमलकर्षणं विशुद्धिः=आलोचनेत्यर्थः, पुनः किंविशिष्टेन तेन ?-सुष्ठ्वपि ज्ञानक्रियाव्यवहारकुशलेन=सुविहितेनेति, यद्वा सुष्ठ्वपि व्यवहारेषु पञ्चप्रकारेषु आगम १ श्रुता २ ऽऽज्ञा ३ धारणा ४ जीतलक्षणेषु ५ कुशलो=निपुणस्तेन, तत्राऽऽगम्यन्ते= परिच्छिद्यन्ते पदार्था अनेनेत्यागमः, स च केवलिमनःपर्यायज्ञान्यवधिज्ञानिचतुर्दशपूर्विदशपूर्विनवपूर्विणां भवति, तत्र यदि केवली प्राप्यते तदा तस्यैवालोचना दीयते तदभावे परेषाम् १, निशीथकल्पव्यवहारदशाश्रुतस्कन्धप्रमुखं सर्वमपि श्रुतव्यवहारः २, देशान्तरस्थिते गुरौ शिष्यो गूढपदानि लिखित्वा प्रेषयति तदाऽसौ आज्ञारूपव्यवहारः, यद्वा देशान्तरस्थितयोर्द्वयोर्गीतार्थयोर्गूढपदैरालोचना=जातातीचारनिवेदनमाज्ञाव्यवहारः, कोऽर्थः ?-यदा द्वावप्याचार्यावासेवितसूत्रार्थतयाऽतिगीतार्थौ क्षीणजङ्घाबलौ विहारक्रमानुरोधतो दूरदेशान्तरव्यवस्थितावत एव परस्परस्य समीपे गन्तुमसमर्थावभूतां तदाऽन्यतरः प्रायश्चित्ते समापतिते सति तथाविधयोग्यगीतार्थशिष्याभावे सति धारणाकुशलमगीतार्थमपि शिष्यं समयभाषया गूढार्थान्यतीचाराऽऽसेवनपदानि कथयित्वा प्रेषयति, तेन च गत्वा गूढपदेषु कथितेषु स आचार्यो द्रव्यक्षेत्रकालभावसंहननधृतिबलादिकं परिभाव्य स्वयं तत्राऽऽगमनं करोति, शिष्यं वा तथाविधं योग्यं गीतार्थं प्रज्ञाप्य प्रेषयति, तदभावे तस्यैव प्रेषितस्य गूढार्थामतिचारशुद्धिं कथयतीति ३, इह केनचिद्गीतार्थसंविग्नेन गुरुणा कस्यापि शिष्यस्य क्वचिदपराधे या शुद्धिः प्रदत्ता तां तथैवावधार्य सोऽपि शिष्यस्तथैवापराधे

प्रयुङ्क्ते तदाऽसौ धारणाव्यवहारः, उद्धृतपदधरणरूपा वा, कश्चित् साधुर्गच्छोपकारी अप्यशेषच्छेदग्रन्थयोग्यो न भवति गुरुस्तस्योद्धृतपदानि ददाति, तेषां पदानां धरणं धारणाव्यवहारः ४, द्रव्यादि विचिन्त्य संहननादीनां हानिं ज्ञात्वा चोचितेन केनचित्तपःप्रकारेण यां गीतार्थाः शुद्धिं दिशन्ति तत्समयभाषया जीतमुच्यते, यद्वा यत्प्रायश्चित्तं यस्याचार्यस्य गच्छे सूत्रातिरिक्तं कारणतः प्रवर्त्तितं अन्यैश्च बहुभिरनु- वर्त्तितं तत्तत्र रूढं जीतमुच्यते, तदेवमेतेषां पञ्चानां व्यवहाराणामन्यतरेणापि व्यवहारेण युक्त एव प्रायश्चित्तप्रदाने गीतार्थो गुरुरधिक्रियते न चागीतार्थः, अनेकदोषसम्भवा- दिति, अपिशब्दादनेकभव्यानां विधिना दत्तालोचनस्तेनापीति ॥१२॥

अथालोचनायां दृष्टान्तमाह –

जह सुकुसलोऽवि विज्जो, अण्णस्स कहेइ अत्तणो वाहिं।
विज्जुवएसं[1] सुच्चा, पच्छा सो कम्ममायरइ ॥१३॥

यथा सुकुशलोऽपि वैद्योऽन्यस्य कथयति आत्मनो व्याधिम् ।
वैद्योपदेशं श्रुत्वा, पश्चात् स कर्म आचरति ॥१३॥

व्याख्या – यथा सुष्ठु कुशलोऽपि=भिषक्शास्त्रे निपुणोऽपि, अपिशब्दाद्वयः- प्राप्तोऽपि, 'वैद्यः' चिकित्साकर्त्ता 'आत्मनः' स्वस्य 'व्याधिं' रोगोत्पत्तिं 'अन्यस्य' परवैद्यस्य 'कथयति' यथास्थितं निरूपयति, 'वैद्योपदेशं' वैद्यनिरूपितं 'श्रुत्वा' आकर्ण्य 'पश्चात्' परवैद्यकथनानन्तरं सः=वैद्यस्तद्वैद्योक्तं 'कर्म्म' प्रतीकाररूपं 'आचरति' करोतीत्यर्थः, एवमालोचनास्वरूपज्ञाता आलोचकोऽपि सद्गुरूक्तं तपो यथाऽर्पितं करोतीति ॥१३॥

अथाचार्यकृत्यं किञ्चिदाह –

देसं खित्तं[2] तु जाणित्ता, वत्थं पत्तं उवस्सयं ।
संगहे साहुवग्गं च, सुत्तत्थं च निहालई[3] ॥१४॥

---

१. 'विज्जोवएस सोच्चा' F-प्रते ।

२. 'खेत्तं' D-E-F-G-H, अत्र B-C-प्रतपाठः, 'खित्त' A-प्रते ।

३. 'निहालिउं' F-G ।

देशं क्षेत्रं तु ज्ञात्वा वस्त्रं पात्रं उपाश्रयं ।
संगृह्णीत साधुवर्गं च, सूत्रार्थं च निभालयति ॥१४॥

व्याख्या – 'देशं' **मालवकादिकं** 'क्षेत्रं' **रूक्षारूक्षभाविताभावितादिरूपं तुशब्दाद् गुरुग्लानबालवृद्धप्राघूर्णादियोग्यं द्रव्यं दुर्भिक्षादिकालं च ज्ञात्वा** 'वस्त्रं' **आचाराङ्गाद्युक्तविधिना चीवरं** 'पात्रं' **पतद्ग्रहादिकं** 'उपाश्रयं' **स्त्रीपशुपण्डकवर्जितमुनियोग्यालयं संगृह्णीत, तथा चोक्तं** स्थानाङ्गसप्तमस्थानके – **आचार्योऽनुत्पन्नान्युपकरणानि सम्यगुत्पादयिता भवति, पूर्वोत्पन्नान्युपकरणानि सम्यक् संरक्षयिता उपायेन चौरादिभ्यः संगोपयिता अल्पसागरिककरणेन मलिनतारक्षणेन चेति,** [स्था० ७/५४४] **तथा साधूनां वर्गो=वृन्दं साधुवर्गस्तं, चशब्दात्साध्वीवर्गं च, न तु हीनाचारवर्गं, तथा सूत्रं=गणधरादिबद्धं तस्यार्थो=निर्युक्तिभाष्यचूर्णिसङ्ग्रहणिवृत्तिटिप्पनादिरूपः सूत्रं चार्थश्च** सूत्रार्थं 'निभालयति' **जिनोपदेशेन चिन्तयतीत्यर्थः, चशब्दात्सुविनीतविनेयवर्गं जिनगणधराज्ञया पाठयति, अविनीतविनेयं प्रति नार्पयति, प्रायश्चित्तापत्तेः, एवंविध आचार्यो मोक्षमार्गवाहकः कथितः ॥१४॥**

**अथ मोक्षमार्गभञ्जकः कथ्यते –**

**संगहोवग्गहं विहिणा, न करेइ अ जो गणी ।**
**समणं समणिं तु दिक्खित्ता, सामायारिं न गाहए ॥१५॥**

**बालाणं जो उ सीसाणं, जीहाए उवलिंपए ।**
**न सम्ममग्गं गाहेइ, सो सूरी जाण वेरिओ ॥१६॥**

संग्रहोपग्रहं विधिना, न करोति च यो गणी ।
श्रमणं श्रमणीं तु दीक्षित्वा, सामाचारीं न ग्राहयेत् ॥१५॥

बालानां यः पुनः शिष्याणां, जिह्वया उपलिम्पेत् ।
न सम्यग् मार्गं ग्राहयति, स सूरिर्जानीहि वैरी ॥१६॥

व्याख्या – सङ्ग्रहं=**ज्ञानादीनां सच्छिष्याणां वा सङ्ग्रहणं,** उपग्रहं **च=तेषामेव भक्तश्रुतादिदानेनोपष्टम्भनं** 'विधिना' **उत्सर्गापवादप्रकारेण** न करोति **स्वयं प्रमादमदिराग्रस्तत्वेन, चशब्दान्न कारयति कुर्वन्तमन्यं द्वेषयति यः कश्चित्** 'गणी' **आचार्याभासः,**

तथा श्रमणं च श्रमणीं 'दीक्षित्वा' व्रतारोपं विधाय 'सामाचारीं' 'जयं चरे जयं चिट्ठे' [दशवै० अ.४/श्लो.८] इत्यादिरूपां सत्स्वगच्छोक्तां वा 'न ग्राहयेत्' निर्जरापेक्षी सन्न शिक्षयतीत्यर्थः, तुशब्दात्सुविनीतप्रतीच्छकगणमपि न सूत्रार्थं ददाति सोऽयोग्य इति ॥१५॥

'बालानां' प्रश्नव्याकरणोक्तानां यो=गणी 'शिष्याणां' अन्तेवासिनां, तुशब्दान्महत्तरा स्वशिष्यणीनां, 'जिह्वया' रसनया उपलिम्पेत् गौरिव वत्सं, भावार्थोऽयम्—अत्यन्तबाह्य-हितकोमलामन्त्रणचुम्बनादिप्रकारान् करोतीत्यर्थः, 'सम्यग्मार्गं' मोक्षपथं 'न ग्राहयति' न दर्शयति, न शिक्षयतीत्यर्थः, उपलक्षणाच्छिक्षयन्तमन्यं निवारयति स आचार्यो= गणाधीशो 'वैरी' रिपुरिति त्वं जानीहि, अथवाऽऽर्षत्वाद्विभक्तिपरिणामः, तमाचार्यं वैरिणं जानीहि त्वमिति ॥१६॥

अथासद्गुरु-सद्गुर्वोः किञ्चित्स्वरूपं दर्शयति –

जीहाए विलिहंतो, न भद्दओ सारणा जहिं नत्थि ।
दंडेण वि ताडंतो, स भद्दओ सारणा जत्थ ॥१७॥

जिह्वया विलिहन् न भद्रकः सारणा यत्र नास्ति ।
दण्डेनापि ताडयन् स भद्रकः सारणा यत्र ॥१७॥

व्याख्या – 'जिह्वया विलिहन्' बाह्यहितं कुर्वन्नाचार्यो 'न भद्रो' न कल्याणकृत् यत्र=गणिनि-गुरौ 'सारणा' हिते प्रवर्त्तनलक्षणा कृत्यस्मारणलक्षणा वा, उपलक्षणत्वाद् वारणा=अहितान्निवारणलक्षणा चोयणा=संयमयोगेषु स्खलितः सन् 'अयुक्तमेतद्भवादृशां विधातुम्' इत्यादिवचनेन प्रेरणा, प्रतिचोदना=तथैव पुनः पुनः प्रेरणा 'नास्ति' न विद्यते, तथा दण्डेनापि=यष्ट्यापि, अपिशब्दाद्दवरकादिना 'ताडयन्' शरीरे पीडां कुर्वन् स=आचार्यो 'भद्रः' कल्याणकृत् यतो यत्र सारणादि विद्यत इति ॥१७॥

अथ विनेयनिर्गुणत्वमाह –

सीसोवि वेरिओ सो उ, जो गुरुं नवि बोहए ।
पमायमइराघत्थं[1], सामायारीविराहयं ॥१८॥

---

१. '०मयरा०' F-प्रते ।

शिष्योऽपि वैरी स तु यो गुरुं न विबोधयति ।
प्रमादमदिराग्रस्तं, सामाचारीविराधकम् ॥१८॥

व्याख्या – 'शिष्योऽपि' **स्वहस्तदीक्षितोऽपि** 'वैरी' **शत्रुः स यो** 'गुरुं' **धर्मोपदेशकं** 'न बोधयति' **हितोपदेशं न ददाति, तुशब्दाद्धितोपदेशं दत्त्वा सन्मार्गे न स्थापयति, किम्भूतम् ?-प्रमादो=निद्राविकथादिरूपः स एव मदिरा=वारुणी** प्रमादमदिरा **तया** ग्रस्तम्=**आच्छादितं तत्त्वज्ञानमित्यर्थः**, सामाचारीविराधकम्, **षष्ठाङ्गोक्तशेलकाचार्यवत् येन चातुर्मासिकमपि न ज्ञातमिति ॥१८॥**

**अथ कथं प्रमादिनं गुरुं बोधयति ? इत्याह –**

**तुम्हारिसावि मुणिवर !, पमायवसगा हवंति जइ पुरिसा ।**
**[1]तेणऽन्नो को अम्हं, आलंबण हुज्ज संसारे ? ॥१९॥**

युष्मादृशा अपि मुनिवर ! प्रमादवशगा भवन्ति यदि पुरुषाः ।
तेनान्यः कोऽस्माकमालम्बनं भविष्यति संसारे ? ॥१९॥

व्याख्या – युष्मादृशा अपि **हे** 'मुनिवर !' **श्रमणश्रेष्ठ** 'प्रमादवशगाः' **प्रमादपरवशा भवन्ति** 'यदि' **चेत्** 'पुरुषाः' **पुमांसः** तेन **कारणेन** 'अन्यः' **पूज्यव्यतिरिक्तः कः** 'अस्माकं' **मन्दभाग्यानामकृतपुण्यानां प्रमादपरवशानां भवच्चरणारविन्दचञ्चरीकाणां त्यक्तपुत्रगृहगृहिणीनां** आलम्बनं **सागरे नौरिव** भविष्यति **भयङ्करे पीडाकरे शोकभरे दुःखाकरे अपारसंसारे चतुर्गत्यात्मके पततामिति ॥१९॥**

**नाणंमि दंसणंमि य, चरणंमि य तिसु [2]विं समयसारेसु ।**
**चोएइ जो ठवेउं, गणमप्पाणं च सो अ गणी ॥२०॥**

ज्ञाने दर्शने च चरणे च त्रिष्वपि समयसारेषु ।
नोदयति यः स्थापयितुं, गणमात्मानं च स च गणी ॥२०॥

व्याख्या – 'ज्ञाने' **अष्टविधज्ञानाचारे** 'दर्शने' **अष्टविधदर्शनाचारे च** 'चरणे' **अष्टविधचारित्राचारे च** त्रिष्वपि समयसारेषु, **चशब्दात्तपआचारे वीर्याचारे च,**

---

१. 'तो को अन्नो' **A-D-E-F-H**, अत्र पुनः **B-C-G**-प्रतपाठः ।
२. 'तिसु य' **F**-प्रते ।

'चोएइ'त्ति प्रेरयति यो 'गणी' सूरिः, किं कर्त्तुं ?-स्थापयितुं, कम् ?-'गणं' कुल-समुदायरूपं 'आत्मानं च' स्वयं च, चशब्दात् श्रोतृवर्गं च, स च 'गणी' आचार्यः कथितो गणधरादिभिः ॥२०॥

पिंडं उवहिं सिज्जं, उग्गमउप्पायणेसणासुद्धं ।
चारित्तरक्खणट्ठा, सोहिंतो होइ सचरित्ती ॥२१॥

पिण्डमुपधिं शय्यां, उद्गमोत्पादनैषणाशुद्धम् ।
चारित्ररक्षणार्थं, शोधयन् भवति सचारित्री ॥२१॥

व्याख्या – 'पिण्डं' चतुर्विधाहारलक्षणं 'उपधिं' औघिकौपग्रहिकलक्षणं, तत्रौघिकस्त्रिधा-मुखवस्त्रिका १ पात्रकेशरिका २ गुच्छकः ३ पात्रप्रस्थापनं ४ चेति चतुर्विधो जघन्यः, पटलानि १ रजस्त्राणं २ पात्रबन्धः ३ चोलपट्टः ४ मात्रकं ५ रजोहरणं ६ चेति षड्विधो मध्यमः, पतद्ग्रहः १ कल्पत्रयं ४ चेति चतुर्विध उत्कृष्टः । औपग्रहिकोपधिरपि दण्डासनक १ दण्डक २ पुस्तका ३ ऽऽदिभेदेन त्रिधा स्यात्, विशेषतो जीतकल्पटीकादिभ्यो ज्ञेयमुपधिस्वरूपमिति, 'शय्यां' आचाराङ्गोक्त-वसतिलक्षणां, एतत्त्रयमुद्गमोत्पादनैषणादोषशुद्धं, तत्रोद्गमः=पिण्डस्योत्पत्तिः तद्विषया आधाकर्मिकादयः षोडश दोषा उद्गमदोषाः, एते च प्रायेण गृहिभ्यः समुत्पद्यन्ते, प्रायेणेत्युक्ते स्वद्रव्यक्रीत-स्वभावक्रीत-लोकोत्तरप्रामित्य-लोकोत्तरपरिवर्त्तितरूपदोषाः साधुनाऽपि क्रियमाणा अवसेया इति १६, उत्पादना=मूलतः शुद्धस्यापि पिण्डस्य धात्रीत्वादिभिरुपार्जनं तद्विषयाः षोडश दोषाः, साधुसमुत्थाः ते उत्पादनादोषाः, साधुनैव तेषां विधीयमानत्वात् १६, एषणाशङ्कितादिभिरन्वेषणं तद्विषया गृहिसाधुजन्या दश दोषाः एषणादोषाः, शङ्कितदोषस्य साधुभावापरिणतदोषस्य च साधुजन्यत्वात् शेषाणां च गृहिप्रभवत्वादिति, 'चारित्ररक्षार्थं' संयमपरिपालनार्थं 'शोधयन्' विशुद्ध-पिण्डग्रहणार्थमवलोकयन् तदप्राप्तौ गुरुलघुदोषानन्वेषयंश्च भवति 'सचारित्री' चारित्रवानित्यर्थः ।

गुरुलघुदोषस्वरूपं यथा तत्र सर्वगुरु मूलकर्म, तत्र मूलं १८०, एतस्माच्चाधा-कर्मकं कर्मौद्देशिकचरमत्रिकं मिश्रान्त्यद्विकं बादरप्राभृतिका सप्रत्यपायाभ्याहृतं

लोभपिण्डः अनन्तकायाव्यवहितनिक्षिप्तपिहितसंहृतमिश्रापरिणतच्छर्दितानि संयोजना साङ्गारं वर्त्तमानभविष्यन्निमित्तं चेति लघवो दोषाः, मूलप्रायश्चित्ताच्चतुर्थतपोवत् १ ।

तेभ्यः कर्मौद्देशिकाद्यभेदः मिश्रप्रथमभेदः धात्रीत्वं दूतीत्वं अतीतनिमित्तं आजीवनापिण्डः वनीपकत्वं बादरचिकित्साकरणं क्रोधमानपिण्डौ संबन्धिसंस्तवकरणं विद्यायोगचूर्णपिण्डाः प्रकाशकरणं द्विविधं द्रव्यक्रीतं आत्मभावक्रीतं लौकिक-प्रामित्यपरावर्त्तिते निष्प्रत्यपायपरग्रामाभ्याहृतं पिहितोद्भिन्नं कपाटोद्भिन्नं उत्कृष्टमाला-पहृतं सर्वमाच्छेद्यं सर्वमनिसृष्टं पुरःकर्म्म पश्चात्कर्म गर्हितम्रक्षितं संसक्तम्रक्षितं प्रत्येकाव्यवहितनिक्षिप्तपिहितसंहृतमिश्रापरिणतच्छर्दितानि प्रमाणोल्लङ्घनं सधूमं अकारणभोजनं चेति लघवो दोषाः, चतुर्थादाचाम्लमिव २ ।

एतेभ्योऽप्यध्यवपूरकान्त्यभेदद्वयं कृतभेदचतुष्टयं भक्तपानपूतिकं मायापिण्डः अनन्तकायव्यवहितनिक्षिप्तपिहितादीनि मिश्रानन्ताव्यवहितनिक्षिप्तानि चेति लघवः, आचाम्लादेकभक्तमिव ३ ।

एतेभ्योऽप्योघौद्देशिकमुद्दिष्टभेदचतुष्टयमुपकरणपूतिकं चिरस्थापितं प्रकटकरणं लोकोत्तरं परावर्त्तितं प्रामित्यं च परभावक्रीतं स्वग्रामाभ्याहृतं दर्दरोद्भिन्नं जघन्य-मालापहृतं प्रथमाध्यवपूरकः सूक्ष्मचिकित्सा गुणसंस्तवकरणं मिश्रकर्दमेन लवण-सेटिकादिना च म्रक्षितं पिष्टादिम्रक्षितं किञ्चिद्दायकदुष्टं प्रत्येकपरम्परस्थापितादीनि मिश्रानन्तरस्थापितादीनि चेति लघवः, एकभक्तात्पुरिमार्द्धमिव ४ ।

एतेभ्योऽपि त्वित्वरस्थापितं सूक्ष्मप्राभृतिका सस्निग्धसरजस्कम्रक्षितं प्रत्येकमिश्रं परम्परस्थापितादीनि चेति लघवः, पुरिमार्द्धान्निर्विकृतिकमिवेति ५ । विशेषस्तु छेदग्रन्थादवसेय इति ॥२१॥

अपरिस्साविं सम्मं, समपासी चेव होइ कज्जेसु ।
सो रक्खइ चक्खुं पिव, सबाल-वुड्ढाउलं गच्छं ॥२२॥

अपरिश्रावी सम्यक्, समदर्शी चैव भवति कार्येषु ।
स रक्षति चक्षुरिव, सबालवृद्धाकुलं गच्छम् ॥२२॥

व्याख्या – न परिश्रवति=न परिगलतीति अपरिश्रावी, आचाराङ्गोक्त-तृतीयभङ्ग(ह्रद)तुल्य इत्यर्थः, तद्यथा-एको ह्रदः परिगलच्छ्रोताः पर्यागलच्छ्रोताश्च, शीताशीतोदाप्रवाहह्रदवत्, यतस्तत्र जलं निर्गच्छत्यागच्छति च १, अपरस्तु परिगलच्छ्रोताः नो पर्यागलच्छ्रोताः पद्मह्रदवत्, पद्मह्रदे तु जलं निर्गच्छति न त्वागच्छति २, तथा परो नो परिगलत्श्रोताः पर्यागलत्श्रोताश्च, लवणोदधिवत्, लवणे आगच्छति जलं न तु निर्गच्छति ३, अपरस्तु नो परिगलत्श्रोता नो पर्यागल-त्श्रोताश्च, मनुष्यलोकाद्बहिः समुद्रवत्, तत्र नागच्छति न च निर्गच्छति ४ ।

तत्राचार्यः श्रुतमङ्गीकृत्य प्रथमभङ्गपतितः, श्रुतस्य दानग्रहणसद्भावात् १, साम्परायिककर्मापेक्षया तु द्वितीयभङ्गपतितः, कषायोदयाभावेन ग्रहणाभावः कायोत्सर्गादिना क्षपणापत्तेश्च, साम्परायिककर्म्म तु कषायकर्म्म २, आलोचना-मङ्गीकृत्य तृतीयभङ्गपतितः, आलोचनायाः अप्रतिश्रावित्वात् ३, कुमार्गं प्रति चतुर्थभङ्गपतितः, कुमार्गस्य हि प्रवेशनिर्गमाभावात् ४ ।

यद्वा केवलं श्रुतमाश्रित्य धर्मभेदेन भङ्गा योज्यन्ते, तत्र स्थविरकल्पिकाचार्याः प्रथमभङ्गपतिताः १, द्वितीयभङ्गपतितास्तु तीर्थकृतः २, तृतीयभङ्गकास्त्वाहालन्दिकाः, तेषां च क्वचिदर्थापरिसमाप्तावाचार्यादेर्निर्णयसद्भावात् ३, प्रत्येकबुद्धास्तूभयाभावा-च्चतुर्थभङ्गस्थाः ४, कथम् ?, सम्यक्=सर्वप्रकारेण, तथा समा=अविपरीता पासीति=दृष्टिर्दर्शनमवलोकनं यस्यासौ समदृष्टिर्भवति, क्व ? - 'सर्वकार्येषु' आगम-व्याख्यानादिसकलव्यापारेष्वित्यर्थः, 'सः' पूर्वोक्त आचार्यः 'रक्षति' धत्ते कुमार्गे पतितमिति शेषः, कम् ? - 'गच्छं' गणं, किंभूतम् ? - सबालाश्च ते वृद्धाश्च सबालवृद्धास्तैराकुलः=सङ्कीर्णस्तं सबालवृद्धाकुलम्, किमिव ? चक्षुरिव, यथा चक्षुर्गर्त्तादौ पतन्तं जन्तुगणं धत्ते तथाऽयमिति ॥२२॥

अथाधमाचार्यस्वरूपं गाथाद्वयेनाह-

सीयावेइ विहारं, सुहसीलगुणेहिं जो अबुद्धीओ ।
सो नवरि लिंगधारी, संजम[1]जोएण निस्सारो ॥२३॥

---

१. 'संजमसारेण नि०' E-F-प्रतपाठः

**कुल-गाम-नगर-रज्जं, पयहिय जो तेसु कुणइ हु[1] ममत्तं ।**
**सो नवरि लिंगधारी, संजम[2]जोएण [3]निस्सारो ॥२४॥**

सीदयति विहारं सुखशीलगुणैर्योऽबुद्धिकः ।
स नवरि लिङ्गधारी संयमयोगेन निस्सारः ॥२३॥

कुलग्रामनगरराज्यं प्रहाय यस्तेषु करोति हु ममत्वम् ।
स नवरि लिङ्गधारी, संयमयोगेन निस्सारः ॥२४॥

व्याख्या – 'सीयावेइ'**त्ति शिथिलत्वं प्रापयति, मुनीनामिति शेषः, कं प्रति ?-** विहारं **प्रति, अथवा 'सीयावेइ'त्ति स्वयमलसो भवति, क्व ? - विहारे, अत्र "सप्तम्या द्वितीये"ति प्राकृतसूत्रेण सप्तम्यर्थे द्वितीयेति, अत्र विहारस्वरूपं** बृहत्कल्पादिभ्यो **यथा-साधूनां ग्रामनगरराजधान्यादिषु वृत्तिप्राकारपरिक्षेपयुक्तेषु बहिर्गृहपद्धतिरहितेषु एकं मासं यावद्वस्तुं कल्पते कारणं विना हेमन्तग्रीष्मयोः, कारणे तु पाटकपरावर्त्तनं क्रियते, तदभावे गृहपरावर्त्तनं, तदभावे वसतावेव स्थानपरावर्त्तनं, न त्वेकस्थान-वसनमिति, ग्रामादिषु वृत्तिप्राकारपरिक्षेपयुक्तेषु बहिर्गृहपद्धतियुक्तेषु मासद्वयं यावद्वस्तुं कल्पते हेमन्तग्रीष्मयोः, मासमेकमन्तः बहिरेकं च, यत्रैव वसति तत्रैव भिक्षाचर्या भवति, एवं साध्वीनामपि, नवरं यत्र साधूनां मासकल्पस्तत्र साध्वीनां मासद्वयं यावद्वस्तुं कल्पते** [बृह० ३/१-६] ।

**तथा** सुखशीलस्य**=सातभिलाषिणो** गुणाः**=पार्श्वस्थादिस्थानानि सुखशील-गुणास्तैर्यः** 'अबुद्धीओ'**त्ति तत्त्वज्ञानरहितः, यद्वा** 'सुहसीलगुणेहिं'**ति, इत्यत्र सप्तम्यर्थे तृतीया, सुखं च=उपशमसन्तोषलक्षणं शीलं च=मूलगुणलक्षणं गुणाश्च=उत्तर-गुणरूपास्तेषु यः, न विद्यते बुद्धिः=अन्तःकरणभावरूपा यस्यासौ अबुद्धिः अबुद्धि-रेवाबुद्धिकः भावशून्य इत्यर्थः, यद्वा सुखे=मोक्षलक्षणे शीलं=स्वभावो येषां ते सुखशीलाः=जिनास्तेषां गुणाः केवलज्ञानकेवलदर्शनादिरूपास्तेषु यः 'अबुद्धीओ'त्ति अत्र नञ् कुत्सार्थे कुत्सिता=विरुद्धप्ररूपणरूपा बुद्धिः=मतिर्यस्यासौ अबुद्धिकः, 'स' पूर्वोक्तः 'नवरं' केवलं लिङ्गं=साधुनेपथ्यरूपं धरतीत्येवंशीलो** लिङ्गधारी,

---

१. 'अ' D-प्रते । २. 'संजमसारेण नि०' G-प्रते । ३. 'नीसारो' F-प्रते ।

द्रव्यलिङ्गधारीत्यर्थः, तथा संयमः-पृथिव्यादिः सप्तदशलक्षणः, यथा पृथिवी १ भू २ वह्नि ३ वायु ४ तरु ५ द्वि ६ त्रि ७ चतुः ८ पञ्चेन्द्रियाणां ९ मनोवाक्कायैः करणकारणानुमतिभिः संरम्भसमारम्भारम्भवर्जनमिति जीवसंयमः, पुस्तकादीन् प्रति-लेखनापूर्वकं धारयतोऽजीवसंयमः १०, प्रेक्ष्य चक्षुषा शयनासनादीनि कुर्वीतेति प्रेक्षासंयमः ११, पार्श्वस्थादीनामुपेक्षणमुपेक्षासंयमः १२, सचित्ताचित्तमिश्ररजोऽवगुण्डितपादादीनां प्रमार्जनं प्रमार्जनासंयमः १३, अनुपकारकं वस्तु विधिना परिष्ठापयतः परिष्ठापनासंयमः १४, द्रोहेर्ष्यादिभ्यो निवृत्तिर्धर्मध्यानादिषु प्रवृत्तिर्मनःसंयमः १५, एवं वाक्काययोरपि १६, १७, तस्य योगः=प्रतिलेखनादिव्यापारस्तेन निस्सारः, चर्विततताम्बूलवदिति, यद्वा 'संजम०' निर्गतं सारं=स्वर्गापवर्गफलं यस्य स निस्सारः, केन ?-संयमश्च योगश्च=योगोद्वहनं संयमयोगं तेन, [1]बाह्यसंयमयोगोद्वहनहेतुत्वादिति कुलं=गृहं ग्रामं=सकरं नकरं=गो १ महिषी २ उष्ट्र ३ च्छाग ४ च्छगली ५ तृण ६ पलाल ७ बूरक ८ काष्ठा ९-ऽङ्गार १० क्षेत्र ११ गृह १२ दूरदेशव्यवसायि १३ बलीवर्द १४ घृत १५ चर्म १६ भोजन १७ सेइमाणक १८ रूपाष्टादशकररहितं, राज्यं=सप्ताङ्गमयं, अथवा राज्यमिति सर्वत्र योज्यं, यथा-कुलराज्यं ग्रामराज्यं नगरराज्यं, यद्वा कुलग्रामनगराणि यत्रैवंविधं राज्यं 'पयहिय'त्ति त्यक्त्वा पुनरिति शेषः 'यः' साध्वाभासः 'तेषु' कुलादिषु 'करोति' विधत्ते 'हुः' निश्चितं 'ममत्वं' ममैतदिति मन्यते 'सः' पूर्वोक्तः केवलं 'लिङ्गधारी' वेषमात्रधारी, संयमः=पञ्चाश्रव-विरमण ५ पञ्चेन्द्रियनिग्रह १० कषायचतुष्टयजय १४ दण्डत्रयविरति १७ लक्षणस्तस्य योगो=व्यापारस्तेन निस्सारो=गतसार इति ॥२४॥

पुनर्गाथात्रयेणोत्तमाचार्यस्वरूपमाह –

विहिणा जो उ चोएइ, सुत्तं अत्थं च गाहई ।
सो धण्णो, सो अ पुण्णो अ, स बंधू मुक्खदायगो ॥२५॥

स एव भव्वसत्ताणं, चक्खूभूए विआहिए ।
दंसेइ जो जिणुद्दिट्ठं, अणुट्ठाणं जहट्ठिअं ॥२६॥

---

१. 'बाध्यसंयम०' इति पूर्वमुद्रिते, अत्र A-B-C प्रतपाठः ।

**तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ ।**
**आणं अइक्कमंतो, सो काउरिसो, न सप्पुरिसो ॥२७॥**

विधिना यस्तु चोदयति, सूत्रमर्थं च ग्राहयति ।
स धन्यः स च पुण्य एव, स बन्धुर्मोक्षदायकः ॥२५॥

स एव भव्यसत्त्वानां, चक्षुर्भूतो व्याहृतः ।
दर्शयति यो जिनोद्दिष्ट-मनुष्ठानं यथास्थितम् ॥२६॥

तीर्थकरसमः सूरिः सम्यग् यो जिनमतं प्रकाशयति ।
आज्ञामतिक्रामन् सः, कापुरुषः न सत्पुरुषः ॥२७॥

व्याख्या – 'विधिना' **आगमोक्तन्यायेन यः आचार्यः तुशब्दादुपाध्यायादिकः** 'चोएइ'**त्ति नोदयति=प्रेरयति नोदन-स्मारण-वारण-प्रतिनोदनादिभिः शिष्याणामिति,** 'सूत्रं' **आचाराङ्गादिकं उत्सर्गा १ ऽपवादो २ त्सर्गापवादिका ३ ऽपवादौत्सर्गिको ४ त्सर्गोत्सर्गिका ५ ऽपवादापवादिकात्मकं ६, तथा सूत्रपाठनानन्तरं तस्यैव निर्युक्ति-भाष्यचूर्णिसंग्रहणीवृत्त्यादिरूपं परम्परात्मकमर्थं** 'ग्राहयति' **शिक्षयति, चकारात् नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढैवंभूतान् सप्त नयान् ज्ञापयति स आचार्यः** 'धन्यः' **सूत्रधनदायकत्वात्, स च** 'पुण्यः' **अर्थदानपुण्यकृत्त्वात्, चकाराज्जिनाज्ञा-प्रतिपालकः, स बन्धुरिव** बन्धुः **कुमत्यादिनिवारणेन सन्मार्गे स्थापकत्वात्,** 'मुक्खदायगो' **ज्ञानेन जीवादिपदार्थपरिज्ञानं तेन संयमे दृढत्वं दृढत्वेन कर्माभावस्ततो मोक्षदायक इति ॥२५॥**

'स एव' **अनन्तरोक्त एव** 'भव्यसत्त्वानां' **मोक्षगमनयोग्यजन्तूनां** 'चक्षुर्भूतः' **नेत्रतुल्यः** 'व्याहृतः' **कथितः जिनादिभिः** 'दर्शयति' **कुमतिपटलनिराकरणेन प्रकटयति** 'यः' **आचार्यशिरोमणिः** 'जिनोद्दिष्टं' **जिनोक्तं** 'अनुष्ठानं' **मोक्षपथप्रापकं रत्नत्रयं** 'यथास्थितं' **यादृशं स्यात्तादृशम् ॥२६॥**

**तीर्थं=चतुर्विधः सङ्घः प्रथमगणधरो वा तत्कुर्वन्तीति तीर्थकरास्तेभ्यः समः=तुल्यः, देशसमत्वमिदं विज्ञेयम्, अन्यथा क्व तीर्थकरत्वं क्वाचार्यत्वमिति, कः ?-** सूरिः=**अनेकातिशयसंयुक्तो गौतमादिसदृश आचार्यः** 'सम्यग्' **इति सर्वशक्त्या यो** 'जिनमतं' **जगत्प्रभुदर्शनं नित्यानित्यादिस्वरूपवाचकं सप्तनयात्मकं कुमततरु-**

**गजायमानं** 'प्रकाशयति' **भव्यान् दर्शयतीत्यर्थः**, 'आज्ञां' **पारगतोक्तमर्यादां** 'अतिक्रमन्' **उल्लङ्घयन् पुनः सः** 'कापुरुषः' **पुरुषाधमः**, 'न सत्पुरुषः' **न प्रधानपुरुषः, जमालि-वदिति** ॥२७॥

**अथ कीदृशा आचार्या आज्ञातिक्रामका भवन्ति ?, इत्याह –**

**भट्ठायारो सूरी १, भट्ठायाराणुविक्खओ[1] सूरी २ ।**
**उम्मग्गठिओ सूरी ३, तिन्निवि मग्गं पणासंति ॥२८॥**

भ्रष्टाचारः सूरिर्भ्रष्टाचारोपेक्षकः सूरिः ।
उन्मार्गस्थितः सूरिस्त्रयोऽपि मार्गं प्रणाशयन्ति ॥२८॥

व्याख्या – भ्रष्टः=**सर्वथा शिथिलीभूतः** आचारो=**ज्ञानाचारादिर्यस्य स भ्रष्टाचारः** 'सूरिः' **अधर्माचार्यः** १, भ्रष्टाचाराणां=**मुक्तसंयमव्यापाराणां मुनीनामुपेक्षकः**, **प्रमाद-प्रवृत्तसाधुसाध्वीवृन्दान् न निवारयतीत्यर्थः**, 'सूरिः' **मन्दधर्माचार्यः** २, 'उन्मार्गस्थितः' **उत्सूत्रादिप्ररूपणे प्रवृत्तः** 'सूरिः' **अधमाधमो नामाचार्यः** ३, **एते त्रयोऽपि** 'मार्गं' **ज्ञानादिरूपं पन्थानं** 'प्रणाशयन्ति' **भृशं विनाशयन्तीत्यर्थः** ॥२८॥

**एतान् यः सेवते तस्य फलं दर्शयन्नाह –**

**उम्मग्गठिए सम्मग्गनासए[2] जो उ सेवए सूरिं ।**
**निअमेणं सो गोअम ! अप्पं पाडेइ संसारे ॥२९॥**

उन्मार्गस्थितान् सन्मार्गनाशकान् यस्तु सेवते सूरीन् ।
नियमेन स गौतम ! आत्मानं पातयति संसारे ॥२९॥

व्याख्या – 'उन्मार्गस्थितान्' **आगमविरुद्धप्ररूपकान्** 'सन्मार्गनाशकान्' **जिनोक्त-मार्गदूषकान्** 'यः' **भव्यसत्त्वः** सेवते, **तदुक्तमनुष्ठानं कुरुत इत्यर्थः, तुशब्दात्तदुक्तमनुष्ठानं कारयति अनुमोदयति च, 'सूरि'मिति** 'सूरीन्' **आचार्यान् प्राकृतत्वादेकवचनम्,** 'नियमेन' **निश्चयेन** स **हे गौतम** ! 'आत्मानं' **स्वयं** पातयति 'संसारे' **भवान्धकूपे क्षिपतीत्यर्थः** ॥२९॥

---

१. '०णुवेक्खओ' – A-D-F-G-H-प्रतपाठः, अत्र पुनः वृत्तिहस्तादर्शानुसारेण B-C-प्रत्यनुसारेण च । २. 'सम्मत्त०' E-F ।

किञ्च –

**उम्मग्गठिओ एक्को वि नासए[1] भव्वसत्तसंघाए ।**
**तं मग्गमणुसरंतं[2], जह कुत्तारो[3] नरो होइ ॥३०॥**

उन्मार्गस्थित एकोऽपि नाशयति भव्यसत्त्वसङ्घातान् ।
तन्मार्गमनुसरन्तं यथा कुतारो नरो भवति ॥३०॥

व्याख्या – 'एकोऽपि' **अद्वितीयोऽपि सूरिः साधुर्वा** 'उन्मार्गस्थितः' **कुमति-कदाग्रहग्रस्तो नाशयति, संसारसागरे पातयतीत्यर्थः** 'भव्यसत्त्वसङ्घातं' **भवसिद्धिक-जन्तुसमूहं, तन्मार्गं** 'अनुसरन्तं' **आश्रयन्तं, यथेति दृष्टान्तोपदर्शने** 'कुतारः' **कुत्सित-तारको** नरो भवति **स बहून् पृष्ठलग्नान् जन्तुसमूहान् नद्यादौ बोलयति, आत्मानमपि च बोलयतीति** ॥३०॥

**अथोन्मार्गपरम्परालग्नानामाचार्याणां मुनीनां च किं फलं भवति ? इत्याह –**

**उम्मग्गमग्गसंपट्ठिआण[4], साहूण गोअमा ! नूनं[5] ।**
**संसारो अ अणंतो, होइ य[6] सम्मग्गनासीणं ॥३१॥**

उन्मार्गमार्गसम्प्रस्थितानां साधूनां गौतम ! नूनम् ।
संसारश्चानन्तो भवति सन्मार्गनाशिनाम् ॥३१॥

व्याख्या – उन्मार्गाः=**गोशालकबोटिकनिह्नवादयस्ते तेषां** मार्गः=**परम्परा तस्मिन् यद्वा उन्मार्गरूपो यो मार्गस्तस्मिन् स्थितानां** 'साधूनां' **मुनिवेषाभासकानां, उपलक्षण-त्वात्तदाचार्याणामपि हे** 'गौतम !' **हे इन्द्रभूते !** 'नूनं' **निश्चितं** 'संसारः' **चतुर्गत्यात्मकः, न विद्यतेऽन्तः=पर्यन्तो यस्यासावनन्तो भवति, चकारस्तद्गतानेकदुःखसूचकः, किंभूतानां ?** – 'सन्मार्गनाशिनां' **जिनोक्तपथाच्छादकानां, महानिशीथोक्तमुनिचन्द्र-साधुवत्** ॥३१॥

**अथ कोऽपि कदाचित्प्रमादपरत्वेन न जिनोक्तक्रियां करोति परन्तु भव्यानां**

---

१. '०ए सव्व०' F-प्रते । २. '०मणुसरंते' A-आदिषु । ३. 'कुत्तारू' A-D-F-G-प्रतिषु । ४. '०ण सूरीण' A-D-F-G-H-प्रतपाठः । ५. 'णूणं' A-D-आदिषु । ६. 'होई स' E-प्रते ।

**यथोक्तं जिनमार्गं दर्शयति स कस्मिन् मार्गे आत्मानं स्थापयति ?, तद्विपरीतश्च कीदृशो भवति ? इत्याह –**

**सुद्धं सुसाहुमग्गं, कहमाणो ठवइ तइअपक्खम्मि ।**
**अप्पाणं, इयरो पुण गिहत्थधम्माओ चुक्कत्ति[1] ॥३२॥**

शुद्धं सुसाधुमार्गं कथयन् स्थापयति तृतीयपक्षे ।
आत्मनमितरः पुनो गृहस्थधर्माद् भ्रष्ट इति ॥३२॥

व्याख्या – 'शुद्धं' **आज्ञाशुद्धिसंयुक्तं** 'सुसाधुमार्गं' **सुविहितपथं** 'कथयन्' **आकाङ्क्षाऽभावेन प्ररूपयन्** 'स्थापयति' **रक्षयति** 'आत्मानं' **स्वयं, क्व ? - साधुश्रावकपक्षद्वयापेक्षया** 'तृतीयपक्षे' **संविग्नपाक्षिके, संविग्नानां=मोक्षाभिलाषि-सुसाधूनां पाक्षिकः=साहाय्यकर्त्ता संविग्नपाक्षिकस्तस्मिन्, तस्येदं लक्षणं-**

**"सुद्धं सुसाहुधम्मं कहेइ निंदइ य नियमायारं।**
**सुतवस्सियाण पुरओ होइ य सव्वोमराइणिओ ॥१॥**

**वंदइ न य वंदावइ किइकम्मं कुणइ कारवे नेव ।**
**अत्तट्ठा नवि दिक्खइ देइ सुसाहूण बोहेउं ॥२॥"**

[उपदेशमाला श्लो० ५१५-५१६]

**इत्यादि । तथा** 'इतरः पुनः' **उत्सूत्रभाषकः साधुद्वेषी च गृहस्थधर्मात्** 'चुक्क'**त्ति भ्रष्टो यः स साधुर्न भवति, उत्सूत्रप्ररूपकत्वात् साधुपरिद्वेषपरिणामत्वाच्च, गृहस्थोऽपि न भवति, गृहाश्रमधर्माभावात् गृहस्थवेषाभावाच्चेति ॥३२॥**

**यद्येवं ततः किं कर्तव्यम् ? इत्याह –**

**जइवि न सक्कं[2] काउं, सम्मं जिणभासिअं अणुट्ठाणं।**
**[3]तो सम्मं भासिज्जा, जह भणिअं खीणरागेहिं ॥३३॥**

---

१. 'चक्कु त्ति' E-G, 'चुक्केति' A-D, 'चुक्को त्ति' F-H । २. 'सक्कइ का०' F-प्रते । ३. 'ता' E-प्रते ।

यद्यपि न शक्यं कर्तुं सम्यग् जिनभाषितमनुष्ठानम्।
ततः सम्यग् भाषेत यथा भणितं क्षीणरागैः ॥३३॥

व्याख्या – **यद्यपि शक्यं न भवति तेन,** 'सक्कइ'**त्ति पाठे तु न शक्यते** 'कर्त्तुं' **विधातुं, कथं ?** – 'सम्यक्' **त्रिकरणशुद्ध्या** 'जिनभाषितं' **केवल्युक्तं** 'अनुष्ठानं' **आजन्मक्रियाकलापरूपं, ततः** 'सम्यक्' **आत्मसामर्थ्येण** भाषेत **यादृशं स्यात्तादृशं यथा** 'क्षीणरागैः' **जिनैः** 'भणितं' **कथितं तथा निरूपयेदिति ॥३३॥**

**अथ प्रमादिनामपि शुद्धप्ररूपणया को गुणः ? इत्याह –**

**ओस्सन्नोऽवि[१] विहारे, कम्मं सोहेइ सुलभबोही य ।**
**चरणकरणं विसुद्धं, उववूहिंतो परूविंतो ॥३४॥**

अवसन्नोऽपि विहारे, कर्म शोधयति सुलभबोधिश्च ।
चरणकरणं विशुद्धं उपबृंहयन् प्ररूपयन् ॥३४॥

व्याख्या – 'अवसन्नोऽपि' **शिथिलोऽपि, क्व ?** – 'विहारे' **मुनिचर्यायां** 'कर्म' **दुष्टज्ञानावरणादिकं** शोधयति, **कर्मणां शिथिलत्वं प्रापयतीत्यर्थः,** सुलभा=**सुखेन लभ्येत्यर्थः** बोधिः=**जन्मान्तरे जिनधर्मप्राप्तिरूपा यस्यासौ सुलभबोधिः, चकारात्सुदेवत्वप्राप्तिस्तदनन्तरं च सुकुलोत्पत्तिर्भवति, किं कुर्वन् ?** – **चरणकरणं** 'विशुद्धं' **निर्दोषं** 'उपबृंहयन्' **निर्मायभावेन प्रशंसां कुर्वन्** 'प्ररूपयन्' **च वाञ्छाविरहितो यथास्थितं भव्यानां कथयन्निति । तत्र –**

**"वय[५] समणधम्म[१०] संजम[१७] वेयावच्चं च[१०] बंभगुत्तीओ[९] ।**
**णाणाइतियं[३] तव[१२] कोहनिग्गहाइ[४] य चरणमेयं ॥१॥"** [ओघनि० भा०२]

**तथा –**

**"पिंडविसोही[४] समिई[५] भावण[१२] पडिमा य[१२] इंदियनिरोहो[५] ।**
**पडिलेहण[२५] गुत्तीओ अभिग्गहा[४] चेव करणं तु ॥२॥"**

[ओघनि० भा०३]

**इति ॥३४॥**

---

१. 'उस्सन्नो' B–C–प्रतपाठः ।

**अथ संविज्ञपाक्षिकस्य साधुविषये किञ्चित्कृत्यं [१]दर्शयन् आह –**

**सम्मग्गमग्गसंपट्ठिआण, साहूण कुणइ वच्छल्लं ।**
**ओसहभेसज्जेहि य, सयमन्नेणं तु कारेइ[२] ॥३५॥**

सन्मार्गमार्गसंप्रस्थितानां, साधूनां करोति वात्सल्यम् ।
औषधभैषज्यैश्च स्वयं अन्येन तु कारयति ॥३५॥

व्याख्या – 'सन्मार्गमार्गसंप्रस्थितानां' **प्रधानमार्गपरम्पराप्रवृत्तानां** 'साधूनां' **जगदुत्तममुनीनां** 'करोति' **निर्जरार्थं विधत्ते** 'वात्सल्यं' **अन्तरङ्गभावेनोपकारकरणं, कैः ?** - 'औषधभेषजैः' **तत्रौषधम्=अनेकद्रव्यसंयोजितं तद्व्यतिरिक्तं भेषजं, यद्वा औषधं=हरीतक्यादि भेषजं=पेयादि, चशब्दोऽनेकप्रकारभावसूचकः,** 'स्वयं' **आत्मना** 'अन्येन' **आत्मव्यतिरिक्तेन** कारयति **तुशब्दात्कुर्वन्तमन्यमनुजानाति यः स संविग्नपाक्षिक आराधको ज्ञेय इत्याशयः ॥३५॥ किञ्च –**

**भूए अत्थि भविस्संति, केइ ते[३]लुक्कन[४]मिअकमजु[५]अला ।**
**जेसिं परहिअकरणि[६]क्कबद्धलक्खाण वोलिही कालो ॥३६॥**

भूताः सन्ति भविष्यन्ति, केचित् त्रैलोक्यनतक्रमयुगलाः ।
येषां परहितकरणैकबद्धलक्षाणां गमिष्यति कालः ॥३६॥

व्याख्या – 'भूताः' **अतीतकाले** 'अत्थि'त्ति 'सन्ति' **विद्यन्ते वर्त्तमानकाले** 'भविष्यन्ति' **भविष्यत्काले** 'केचित्' **अल्पाः संविग्नपाक्षिकाः, किंभूताः ?-त्रैलोक्येन-स्वर्गमर्त्यपाताललक्षणेन तन्निवासिप्राणिगणेनेत्यर्थः नतं क्रमयुगलं=चरणयुग्मं येषां ते** त्रैलोक्यनतक्रमयुगलाः, 'येषां' **सत्पुरुषाणां संविग्नपाक्षिकाणां, पुनः किंभूतानां ?** - 'परहितकरणैकबद्धलक्षाणां' **परस्मै=अन्यस्मै हितं परहितं परहितस्य करणं परहितकरणं तस्मिन् एकम्=अद्वितीयं बद्धं लक्षं=आलोचनलक्षणं यैस्ते परहित-करणैकबद्धलक्षम्, '[७]लक्षिण् आलोचने' इति, यद्वा-परहितकरणे एकं बद्धं**

---

१. 'दर्शय इत्याह' इति C-प्रते, 'दर्शयतीत्याह' इति B-प्रते, 'दर्शयन् इत्याह' इति पूर्वमुद्रिते, अत्र A-प्रत-पाठः । २. 'कारेई' H-प्रते । ३. 'तेलोक्क०' H-प्रते । ४. '०नमंसणीय०' D-E-F-G-H । ५. '०जुयले' H-आदिषु । ६. '०करणेक्क०' H-आदिषु । ७. 'लक्षणं आलोचनं' इति पूर्वमुद्रिते, अत्र A-B-C-प्रत-पाठः ।

लक्षं=दर्शनं लक्षणं वा यैस्ते परहितकरणैकबद्धलक्षाः, 'लक्षीण् दर्शनांकनयो'रिति, तेषां परहितकरणैकबद्धलक्षाणाम्, 'वोलिही'ति गमिष्यति 'कालः' समयादिलक्षणः, ते संविग्नपाक्षिकाः पूज्या विज्ञेया इति ॥३६॥

ये एवंविधा न स्युस्तेषां स्वरूपमाह –

तीआणागयकाले, केई होहिंति गोयमा ! सूरी ।
जेसिं नामग्गहणे[1]ऽवि, होइ[2] नियमेण पच्छित्तं ॥३७॥

अतीतानागतकाले, केचिद्भविष्यन्ति गौतम ! सूरयः ।
येषां नामग्रहणेऽपि, भवति नियमेन प्रायश्चित्तम् ॥३७॥

व्याख्या – अतीते कालेऽनागतकाले च 'केचित्' अनिर्दिष्टनामानोऽभूवन्निति शेषः 'होहिंति' भविष्यन्ति वर्त्तमानेऽपि काले सन्ति हे गौतम! 'सूरयः' आचार्य-पदनामधारकाः, येषां परिचयकरणादिकं दूरे आस्तां 'नामग्रहणेऽपि' अमुकदेव-दत्ताख्यसूरिरित्यपि कथ्यमाने भवति निश्चयेन प्रायश्चित्तमिति, तथा चोक्तं श्री-महानिशीथपञ्चमाध्ययने-

"इत्थं चायरियाणं पणपण्णं होंति कोडिलक्खाओ ।
कोडिसहस्से कोडीसए य तह एत्तिए चेव ५५५५५५०००००००० ॥१॥
एतेसिं मज्झाओ एगे न बुड्डेइ गुणगणाईण्णे ॥" [महा० ५/१७-१८]

इति ॥३७॥

जओ –

सयरी[3]भवंति अणविक्खयाइ, जह भिच्चवाहणा लोए ।
पडिपुच्छा[4]हिं चोयण, तम्हा उ गुरू सया भयइ[5] ॥३८॥

स्वेच्छाचारीणि भवन्ति, अनपेक्षया यथा भृत्यवाहनानि लोके ।
प्रतिपृच्छाभिश्चोदनाभिः, तस्मात्तु गुरुः सदा भजते ॥३८॥

---

१. '०हणेण हो०' E-F-G । २. 'होज्ज' H-प्रते, 'हुज्ज' - A-प्रते । ३. 'सइरी०' H-प्रते । ४. 'पडिपुच्छ सोहि चोयण' A-H-आदिषु । ५. 'भयई' H-प्रते ।

व्याख्या – जओत्ति भिन्नपदं यतो भणितं-'सइरी'त्ति स्वेच्छाचारिणो भवन्ति 'अणविक्खयाइ'त्ति शिक्षारहितत्वेन यथा भृत्यवाहनादयः, तत्र भृत्याः=सेवकाः वाहनानि=हस्त्यश्ववृषभमहिषादीनि लोके, तथा विनेयाः गुरूणां कार्यं कार्यं प्रति पृच्छाः प्रतिपृच्छास्ताभिः प्रतिपृच्छाभिः 'चोयणे'ति प्राकृतत्वाद्विभक्तिपरिणामः चोदनादिभिश्च विनेति गम्यं, स्वेच्छाचारिणो भवन्तीत्यर्थः, यस्मात्स्वेच्छाचारिणो भवन्ति तस्मात्प्रतिपृच्छादिभिराचार्यो विनेयानां तुशब्दान्महत्तरा स्वशिष्यणीनां 'सदा' सर्वकालं 'भयइ' त्ति धातूनामनेकार्थत्वात् 'सत्यापयति' शिक्षां ददातीत्यर्थः ॥३८॥

किञ्च –

**जो ऊ पमायदोसेणं, आलस्सेणं तहेव य ।**
**सीसवग्गं न चोएइ, तेण आणा विराहिया ॥३९॥**

यस्तु प्रमाददोषेणालस्येन तथैव च ।
शिष्यवर्गं न प्रेरयति तेनाज्ञा विराधिता ॥३९॥

व्याख्या – 'यो' गणी तुशब्दादुपाध्यायगणावच्छेदादिः प्रमादश्च=निद्रादिः द्वेषश्च=मत्सरः दोषश्च वा=स्वशिष्ये रागादिकः प्रमादद्वेषं प्रमाददोषं वा तेन, यद्वा प्रमादरूप एव यो दोषः=कुलक्षणत्वं तेन प्रमाददोषेण, आलस्येन तथैव च, चकारान्मोहावज्ञादिप्रकारेण, 'शिष्यवर्गं' अन्तेवासिवृन्दं न प्रेरयति संयमानुष्ठान इति शेषः 'तेन' आचार्येण 'आज्ञा' जिनमर्यादा 'विराधिता' खण्डितेत्यर्थः ॥३९॥

**संखेवेणं मए सोम्म[1] !, वन्नियं गुरुलक्खणं ।**
**गच्छस्स लक्खणं धीर !, संखेवेणं निसामय ॥४०॥**

संक्षेपेण मया सौम्य ! वर्णितं गुरुलक्षणम् ।
गच्छस्य लक्षणं धीर ! संक्षेपेन निशामय ॥४०॥

व्याख्या – 'सङ्क्षेपेण' विस्तराभावेन मया 'हे सौम्य !' हे विनेय ! 'वर्णितं' प्ररूपितमित्यर्थः गृणाति=वदति तत्त्वमिति गुरुस्तस्य लक्षणं=चिह्नम् । अथेति शेषः 'गच्छस्य' मुनिवृन्दस्य लक्षणं धिया राजत इति धीरस्तस्य सम्बोधनं क्रियते हे

---

१. 'सोम' F-प्रते ।

धीर ! **सङ्क्षेपेण** 'निशामय' **आकर्णयेति** ॥४०॥

**गीअत्थे जे सुसंविग्गे, अणालस्सी दढव्वए ।**
**अक्खलियचरित्ते सययं, रागदोसविवज्जिए ॥४१॥**

**निट्ठविअअट्ठमयट्ठाणे, [1]सोसिअकसाए जिइंदिए ।**
**विहरिज्जा तेण सद्धिं तु, छउमत्थेणवि केवली ॥४२॥**

गीतार्थो यो सुसंविग्नः अनालस्यी दृढव्रतः ।
अस्खलितचारित्रः सततं, रागद्वेषविवर्जितः ॥४१॥

निष्ठापिताष्टमदस्थानः शोषितकषायो जितेन्द्रियः ।
विहरेत् तेन सार्द्धं तु छद्मस्थेनापि केवली ॥४२॥

व्याख्या – **गीतं=सूत्रमर्थस्तस्य व्याख्यानं तद्द्वयेन युक्तो गीतार्थः यः,** 'सुसंविग्गे'**त्ति अत्यर्थं संवेगवान्, न विद्यते आलस्यं वैयावृत्त्यादौ यस्यासौ** 'अनालस्यः' **आलस्यरहित इत्यर्थः, दृढानि=सुनिश्चलानि व्रतानि=महाव्रतलक्षणानि यस्यासौ** दृढव्रतः, **अस्खलितम्=अतीचाररहितं चारित्रं सप्तदशभेदं यस्यासौ** अस्खलितचारित्रः 'सततं' **अनवरतं** 'रागद्वेषविवर्जितः' **तत्र मायालोभात्मको रागः क्रोधमानात्मको द्वेष इति** ॥४१॥

**निष्ठापितानि=क्षयं नीतानि अष्टौ मदस्थानानि=जाति** १ **कुल** २ **रूप** ३ **बल** ४ **लाभ** ५ **श्रुत** ६ **तपो** ७ **विभव** ८ **लक्षणानि येनासौ** निष्ठापिताष्टमदस्थानः, **शोषिताः=दुर्बलीकृताः कषायाः=सभेदाः क्रोधमानमायालोभा येनासौ शोषितकषायः,** जितानि=**आत्मवशीकृतानि** इन्द्रियाणि=**श्रोत्र** १ **दृग्** २ **नासा** ३ **जिह्वा** ४ **स्पर्शन** ५ **मनो** ६ **लक्षणानि येनासौ** जितेन्द्रियः 'विहरेत्' **विहारं कुर्यादित्यर्थः,** तेन **छद्मस्थेनापि सार्द्धं** 'केवली' **केवलज्ञानी** ॥४२॥

**अथोक्तविपरीतैः सार्द्धं विहारो न विधेय इत्याह –**

**जे अणहीयपरमत्था, गोअमा ! संजए भवे ।**
**तम्हा ते विवज्जिज्जा, दुग्गईपंथदायगे ॥४३॥**

---

१. 'सुसिय०' A-D-प्रते, 'समिय०' B-C-E-F-G-H-प्रते ।

येऽनधीतपरमार्थाः, गौतम ! संयता भवन्ति ।
तस्मात्तानपि विवर्जयेत् दुर्गतिपथदायकान् ।४३।।

व्याख्या – 'ये' **मुनयः** अनधीताः=**अनभ्यस्ताः** परमार्थाः=**ये आश्रवाः=कर्मबन्धस्थानानि ते परिश्रवाः=कर्मनिर्जरास्थानानि** १, **ये एव परिश्रवाः=निर्जरास्थानानि तान्येवाश्रवाः=कर्मबन्धस्थानानि** २, **येऽनाश्रवास्तेऽप्यपरिश्रवाः=कर्मबन्धस्थानानि कौङ्कणसाध्वादिवत्** ३, **अपरिश्रवाः=कर्मबन्धस्थानानि तेऽनाश्रवा=न कर्मबन्धस्थानानि कणवीरलताभ्रामकक्षुल्लकस्येव** ४, **इत्याद्यागमपरिज्ञानरूपा यैस्ते**ऽनधीतपरमार्थाः **हे** गौतम ! संयता भवन्ति, **तस्मात्तानपि** 'विवर्जयेत्' **दूरतस्त्यजेत्, किंभूतान्** ? – 'दुर्गतिपथदायकान्' **तिर्यग्-नरक-कुमानुष-कुदेवमार्गप्रापकानित्यर्थः** ।।४३।।

**अथ गीतार्थोपदेशः सर्वोऽपि सुखावहो भवतीत्याह –**

**गीअत्थस्स वयणेणं, विसं हालाहलं पिवे ।**
**निव्विकप्पो य भक्खिज्जा, तक्खणे[१] जं समुद्दवे ।।४४।।**

**परमत्थओ विसं नो तं, अमयरसायणं खु तं ।**
**निव्विग्घं जं न तं मारे, मओऽवि अमयस्समो ।।४५।।**

गीतार्थस्य वचनेन विषं हालाहलं पिबेत् ।
निर्विकल्पश्च भक्षयेत्, तत्क्षणे यत् समुद्रावयेत् ।।४४।।

परमार्थतो विषं न तदमृतरसायनं खु तत् ।
निर्विघ्नं यद् न तद् मारयति मृतोऽपि अमृतसमः ।।४५।।

व्याख्या – 'गीतार्थस्य' **अधीतगुरुपार्श्वसूत्रार्थस्य** 'वचनेन' **उपदेशेन** 'विषं' **गरलं, किंभूतं** ? – 'हालाहलं' **उत्कटं** 'पिबेत्' **गलरन्ध्रे पातयेत्, विनेय इति शेषः, किंभूतः** ? – 'निर्विकल्पः' **सर्वथा गतशङ्कः, भक्षयेच्च विषगुटिकादिकं यद्=विषगुटिकादिकं** 'तत्क्षणे' **भक्षणप्रस्तावे समुपद्रवेत्, पञ्चत्वं प्रापयेदित्यर्थः** ।।४४।।

---

१. 'तक्खणा' C-D-F-G-H-प्रते, अत्र पुनः A-B-प्रतपाठः ।

'परमार्थतः' **तत्त्वतः** तद्विषं न **भवति**, 'अमृतरसायनं' **अमृतरसतुल्यं** 'खु' **निश्चितं तद्विषं** 'निर्विघ्नं' **विघ्नविवर्जितं** 'यद्' **यस्मात् कारणात्** न तद्=**विषं** मारयति=**न प्राणत्यागं करोति, अतः कथमपि** 'मृतोऽपि' **मरणं प्राप्तोऽपि** 'अमृतसम एव' **जीवन्निव भवतीत्यर्थः, शाश्वतसुखहेतुत्वादिति । गीतार्थस्येत्यत्र चतुर्भङ्गी यथा-संविग्ना नाम एके नो गीतार्थाः** १, **न संविग्ना नाम एके गीतार्थाः** २ **संविग्ना नाम एके गीतार्था अपि** ३, **न संविग्ना नाम एके नो गीतार्थाः** ४, **तत्र न प्रथमभङ्गस्था धर्माचार्याः आगमपरिज्ञानाभावात्** १, **द्वितीयभङ्गस्था अपि न धर्माचार्याः, चारित्ररहितत्वात्, यदि शुद्धप्ररूपका भवन्ति साधून् वन्दन्ते साधूंश्च न वन्दापयन्ति तदा संविग्नपाक्षिका जायन्त इति** २, **तृतीयभङ्गस्था धर्माचार्या एव, समग्रचारित्र-ज्ञानयुक्तत्वात् ।**

ननु **एवंविधास्तु गणधरादय एव भवन्ति, न संप्रतिकाले तथाविधा अप्रमादिनः, कथं धर्माचार्यत्वं तेषां ?,** उच्यते—**वर्त्तमानकाले यत्सूत्रं वर्त्तते तस्य गुरुपरम्परया गृहीतार्थाः विनिश्चितार्थाः गीतार्था भवन्ति, दुःषमासेवार्त्तसंहननाद्यनुभावतो वीर्यम-गोपयन्तः संविग्ना एव, अतो न तेषां धर्माचार्यत्वं व्यभिचरतीति** ३, **चतुर्थभङ्गस्था अपि न धर्माचार्याः, ज्ञानक्रियाशून्यत्वात् केवललिङ्गमात्रोपजीवित्वाच्चेति** ४ ॥४५॥

**अथोक्तविपरीतमाह –**

**[1]अगीयत्थस्स वयणेणं, [2]अमयंपि न घुंटए ।**
**जेण नो तं भवे अमयं, जं अगीयत्थदेसियं ॥४६॥**

**परमत्थओ न तं अमयं, विसं हालाहलं खु तं ।**
**न तेण अजरामरो हुज्जा, तक्खणा निहणं वए ॥४७॥**

अगीतार्थस्य वचनेनामृतमपि न पिबेत् ।
येन न तद् भवेदमृतं यदगीतार्थदेशितम् ॥४६॥

परमार्थतो न तदमृतं, विषं हालाहलं खु तत् ।
न तेनाजरामरो भवेत्, तत्क्षणात् निधनं व्रजेत् ॥४७॥

---

१. 'अग्गीयस्स' **F-G**-प्रतपाठः । २. 'अमियंपि' इति **पूर्वमुद्रिते** ।

व्याख्या – 'अगीतार्थस्य' **पूर्वोक्तचतुर्थभङ्गस्थस्य वचनेन अमृतमपि** 'न घुण्टेत्' **न पिबेत्, येन कारणेन न तद्भवेत् अमृतं, यदगीतार्थदेशितं परमार्थतो न तदमृतं, विषं हालाहलं** 'खु' **निश्चितं, न तेनाजरामरो भवेत्, तत्क्षणादेव** 'निधनं व्रजेत्' **मरणं प्राप्नुयादित्यर्थः ॥४६॥ ॥४७॥**

**किञ्च –**

**अगीयत्थकुसीलेहिं, संगं तिविहेण वोसिरे ।**
**मुक्खमग्गस्सिमे विग्घे, पहंमी तेणगे जहा ॥४८॥**

अगीतार्थकुशीलैः सङ्गं त्रिविधेन व्युत्सृजेत् ।
मोक्षमार्गस्येमे विघ्नाः, पथि स्तेना यथा ॥४८॥

व्याख्या – **अगीतार्थाश्च कुशीलाश्च** तैरगीतार्थकुशीलैः, **उपलक्षणत्वात्सभेद-पार्श्वस्थावसन्नसंसक्तयथाच्छन्दैः सह,** 'सङ्गं' **संसर्गं** 'त्रिविधेन' **मनोवाक्कायेन, तत्र** मनसा **चिन्तनम्-अहं मिलनं करोमीति,** वाचा **आलापसंलापादिकरणमिति,** कायेन **सम्मुखगमनप्रणामादिकरणमिति,** 'व्युत्सृजेत्' **वि=विविधं विशेषेण वा उद्=भृशं सृजेत्=त्यजेदित्यर्थः, तथा चोक्तं श्री**महानिशीथ**षष्ठाध्ययने**-

"**वासलक्खंपि सूलीए, संभिन्नो अच्छियामुहो ।**
**अगीयत्थेण समं एक्कं, खणद्धंपि न संवसे ॥१॥**" [महा० ६/१४६]

**तथा** 'मोक्षमार्गस्य' **निर्वाणपथस्य** 'इमे' **पूर्वोक्ताः** 'विग्घे'**त्ति विघ्नकरा इत्यर्थः,** 'पथि' **लोकमार्गे** 'स्तेनकाः' **चौराः यथेत्युदाहरणोपदर्शन इति ॥४८॥**

**किञ्च –**

**पज्जलियं हुयवहं दट्ठुं, निस्संको तत्थ पविसिउं ।**
**अत्ताणं निद्दहिज्जाहि, नो कुसीलस्स अल्लिए ॥४९॥**

प्रज्वलितं हुतवहं दृष्ट्वा, निःशङ्कं तत्र प्रविश्य ।
आत्मानं निर्दहेत् नैव कुशीलमालीयेत् ॥४९॥

व्याख्या – **प्रज्वलितं** 'हुतवहं' **वैश्वानरं** 'दुट्ठ'मिति '**दुष्टं**' **निर्दयं, यद्वा** '**दट्ठु**'मिति '**दृष्ट्वा**' **विलोक्य** 'निःशङ्कः' **त्यक्तशङ्कः** 'तत्र' **हुतवहे** 'प्रविश्य' **प्रवेशं विधाय** 'आत्मानं' **स्वयं** 'निर्दहेत्' **भस्मसात्कुर्यादित्यर्थः, परं** 'नो' **नैव कुशीलस्य** '[१]अल्लिए'**त्ति कुशीलो दूरे तिष्ठतु, तदाश्रितस्यापि सङ्गं न कुर्यात्, यद्वा कुशीलस्य उपलक्षणत्वाद-गीतार्थस्य** '[१]अल्लिए'**त्ति सङ्गं न कुर्यात्, अनन्तसंसारहेतुकत्वात्, उक्तञ्च श्रीमहानिशीथ-द्वितीयाध्ययनप्रान्ते-**

**"जीवो संमग्गमाइण्णो, घोरवीरतवं चरो ।**
**अचयंतो इमे पंच, कुज्जा सव्वं निरत्थयं ॥१॥**

**पासत्थोसन्नहाछंदे, कुसीले सबले तहा ।**
**दिट्ठीएवि इमे पंच, गोयमा ! न निरिक्खए ॥२॥"** [महा० २/१६२-१६३]

**सुमतिवदिति ॥४९॥**

**अथ पूर्वोक्तगच्छस्वरूपमाह –**

**पजलंति जत्थ [२]धगधगस्स गुरुणा वि चोइए [३]सीसा ।**
**रागदोसेण वि अणुसएण, तं गोयम ! न गच्छं ॥५०॥**

प्रज्वलन्ति यत्र धगधगायमानं गुरुणापि नोदिते शिष्याः ।
रागद्वेषेणापि अनुशयेन स गौतम ! न गच्छः ॥५०॥

व्याख्या – प्रज्वलन्ति **अग्निवत्** यत्र **गणे कथं ? - धगधगायमानं यथा स्यात्तथा प्राकृतत्वाद्विभक्तिपरिणामः,** 'गुरुणा' **स्वाचार्येणापि, अपिशब्दाद्गणावच्छेद-स्थविरादिनाऽपि** 'चोइए'**त्ति भवादृशामयुक्तमेतदित्यादिना प्रेरिताः, के ?** - 'शिष्याः' **स्वान्तेवासिनः, काभ्यां प्रज्वलन्ति ?** - रागद्वेषाभ्यां, **प्राकृतत्वात्सूत्र एकवचनं, अपिशब्दश्चशब्दार्थे,** 'अनुशयेन' **च क्रोधानुबन्धेन, निरन्तरक्रोधकरणेनेत्यर्थः, यद्वा प्रज्वलन्ति, केन ? - रागद्वेषेण, किंभूतेन ? - 'विअणुसएण'त्ति विगतो=गतो-**

---

१. 'अदिन्नए' इति पूर्वमुद्रिते **B**-प्रते च, अत्र **A**-प्रतपाठः । २. 'धगधगधगस्स' **H**-प्रते । ३. 'सीसे' **C-D-E-F-G-H**, अत्र **A-B**-आदिप्रतपाठः ।

ऽनुशयः=पश्चात्तापः पश्चादपि यत्र स व्यनुशयस्तेन 'व्यनुशयेन' सदा गतपश्चात्तापेनेत्यर्थः, हे गौतम ! स गच्छो न भवतीति ॥५०॥

**गच्छो महाणुभावो, तत्थ वसंताण निज्जरा विउला ।**
**सारण-वारण-चोअण-माईहिं न दोसपडिवत्ती ॥५१॥**

गच्छो महानुभावस्तत्र वसतां निर्जरा विपुला ।
स्मारणावारणाचोदनादिभिर्न दोषप्रतिपत्तिः ॥५१॥

व्याख्या – 'गच्छो' मुनिवृन्दरूपः, किंभूतः ? - महान् अनुभावः=प्रभावो यस्यासौ महानुभावः, 'तत्र' गच्छे 'वसतां' वासं कुर्वतां 'निर्जरा' देशकर्मक्षयरूपा, उपलक्षणत्वात्सर्वकर्मक्षयरूपो मोक्षोऽपि भवतीति शेषः, किंभूता ? - 'विपुला' विस्तीर्णा, तथा यत्र च वसतां सारण-वारण-नोदनादिभिः पूर्वोक्तशब्दार्थैः, मोऽलाक्षणिकः, 'दोषप्रतिपत्तिः' दोषागमो न भवति ॥५१॥

**गुरुणो [1]छंदणुवत्ती, सुविणीए जिअपरीसहे धीरे ।**
**न वि थद्धे न वि लुद्धे, न वि गारविए, विगहसीले ॥५२॥**

गुरोः छन्दानुवर्तिनः, सुविनीता जितपरीषहा धीराः ।
नापि स्तब्धा नापि लुब्धा, नापि गौरविला विकथाशीलाः ॥५२॥

व्याख्या – 'गुरोः' स्वाचार्यस्य 'छन्दोऽनुवृत्तयः' अभिप्रायानुचारिणो, न स्वाभिप्रायचारिणः, 'सुविनीताः' शोभनविनययुक्ताः, जिताः=पराजिताः परीषहाः= शीतोष्णा यैस्ते जितपरीषहाः, उक्तं चाचाराङ्गनिर्युक्तौ-

"इत्थीसक्कारे परीसहा य दो भावसीयला एए ।
सेसा वीसई उण्हा परीसहा होंति णायव्वा ॥१॥

जे तिव्वपरीणामा परीसहा ए भवंति उण्हा उ ।
जे मंदपरीणामा परीसहा ते भवे सीया ॥२॥"

[आचा० ३/नि.२०२-२०३/]

तथा च ज्ञानावरण १ वेदनीय २ मोहनीया ३ ऽन्तरायेषु ४ क्षुत्-पिपासा २

१. 'छंदणुक्ते' C-प्रते, 'छंदणुवित्ती' A-B-D-E-आदि ।

शीतोष्ण ४ दंशा ५ ऽचेला ६ ऽरति ७ स्त्री ८ चर्या ९ नैषेधिकी १० शय्या ११ ऽऽक्रोश १२ वध १३ याञ्चा १४ ऽलाभ १५ रोग १६ तृणस्पर्श १७ मल १८ सत्कार १९ प्रज्ञा २० ऽज्ञान २१ सम्यक्त्व २२ लक्षणा द्वाविंशतिरप्यवतरन्ति, यथा दर्शनमोहे सम्यक्त्वपरीषहः, तदुदये तस्य भावात् १, प्रज्ञाऽज्ञाने द्वे ज्ञानावरणे ३, अलाभोऽन्तराये ४, आक्रोशारतिस्त्रीनैषेधिक्यः अचेलयाञ्चासत्कारपुरस्काराः सप्त चारित्रमोहेऽवतरन्ति ११, क्षुत्पिपासा २ शीतोष्ण ४ दंश ५ चर्या ६ शय्या ७ मल ८ वध ९ रोग १० तृणस्पर्श ११ एते एकादश वेदनीयोदये भवन्ति, शेषेषु दर्शनावरणनामायुर्गोत्रेषु नास्त्यवतारः परीषहाणामिति । तथा नवमगुणस्थानकं यावत्सर्वेऽपि परीषहाः संभवन्ति, पुनर्वेदयति विंशतिमेव, यतो यस्मिन् समये शीतं वेदयति, न तस्मिन् समये उष्णत्वं वेदयति यस्मिन्नुष्णं तस्मिन् शीतं न, तथा यस्मिन् चर्यां वेदयति तस्मिन् नैषधिकीं न, यस्मिन् नैषेधिकीं तस्मिन् चर्यां न वेदयतीति। सूक्ष्मसंपराये=दशमगुणस्थाने क्षुत्पिपासाशीतोष्णदंशचर्याशय्यावधा-लाभरोगतृणस्पर्शमलप्रज्ञाऽज्ञानरूपाश्चतुर्दश भवन्ति, द्वादश पुनर्वेदयति, शीतोष्णयो-रेकदैकत्वात् चर्याशय्ययोरेकदैकत्वाच्चेति । तथा उपशान्तमोहे=एकादशगुणस्थाने क्षीणमोहे=द्वादशगुणस्थाने छद्मस्थवीतरागे त एव चतुर्दश, यतः सप्तानां चारित्र-मोहनीयप्रतिबद्धानां मोहनीयस्य क्षपितत्वेनोपशमितत्वेन वा दर्शनमोहनीयप्रतिबद्धस्य एकस्य च तत्रासम्भवादिति पूर्ववत्, द्वादश पुनर्वेदयति ते, सयोग्ययोगिरूपे एकादश परीषहाः संभवन्ति, यथा-क्षुत् १ पिपासा २ शीतो ३ ष्ण ४ दंश ५ चर्या ६ वध ७ मल ८ शय्या ९ रोग १० तृणस्पर्श ११ रूपाः, जिने वेद्यस्य संभवात् न यान्ति, शीतोष्णयोरेकदैकत्वात् चर्याशय्ययोरेकदैकत्वाच्च नव च पुनर्वेदयति, धिया राजन्त इति धीराः वज्रस्वामिवत्, नापि स्तब्धाः=नाहङ्कारपराः स्कन्धकवत्, नापि लुब्धाः=नाहारोपधिपात्रादिगृद्धा धन्यमुनिवत्, न गौरविताः=न गौरवत्रिकाऽऽसक्ता मथुरामङ्गुशिष्यवत्, न विकथाशीलाः=न विरुद्धकथाकथनस्वभावा हरिकेशमुनिवत् ॥५२॥

खंते दंते गुत्ते, मुत्ते वेरग्गमग्गमल्लीणे ।
दसविहसामायारी-आवस्सग-संजमुज्जुत्ते ॥५३॥

क्षान्ता दान्ता गुप्ताः, मुक्ता वैराग्यमार्गमालीनाः ।
दशविधसामाचारी-आवश्यक-संयमोद्यताः ॥५३॥

व्याख्या – 'क्षान्ताः' **क्षमायुक्ता गजसुकुमालवत्**, 'दान्ताः' **दमितेन्द्रियाः शालिभद्रादिवत्**, 'गुप्ताः' **नवब्रह्मचर्यगुप्तिमन्तः श्रीस्थूलभद्रवत्**, 'मुक्ताः' **न लोभयुक्ता जम्बूस्वाम्यादिवत्**, 'वैराग्यमार्गमालीनाः' **संवेगपथमाश्रिताः अतिमुक्तककुमार-कालोदाय्यादिवत्, दशविधसामाचार्याम्=उक्तलक्षणायामुद्युक्ताः, अवश्यं कर्त्तव्य-मावश्यकं यद्वा गुणानां आ=समन्ताद्वश्यं करोतीत्यावश्यकं, गुणशून्यमात्मानं आ=समन्ताद् वासयति गुणैरित्यावासकमनुयोगद्वारोक्तलक्षणं तत्रोद्युक्ताः=तत्पराः** ॥५३॥

**खर-फरुस-कक्कसाए, अणिट्ठ-दुट्ठाइ[१] निट्ठुरगिराए ।**
**निब्भच्छण-निद्धाडणमाईहिं न जे पउस्संति ॥५४॥**

खरपरुषकर्कशया अनिष्टदुष्टया निष्ठुरगिरा ।
निर्भत्सननिर्धाटनादिभिः न ये प्रद्विषन्ति ॥५४॥

व्याख्या – खरपरुषकर्कशया **गिरा** अनिष्टदुष्टया **गिरा** निष्ठुरगिरा निर्भर्त्सन-निर्द्धाटनादिभिश्च, **मोऽलाक्षणिकः**, 'ये' **मुनयो** 'न प्रद्विष्यन्ति' **न प्रद्वेषं यान्ति ते सुसाधवो गणयोग्या इति, तत्र खरा=रे मूढ ! रे अपण्डित! इत्यादिका**, परुषा=**रे प्रमादिन् ! रे कुशील ! रे सामाचारीभञ्जक ! इत्यादिका**, कर्कशा=**रे जिनाज्ञाभञ्जक ! रे उत्सूत्रभाषक ! रे व्रतभञ्जक ! इत्यादिका**, अनिष्टा=**रे पापिष्ठ ! मुखं मा दर्शय, रे निर्दय ! इतो व्रज, रे वीरवचनोल्लङ्घक! स्वस्थानं कुरु इत्यादिका**, दुष्टा=**रे आचारतस्कर ! रे जिनप्रवचननगरप्राकारच्छिद्रकर्त्तः ! रे जिनागमकोशार्थरत्नचौर ! इत्यादिका**, निष्ठुरा=**रे सूत्रार्थोभयप्रत्यनीक ! रे निह्नवकुशीलसङ्गकर्त्तः ! रे जिनाज्ञारामच्छेदक ! इत्यादिका**, निर्भर्त्सनम्=**अङ्गुल्यादिना तर्जनं**, निर्द्धाटनं=**वसति-गणादिभ्यो निष्काशनं, आदिशब्दात्तच्चिन्ताकरणादिकं, यद्वा प्रवाहेणैकार्थिका एते शब्दाः, यद्वाऽन्योऽपि यः सत्परम्परागतोऽर्थः स सङ्ग्राह्य एवेति** ॥५४॥

---

१. '०दुट्ठाए' **D-E-F-G-H**-प्रतपाठः, अत्र **A-B-C**-प्रतपाठः ।

**जे अ न अकित्तिजणए, नाऽजसजणए, नाऽकज्जकारी य ।**
**न पवयणुड्डाहकरे, कंठग्गयपाणसेसेऽवि ॥५५॥**

ये च नाकीर्तिजनका नायशोजनका नाकार्यकारिणश्च ।
न प्रवचनोड्डाहकराः कण्ठगतप्राणशेषेऽपि ॥५५॥

व्याख्या – 'ये' **गणमुनयः नाकीर्त्तिजनकाः नायशोजनकाः, चकारान्नावर्णजनकाः, नाशब्दजनकाः, नोऽश्लाघाजनकाः, तत्र सर्वदिग्व्याप्यसाधुवादोऽ**कीर्त्तिः, अयशो=**निन्दनीयतादि, एकदिग्व्याप्यसाधुवादो**ऽवर्णः, **अर्द्धदिग्व्याप्यसाधुवादो**ऽशब्दः, **तत्स्थान एवासाधुवादो**ऽश्लाघेति, 'नाकार्यकारिणः' **नासदनुष्ठानकर्त्तारः** 'न प्रवचनोड्डाहकराः' **न प्रवचनमालिन्यकर्त्तारः, कण्ठे गतः=प्राप्त आगत इत्यर्थः कण्ठगतः प्राणानां–जीवस्य शेषो यत्र, अधस्तनप्रदेशाकर्षणेन बहुप्रदेशबहिःकर्षणेन, एवंविधेऽप्यवसरे ये ईदृग्विधास्ते सुन्दरान्तेवासिनः, यद्वा कण्ठगतः=कण्ठागतः प्राणस्य=बलस्य शेषो यत्र, एवंविधेऽप्यवसरे ये ईदृग्विधास्ते धन्या इति** ॥५५॥

**गुरुणा कज्जमकज्जे खर-कक्कस-दुट्ठ-निट्ठुरगिराए ।**
**भणिए तहत्ति [१]सीसा भणंति तं गोयमा ! गच्छं ॥५६॥**

गुरुणा कार्याकार्ये खरकर्कशदुष्टनिष्ठुरगिरा ।
भणिते तथेति शिष्याः, भणन्ति स गौतम ! गच्छः ॥५६॥

व्याख्या – 'गुरुणा' **स्वाचार्येण कार्यं चाकार्यं च कार्याकार्यं तस्मिन्, मकारोऽलाक्षणिकः, यत्कृत्यं गुरवो जानन्ति शिष्योऽपि जानाति तत्कार्यमुच्यते, यत्कृत्यं गुरवो जानन्ति न तु शिष्यः** तदकार्यं, **अन्यथोत्तमानां किमपि बाह्यान्तरकार्यं विना जल्पनं न संभवतीति, यद्वा कार्यं=सनिमित्तं अकार्यं=प्रधाननिमित्तरहितमिति ।** 'खरकर्कशदुष्टनिष्ठुरगिरा' **पूर्वोक्तशब्दार्थया** 'भणिते' **कथिते सति** 'तहत्ति'**त्ति तथेति यथा येन प्रकारेण यूयं वदथ तथा तेन प्रकारेणेति** 'शिष्याः' **सुविनेयाः** 'भणन्ति' **कथयन्ति यत्र तं** गच्छं **हे** गौतम ! **त्वं जानीहीति, सिंहगिरिगुरुशिष्यवदिति** ॥५६॥

---

१. 'सीसे' **F-G**-प्रतपाठः ।

**दूरुज्झियपत्ताइसु ममत्तए, निप्पिहे सरीरेऽवि ।**
**जायमजायाहारे बायालीसेसणाकुसले ।।५७।।**

दूरोज्झितपात्रादिममत्वो निस्पृहः शरीरेऽपि ।
जाताजाताहारः द्विचत्वारिंशदेषणाकुशलः ।।५७।।

व्याख्या – 'दूरुज्झिय'त्ति **प्राकृतत्वाद्विभक्तिलोपः दूरतस्त्यक्तं** ममत्वं, **क्व? - पात्रादिषु, आदिशब्दाद्वस्तु-वसति-श्राद्ध-नगर-ग्राम-देशादिषु यैरिति शेषः, तथा** 'निःस्पृहाः' **ईहारहिता मेघकुमारादिवत्** 'शरीरेऽपि' **स्ववपुष्यपि,** 'यात्रामात्राहारकाः' **तत्र** यात्रा=**संयमगुरुवैयावृत्त्यस्वाध्यायादिरूपा** मात्रा तु=**तदर्थमेव पुरुषस्त्रीषण्ढानां द्वात्रिंशदष्टाविंशतिचतुर्विंशतिक्रमेण कवलप्रमाणमध्यात्परिमिताहारग्रहणमिति, कवलप्रमाणं च कुक्कुट्यण्डं, कुक्कुट्या अण्डं कुक्कुट्यण्डं, कुक्कुटी द्विधा-द्रव्यभावभेदतः, द्रव्यकुक्कुटी द्विधा-उदरकुक्कुटी १ गलकुक्कुटी च २, तत्र साधोरुदरं यावन्मात्रेणाहारेण न न्यूनं नाप्याध्मातं स आहार एव उदरकुक्कुटी, उदरपूरकाहार इत्यर्थः, तस्य द्वात्रिंशत्तमो भागोऽण्डकं, तत्प्रमाणं कवलस्य १, गल एव कुक्कुटी तस्या अन्तरालमण्डकं** २, अयं भावः-**अविकृतास्यस्य पुंसो गलान्तराले यः कवलोऽविलग्नः प्रविशति तत्प्रमाणं कवलस्य,** ★[1]**अथवा–शरीरमेव कुक्कुटी तन्मुखमण्डकम्, तत्राक्षिकपोलभ्रुवा विकृतिमनापाद्य यः कवलो मुखे प्रविशति तत्प्रमाणं कवलस्य । अथवा–कुक्कुटी पक्षिणी, तस्या अण्डकं तत्प्रमाणं कवलस्य** १ ।★ **भावकुक्कुटी तु येनाहारेण भुक्तेन न न्यूनं नाप्यत्याध्मातं स्यादुदरं धृतिं च समुद्वहति तावत्प्रमाण आहारो भावकुक्कुटीति** २ ।

**यद्वा** 'जायमजायाहारे'**त्ति जाताजाताहारपारिष्ठापनिकायां कुशलाः=निपुणा इत्यर्थः, तत्राधाकर्मणा लोभाद् गृहीतेन विषमिश्रेण मन्त्रादिसंस्कृतेन दोषेण च जातोच्यते, आचार्यग्लानप्राघूर्णकार्थे दुर्लभद्रव्ये सहसालाभे सत्यधिकग्रहणेऽजातोच्यत इति । अथवा जातो=गुरुग्लानादियोग्य आहार उत्पन्नस्तद्रक्षणे निपुणाः, तत्र वा निःस्पृहाः, अजातो=गुरुग्लानादियोग्य आहारः अनुत्पन्नस्तदुत्पादने कुशला इति ।**

**तथा** 'द्विचत्वारिंशदेषणाकुशलाः' **तत्रैषणा चतुर्धा, कस्याप्येषणेति नामेति** नामैषणा

---

१. '★......★' एतच्चिन्हान्तर्गतः पाठः पूर्वमुद्रिते लुप्तः, अत्र हस्तादर्शानुसारेण विन्यस्तः ।

१, **एषणावतः साध्वादेरियमेषणेति स्थापनेति** स्थापनैषणा २, द्रव्यैषणा **सचित्ताचित्त-मिश्रद्रव्यभेदात्त्रिधा** ३, भावैषणाऽपि **गवेषणा १ ग्रहणैषणा २ ग्रासैषणा ३ भेदात्त्रिधा, तत्र गवेषणायामाधाकर्मादिधात्र्यादिद्वात्रिंशद्दोषाः, ग्रहणैषणायां शङ्कितादिदशदोषाः, ग्रासैषणायां संयोजनादिपञ्चदोषा विज्ञेया इति** ॥५७॥

**तं पि न रूव-रसत्थं, न य वण्णत्थं, न चेव दप्पत्थं ।**
**संजमभरवहणत्थं, अक्खोवंगं व वहणत्थं ॥५८॥**

तमपि न रूपरसार्थं न च वर्णार्थं न चैव दर्पार्थम् ।
संयमभारवहनार्थम्, अक्षोपाङ्गमिव वहनार्थम् ॥५८॥

व्याख्या – 'तमपि' **आहारं** 'न रूपरसार्थं' **तत्र रूपं=शरीरलावण्यं रसश्च= भोजनास्वादस्तदर्थं न** 'न च वर्णार्थं' **न च शरीरकान्त्यर्थमित्यर्थः**, 'न चैव दर्पार्थं' **न चानङ्गवृद्ध्यर्थं, भुञ्जीतेति शेषः, किन्तु** 'संयमभारवहनार्थं' **चारित्रभारवहनार्थं भुञ्जीत, किमिव ?**-अक्षोपाङ्गमिव वहनार्थम्, **एतदुक्तं भवति-यथाऽभ्यङ्गं शकटाक्षे युक्त्या दीयते न चातिबहु न चातिस्तोकं भारवहनार्थं साधूनामाहारः** ॥५८॥

**तमपि कारणे भुङ्क्ते, अतः कारणमाह –**

**वेअण १ वेयावच्चे २, इरिअट्ठाए य ३ संजमट्ठाए ४ ।**
**तह पाणवत्तिआए ५, छट्ठं पुण धम्मचिंताए ६ ॥५९॥**

वेदनावैयावृत्त्येर्यार्थं च संयमार्थम् ।
तथा प्राणप्रत्ययार्थं षष्ठं पुनो धर्मचिन्तार्थम् ॥५९॥

व्याख्या – **क्षुद्वेदनोपशमनाय भुङ्क्ते, यतो नास्ति क्षुत्सदृशी वेदना, उक्तञ्च-**

**"पंथसमा नत्थि जरा, दारिद्दसमो परिभवो नत्थि ।**
**मरणसमं नत्थि भयं, छुहासमा वेयणा नत्थि ॥१॥"**

[पिण्डनिर्यु० ६६३-वृत्तौ]

**अतस्तत्प्रशमनार्थं भुञ्जीत** १, **बुभुक्षितः सन् वैयावृत्त्यं कर्त्तुं न शक्नोति, अतो गुरुग्लानशैक्षादिवैयावृत्त्यकरणाय भुञ्जीत** २, 'ईर्यार्थं' **ईर्यासमित्यर्थं** ३,

संयमः=प्रत्युपेक्षणा-प्रमार्जनादिलक्षणः साधुव्यापारस्तत्पालनार्थं, बुभुक्षित एनं कर्त्तुं न शक्नोतीति कृत्वा ४, तथा प्राणाः=जीवितं तेषां वृत्त्यर्थं=रक्षार्थं परिपालन-निमित्तमित्यर्थः ५, षष्ठं पुनर्धर्मचिन्तार्थम्, सूत्रार्थानुचिन्तनादिलक्षणं शुभचित्त-प्रणिधानं, एतदपि बुभुक्षितः कर्त्तुं न शक्नोतीति कृत्वा भुञ्जीतेति शेषः ६ ॥५९॥

**जत्थ य जिट्ठ-कणिट्ठो, जाणिज्जइ जिट्ठवयणबहुमाणो[1] ।**
**दिवसेणवि जो जिट्ठो, न य हीलिज्जइ स गोअमा ! गच्छो ॥६०॥**

यत्र च ज्येष्ठः कनिष्ठो ज्ञायते ज्येष्ठवचनबहुमानः ।
दिवसेनापि यो ज्येष्ठो, न च हील्यते स गौतम ! गच्छः ॥६०॥

व्याख्या – यत्र **गणे 'ज्येष्ठः' व्रतपर्यायेण वृद्धः 'कनिष्ठः' दीक्षापर्यायेण लघुः, चशब्दान्मध्यमपर्यायोऽपि,** ज्ञायते**=अयं ज्येष्ठः अयं लघुः अयं मध्यमः इत्येवं प्रकटत्वेन विज्ञायते, कस्मात् ज्ञायते ?** – ज्येष्ठवचनबहुमानात्**=हे आर्य ! हे पूज्य ! हे भदन्त ! हे पसाउकरी ! इत्यादिजल्पनात्, यद्वा** ज्येष्ठस्य**=पर्यायगुणैर्वृद्धस्य** वचनम्**=आदेशो ज्येष्ठवचनम् तस्य तस्मिन् वा** बहुमानं**=सन्मानं यत् पूज्यैः प्रतिपादितं तत्तथेत्येवं ज्ञायत इति, तथा यत्र** दिवसेनापि यो ज्येष्ठः **स** न हील्यते **वचनोल्लङ्घन-सम्मुखजल्पन-मर्मोद्घाटनादिप्रकारेण चकाराद् यत्र पर्यायेण लघुतरोऽपि गुणवृद्धो न हील्यते, वज्रं प्रति सिंहगिरिशिष्यरत्नवृन्दवत्** हे गौतम ! स गच्छ **इति** ॥६०॥

**अथाऽऽर्याधिकारमाह –**

**जत्थ य अज्जाकप्पो[2], पाणच्चाएवि रोरदुब्भिक्खे ।**
**न य परिभुंजइ[3] सहसा, गोयम ! गच्छं तयं भणियं ॥६१॥**

यत्र चार्याकल्पः प्राणत्यागेऽपि रौरदुर्भिक्षे ।
न च परिभुज्यते सहसा, गौतम ! गच्छः स भणितः ॥६१॥

व्याख्या – यत्र च **गणे** आर्याकल्पः**=साध्व्यानीतं रोरदुर्भिक्षे प्राणत्यागेऽपि** 'सहस'**त्ति सिद्धान्तोक्तविधिमकृत्वा न परिभुज्यते, यद्वा यत्र च गणे आर्याकल्पः=**

---

१. 'जेट्ठवयण०' इति E-प्रते, 'जेट्ठविणय-बहुमाणा' D-F-G-H-प्रते, अत्र पुनः A-B-C-प्रतपाठः ।
२. '०कप्पं' D-F-G-H-प्रते । ३. 'परिभुज्जइ' E-F-प्रते ।

साध्व्यानीतमशनादिकमित्यर्थः सहसेत्युत्सर्गमार्गेण न परिभुज्यते, अपवादे तु परिभुज्यते, जङ्घाबलक्षीणश्रीअन्यकापुत्राचार्यादिवत्, हे गौतम ! 'गच्छ:' गणः 'तयं'ति सः मया भणितः, आर्षत्वादत्र विभक्तिपरिणामः । अस्या गाथाया व्याख्यानमन्यदपि जिनाज्ञापूर्वकं कर्त्तव्यमिति ॥६१॥

अथोत्सर्गेण जल्पनपरिचयादिकं निवारयन्नाह –

**जत्थ य अज्जाहिं समं थेरावि न [1]उल्लवंति गयदसणा ।**
**न य झायंति थीणं, अंगोवंगाइं तं गच्छं ॥६२॥**

यत्र चार्याभिः समं, स्थविरा अपि नोल्लपन्ति गतदशनाः ।
न च ध्यायन्ति स्त्रीणा-मङ्गोपाङ्गानि स गच्छः ॥६२॥

व्याख्या – यत्र **गणे** 'आर्याभिः' **साध्वीभिः** 'समं' **सार्द्धं चकाराद्रण्डागत-कान्तादिभिः स्त्रीभिः सार्द्धं च, तरुणाः साधव आस्ताम्**, स्थविरा अपि 'नोल्लपन्ति' **न निष्कारणमालापसंलापादिकं कुर्वन्तीत्यर्थः, स्थविरास्त्रिधा-तत्र षष्टिवर्षजाता** जातिस्थविराः १, **समवायधराः** श्रुतस्थविराः २, **विंशतिवर्षपर्यायाः** पर्यायस्थविराः ३, **किंभूताः ? – गताः=प्रनष्टा दशनाः=दन्ता येषां ते** गतदशनाः, 'न ध्यायन्ति' **न सरागदृष्ट्या चिन्तयन्तीत्यर्थः**, 'स्त्रीणां' **नारीणां, कानि ? –** 'अङ्गोपाङ्गानि' **तत्र अङ्गान्यष्टौ बाहुद्वय २ ऊरुद्वय ४ पृष्ठि ५ शिरो ६ हृदयो ७ दर ८ लक्षणानि, उपाङ्गानि=कर्णनासिकादीनि, चकारान्न विलोकयन्ति, कदाचिद् दृष्ट्वाऽपि नान्यस्मिन् वर्णयन्ति स गच्छ इति** ॥६२॥

किञ्च –

**वज्जेह अप्पमत्ता !, अज्जासंसग्गि अग्गिविससरिसी ।**
**अज्जाणुचरो साहू, लहइ अकित्तिं खु अचिरेण ॥६३॥**

वर्जयताप्रमत्ताः ! आर्यासंसर्गीः अग्निविषसदृशीः ।
आर्यानुचरः साधुर्लभतेऽकीर्तिं खु अचिरेण ॥६३॥

व्याख्या – 'वर्जयत' **मुञ्चत** 'अप्रमत्ताः' **प्रमादवर्जिताः सन्तो यूयं, कम् ? –**

१. 'उल्लविंति' A-D-E-F-G-H-प्रते ।

'आर्यासंसर्गं' **एकान्तसाध्वीपरिचयादिकमित्यर्थः, किंभूतं ?** - 'अग्निविषसदृशं' **यथाऽग्निना सर्वं भस्मसात्स्यात्तथाऽऽसां संयोगे चारित्रं भस्मसाद्भवति, यथा च तालपुटविषं जीवानां प्राणनाशकरं भवति तथाऽऽसां परिचयश्चारित्रप्राणनाशकरः, कूलवालुकवत् । तथा** 'आर्यानुचरः' **आर्या=साध्वी तस्या अनुचरः=किङ्करः, कः ?** - 'साधुः' **मुनिः** 'लभते' **प्राप्नोति** 'अकीर्तिं' **असाधुवादं यथा-**'**अहो साधुत्वं अहो तपोधनत्वं अहो त्यक्तगृहगृहिणीसङ्गत्वं अहो शिवमार्गसाधकत्वं अहो इन्द्रियबाधकत्व-मित्याद्यवर्णवादरूपं** 'खु' **यस्मादर्थे** 'अचिरेण' **इति स्तोककालेन, अतो हे मुनयः ! आर्यासंसर्गं वर्जयतेति ॥६३॥**

**थेरस्स तवस्सिस्स व, बहुस्सुअस्स व पमाणभूयस्स ।**
**अज्जासंसग्गीए, जणजंपणयं [1]हविज्जाहि ॥६४॥**

स्थविरस्य तपस्विनो वा, बहुश्रुतस्य वा प्रमाणभूतस्य ।
आर्यासंसर्ग्या जनवचनीयता भवेत् ॥६४॥

व्याख्या – 'स्थविरस्य' **वृद्धस्य** 'तपस्विनो वा' **अष्टमादितपोयुक्तस्य वा** 'बहुश्रुतस्य' **अधीतबह्वागमस्य वा** 'प्रमाणभूतस्य' **सर्वजनमान्यस्य एवंविधस्य साधोरपि** 'आर्यासंसर्गेण' **बहुतमसाध्वीपरिचयेन 'जणजंपणयं'ति लोकमध्येऽपकीर्तिलक्षणं भवेत् यथा-'एष सुलक्षणो न' इति ॥६४॥**

**किं पुण तरुणो अबहुस्सुओ अ न य वि हु विगिट्ठतवचरणो ।**
**अज्जासंसग्गीए, जणजंपणयं न पाविज्जा ? ॥६५॥**

किं पुनस्तरुणोऽबहुश्रुतश्च न चापि हु विकृष्टतपश्चरणः ।
आर्यासंसर्ग्या जनवचनीयतां न प्राप्नुयात् ? ॥६५॥

व्याख्या – **किं पुनः** 'तरुणः' **युवा, किंभूतः ?** - 'अबहुश्रुतः' **आगमपरि-ज्ञानरहितः, चकारान्न देशादौ मुख्यत्वेन प्रवृत्तः,** न चापि हु विकृष्टतपश्चरणो=**न दशमादितपःकर्त्ता, एवंविधो मुनिः** 'आर्यासंसर्ग्या' **निष्कारणं मुण्ड्या सह विकथा-परिचयादिकरणेन** 'जनवचनीयतां' **लोकापवादलक्षणां** किं न प्राप्नुयात् ?, **अपि तु**

---

१. 'हवेज्जाहि' D-E-F-G-H-प्रते ।

प्राप्नुयादित्यर्थः ॥६५॥

[1]जइवि सयं थिरचित्तो, तहावि सं[2]सग्गिलद्धपसराए ।
अग्गिसमीवे व घयं, विलिज्ज चित्तं खु अज्जाए ॥६६॥

यद्यपि स्वयं स्थिरचित्तस्तथापि संसर्ग्या लब्धप्रसरया ।
अग्निसमीपे इव घृतं, विलीयते चित्तं खु आर्यया ॥६६॥

व्याख्या – **यद्यपि** 'स्वयं' **आत्मना** 'स्थिरचित्तः' **दृढाध्यवसायः साधुस्तथाऽपि तस्य मुनेः** संसर्ग्या=**गमनागमनादिरूपया लब्धः=प्राप्तः प्रसरः=अवसरो घटीद्वि-घट्यादिवार्त्तालापादिरूपो यया सा तथा तया** आर्यया अग्निसमीपे घृतवत् विलीयते **रागवद्भवतीत्यर्थः** 'चित्तं' **साधोः साध्व्यध्यवसानरूपं** 'खु' **निश्चयेनेति** ॥६६॥

सव्वत्थ [3]इत्थिवग्गंमि, अप्पमत्तो सया अवीसत्थो ।
नित्थरइ बंभचेरं, तव्विवरीओ न नित्थरइ ॥६७॥

सर्वत्र स्त्रीवर्गेऽप्रमत्तः सदा अविश्वस्तः ।
निस्तरति ब्रह्मचर्यं, तद्विपरीतो न निस्तरति ॥६७॥

व्याख्या – 'सर्वत्र' **दिवानिशागृहाङ्गणमार्गादिषु** 'स्त्रीवर्गे' **अनाथरण्डामुण्ड्यादि-रामावृन्दे** 'अप्रमत्तः' **रामाभिः सह निद्राविकथादिप्रमादरहितः सन्** 'सदा' **सर्वकालं** 'अविश्वस्तो' **विश्वासरहितो रामासु एवंविधो** 'निस्तरति' **निरतीचारं पालयतीत्यर्थः, किम् ?** – 'ब्रह्मचर्यं' **मैथुनत्यागरूपं**, 'तद्विपरीतः' **उक्तविपर्यस्तो** 'न निस्तरति' **न ब्रह्मचर्यं पालयतीत्यर्थः** ॥६७॥

[4]सव्वत्थेसु विमुत्तो, साहू सव्वत्थ होइ [5]अप्पवसो ।
सो होइ अणप्पवसो, अज्जाणं अणुचरंतो उ ॥६८॥

सर्वार्थेषु विमुक्तः साधुः सर्वत्रात्मवशो भवति ।
स भवत्यनात्मवशो आर्यायाः अनुचरन् तु ॥६८॥

---

१. 'जयवि' G-प्रते । २. '०सग्गल०' F-प्रते । ३. 'अत्थि०' G-प्रते । ४. 'सव्वत्तो वि विमुत्तो' F-प्रते । ५. 'अपवेसो' F-G-प्रते ।

व्याख्या – 'सर्वार्थेषु' **सर्वहेयपदार्थेषु** 'विमुक्तः' **ममतादिरहितः** 'साधुः' **मोक्षसाधकः** 'सर्वत्र' **क्षेत्रकालद्रव्यभावादिषु भवति** 'आत्मवशः' **न कुत्रापि परवशो भवतीत्यर्थः**, 'सः' **मुनिर्भवति** 'अनात्मवशः' **परवशः य आर्याणां** 'अनुचरत्वं कुर्वन्' **सेवकत्वं निष्पादयन् तिष्ठतीति** ॥६८॥

**अत्र दृष्टान्तमाह –**

**खेलपडिअमप्पाणं, न तरइ जह मच्छिआ विमोएउं ।**
**अज्जाणुचरो साहू, न तरइ [१]अप्पं विमोएउं ॥६९॥**

श्लेष्मपतितमात्मानं, न शक्नोति यथा मक्षिका विमोचयितुम् ।
आर्यानुचरः साधुर्न शक्नोत्यात्मानं विमोचयितुम् ॥६९॥

व्याख्या – **श्लेष्मपतितमात्मानं** 'न तरति' **न शक्नोति यथा मक्षिका** 'मोचयितुं' **पृथक् कर्तुम्, स्थानान्तरे गन्तुमित्यर्थः, एवं** 'आर्यानुचरः' **साध्वीपाशबद्धपादः साधुः** 'न तरति' **न शक्नोति** 'आत्मानं विमोचयितुं' **स्वेच्छया ग्रामादिषु विहर्त्तुमित्यर्थः** ॥६९॥

**साहुस्स नत्थि लोए अज्जासरिसी हु बंधणे उवमा ।**
**धम्मेण सह [२]ठवंतो, नयसरिसो जाण[३] असिलेसो ॥७०॥**

साधोर्नास्ति लोके, आर्यासदृशी हु बन्धने उपमा ।
धर्मेण सह स्थापयतो नयसदृशो जानीह्यश्लेषः ॥७०॥

व्याख्या – 'साधोः' **मुनेः** 'नास्ति' **न विद्यते, क्व ?** – 'लोके' **प्राकृतजने** 'आर्यासदृशी' **साध्वीतुल्या** 'हुः' **निश्चितं** 'बन्धने' **पाशलक्षणे** 'उपमा' **तत्सदृशं वस्त्वित्यर्थः, अपवादापवादमाह**–'जाण'**त्ति याः साध्वीः संयमभ्रष्टा धर्मेण सह स्थापयन् साधुः** 'नयसदृशः' **आगमवेदीत्यर्थः** 'अश्लेषः' **अबन्धको ज्ञातव्य इति, "क्वचिद्द्वितीयादेः" इति प्राकृतसूत्रेण जाणेत्यत्र द्वितीयार्थे षष्ठी । अथवा** 'धर्मात्' **श्रुतचारित्रात् काञ्चिद् भ्रष्टां** 'ज्ञात्वा' **दृष्ट्वा तत्पार्श्वे गच्छोपदेशपरिचयादिकं कृत्वा**

---

१. 'अप्पा वि' **E-F-G**-प्रते । २. 'उवेंतो' **E-F**-प्रते । ३. 'जाणयसिलेसा' **E**-प्रते, 'जाणयसिलेसो' **C**-प्रते, 'जाणगसिलेसो' **F-H**-प्रते, अत्र पुनः **A-B-D-G**-प्रतपाठः ।

'धर्मेण सह' **श्रुतचारित्रलक्षणेन सह स्थापयन्, उपलक्षणत्वात् अतीवगहनवृक्षदुर्गे व्याघ्रसिंहादिश्वापददुर्गे म्लेच्छादिभयमनुष्यदुर्गे गर्त्तापाषाणादिविषमस्थाने विषमपर्वते वा प्रस्खलमानां सर्वगात्रैः पतन्तीं वा बाह्वादावङ्के गृह्णन् सर्वाङ्गीणं वा धारयन् एवमुदकपङ्कादौ अपकसन्तीं अपोह्यमानां वा नष्टचित्तां दीप्तचित्तां लाभादिमदेन परवशीभूतहृदयां यक्षाविष्टां उन्मादप्राप्तां उपसर्गप्राप्तां संयत्या गृहस्थेन वा समं साधिकरणां [१]सप्रायश्चित्तां प्रायश्चित्तभयेन विषण्णां प्रायश्चित्तं वहन्तीं तपसा क्लान्तां वा सर्वाङ्गीणं धारयन् देशतः साहयन् वा** स्थानाङ्ग**पञ्चमस्थानकोक्तसभयादिकारणैरेकत्र तिष्ठन्नपि** 'नयसरिसो'**त्ति नयसदृशो भवति साधुः, कोऽर्थः ? - यथा नैगमादिभिः सप्तभिर्नयैः सूत्रं व्याख्यायमानं आज्ञां नातिक्रामति, एवमत्रापि जिनाज्ञां नातिक्रामति साधुः। तथा** 'जाण असिलेसो'**त्ति** 'अश्लेषः' **अबन्धकः** 'जाण'**त्ति ज्ञातव्यः, आर्षत्वात्तव्यप्रत्ययलोपोऽत्र, अशुभकर्मबन्धकारको न भवतीत्यर्थः । अस्या गाथाया अन्याऽपि यथागमं व्याख्या कार्येति ॥७०॥**

**पुनः साधुशिक्षाप्रदानेन गुणवर्णनेन च गुणस्वरूपमाह –**

**वायामित्तेणवि जत्थ, भट्ठचरित्तस्स निग्गहं विहिणा ।**
**बहुलद्धि[२]जुअस्सावी, कीरइ गुरुणा तयं गच्छं ॥७१॥**

वाङ्मात्रेणापि यत्र, भ्रष्टचरित्रस्य निग्रहो विधिना ।
बहुलब्धियुतस्यापि, क्रियते गुरुणा स गच्छः ॥७१॥

व्याख्या – वाङ्मात्रेणापि, **आस्तां क्रियया, भ्रष्टचारित्रस्य** विधिना निग्रहं यत्र **क्रियते यद्वा बहुलब्धियुक्तस्यापि स गच्छः,** 'वाङ्मात्रेण' **वचनव्यापारेण=रे कुशील ! रे अपण्डित ! रे जिनाज्ञाभञ्जक ! रे सद्गच्छमर्यादावल्लीकन्दकुद्दाल ! इत्यादिना, अपिशब्दान्मनसा यथा-अयं न संयमगुणकारी अतः शिक्षा देयेत्यादिचिन्तनेन, कायेन=करचालनशिरःकम्पनादिना यत्र गणे, कस्य ? -** 'भ्रष्टचरित्रस्य' **शिथिल-संयमस्य** 'निग्रहः' **दण्डः** 'विधिना' **सूत्रोक्तप्रकारेण, कथंभूतस्य ? -** 'बहुलब्धि-युक्तस्यापि' **आमर्शौषधिविण्मूत्रौषधिश्लेष्मौषध्यादिसहितस्यापि** 'क्रियते' **विधीयते**

---

१. 'सप्रायश्चित्तप्रायश्चित्तभयेन' इति पूर्वमुद्रिते, अत्र A-आदिप्रतपाठः । २. '०जुयस्सा वी' H-प्रते ।

'गुरुणा' स्वधर्माचार्येण 'तयं'ति स गच्छः । किञ्चिल्लब्धिस्वरूपं यथा -

"आमोसहि १ विप्पोसहि २ खेलोसहि ३ जल्लओसही ४ चेव ।
सव्वोसहि ५ संभिन्नसोय ६ ओही ७ रिउ ८ विउलमइलद्धी ९ ॥१॥

चारण १० आसीविस ११ केवली य १२ गणधारिणो १३ य पुव्वधरा १४ ।
अरहंत १५ चक्कवट्टी १६ बलदेवा १७ वासुदेवा य १८ ॥२॥

खीरमहुसप्पिआसव १९ कुट्ठयबुद्धी २० पयाणुसारी य २१ ।
तह बीयबुद्धि २२ तेअग २३ आहारग २४ सीयलेसा य २५ ॥३॥

वेउव्विदेहलद्धी २६ अक्खीणमहाणसी २७ पुलाया य २८ ।
परिणामतवविसेसेण एमाई हुंति लद्धीओ ॥४॥ [प्रव०सा० १४९२-१४९५]

भवसिद्धियपुरिसाणं एयाओ २८ हुंति भणियलद्धीओ ।
भवसिद्धिय-महिलाणवि जत्तिय जायंति तं वुच्छं ॥५॥

अरिहंत १ चक्कि २ केसव ३ बल ४ संभिन्ने य ५ चारणे ६ पुव्वा ७ ।
गणहर ८ पुलाय ९ आहारगं च १० न हु भवियमहिलाणं ॥६॥

अभवियपुरिसाणं पुण दस पुव्विल्ला उ केवलित्तं च ११ ।
उज्जुमई १२ विपुलमई १३ तेरस एयाउ न हु हुंति ॥७॥

अभवियमहिलाणं पुण एयाओ न हुंति भणियलद्धीओ १३ ।
महुखीरासवलद्धीवि नेव सेसा उ अविरुद्धा ॥८॥" [प्रव०सा० १५०५-१५०८]

इति ॥७१॥

**जत्थ य संनिहि-उक्खड-आहडमाईण नामगहणेऽवि ।**
**पूईकम्मा भीआ, आउत्ता कप्प-तिप्पेसु[1] ॥७२॥**

यत्र च सन्निध्युपस्कृत-आहृतादीनां नामग्रहणेऽपि ।
पूतिकर्मणः भीता आयुक्ताः कल्पत्रेपयोः ॥७२॥

१. '०तेप्पेसु' F-प्रते ।

व्याख्या – यत्र च गणे 'सन्निहि'त्ति आहारमनाहारं च तिलतुषमात्रमपि पानकं वा बिन्दुमात्रमपि तेषां निशास्थापनं संनिधिरुच्यते, संनिधिपरिभोगे रक्षणे च चतुर्गुरुः प्रायश्चित्तं आत्मसंयमविराधना अनवस्थाऽऽज्ञाभङ्गादिदोषाः गृहस्थतुल्यश्चेति, उक्तं च दशवैकालिके-

"लोभस्सेसमणुप्फासो, मन्ने अन्नयरामवि ।
जे सिया सन्निहीकामे, गिही पव्वइए न से ॥१॥" इति ।

[दशवै० अ.६/१८]

अत्र द्वितीयपदं निशीथचूर्णितो ज्ञेयमिति । 'उक्खड'त्ति औद्देशिकं, तच्चौघ-विभागभेदाद्द्विधा, तत्र स्वार्थाग्निज्वालन-स्थाल्यारोपणादिके व्यापारे यः कश्चिदा-गमिष्यति तस्य दानार्थं यत्क्रियते तदोघौद्देशिकं, विभागौद्देशिकं तु-उद्दिष्टकृतकर्मेति मूलभेदत्रयरूपं उद्देशसमुद्देशादेशसमादेशोत्तरभेदेन द्वादशविधम्, तत्र स्वार्थमेव निष्पन्नं भिक्षादानाय यत्प्रकल्पितं तदुद्दिष्टं १, यत्कृतोद्वृत्तं शाल्योदनादि दानाय करम्भः क्रियते तत्कृतं २, यत्कृतोद्वृत्तं मोदकचूर्णादि भूयः पाकगुडक्षेपेण दानाय मोदकाः क्रियन्ते तत्कर्म्म ३, तत्र च ये केचन अवपतन्ति तेभ्यो दातव्यमित्युद्देशः १, पाषण्डिनां दातव्यमिति समुद्देशः २, श्रमणानां=शाक्यादीनामादेशः ३, निर्ग्रन्थानाम्= आर्हतानां समादेश ४ इति । 'आहडमाईण'त्ति स्वपरग्रामादेर्जलस्थलपथेन पादाभ्यां नावादिना गन्त्र्यादिवाहनेन वा साध्वर्थं भक्तपानवस्त्रपात्राद्यानयनमभ्याहृतमुच्यते, तेषां, आदिशब्दात्पूतिव्यतिरिक्तानामन्येषां दोषाणां च, पूतिदोषस्त्वग्रे वक्ष्यमाणत्वात्, नामग्रहणेऽपि मुनयो भीता भवन्ति । 'पूईकम्म'त्ति आधाकर्मादि षोडशविध उद्गमः, स च सामान्यतो द्विधा-विशोधिकोटिः १ अविशोधिकोटिश्च २ । तत्राऽऽधाकर्म सभेदं १, विभागौद्देशिकस्य द्वादशविधस्यान्त्यं भेदत्रयं कर्मसमुद्देश १ कर्मादेश २ कर्मसमादेश ३ लक्षणं २, पूतिः=आधाकर्मलेशश्लेषः ३, मिश्रजातं=पाषण्डिगृहिमिश्रं साधुगृहिमिश्रं ४, बादरप्राभृतिका=गुर्वागमनं ज्ञात्वा विवाहादिलग्नस्याग्रतः पश्चा-त्करणलक्षणा ५, अध्यवपूरः=स्वगृहपाषण्डिमिश्रः स्वगृहसाधुमिश्रः ६, इयम-विशोधिकोटिः, अस्यां शुष्कसित्थेनाऽपि पूतिकर्म्म भवेत्, कल्पत्रये तु दत्ते शुद्ध्यति, उद्गमस्य शेषं दोषजालं विशोधिकोटिः, अस्यां मिलितायां यदि विवेकः कर्त्तुं

शक्यते तदा शुद्धिः, नो चेत् कल्पत्रयेणेति । तथा 'आउत्ता कप्पतिप्पेसु'त्ति कल्पत्रेपौ=असंसृष्टनीरादिना स्वस्वगच्छोक्तसमाचारीविशेषौ तयोरायुक्ताः, यद्वा आयुक्ता =उद्यमपराः, कयोः ? – कल्पश्च=पात्रवस्त्रक्षालनलक्षणः त्रेपश्च=अपानादिक्षालन-लक्षणः कल्पत्रेपौ तयोः कल्पत्रेपयोः, तत्र कल्पो जघन्यमध्यमोत्कृष्टभेदेन त्रिधा, कथम् ? – ओदनमण्डकयवक्षोदकुल्माषराजमाषचपलचपलिकावृत्तचनकसामान्य-चनकनिष्पावतुबरीमसूरमुद्गाद्यलेपकृदाहारे गृहीते पात्रे एको मध्ये कल्पः १ द्वितीयो बहिः २ तृतीयस्तु सर्वत्रेति कल्पत्रयं ३ जघन्यतः १, शाकपेयायवागूकोद्रवौदनराद्ध-मुद्गदाल्याद्यल्पलेपकृदाहारे गृहीते पात्रे कल्पत्रयं मध्ये तत एक बहिर्मध्ये च तत एकः सर्वत्रेति कल्पपञ्चकं मध्यमतः २, क्षीरदधिक्षीरपेयातैलघृतमुद्गपानकातीव-रसाधिके बहुलेपकृदाहारे गृहीते कल्पत्रयं मध्ये ततो द्वौ बहिर्मध्ये ततो द्वौ हस्तमुख-पात्रबहिर्मध्ये सर्वत्रेति कल्पसप्तकमुत्कृष्टतः ३, सामान्येन च सर्वत्रापि कल्पसप्तकं देयमिति वृद्धवादः, हस्ते तु मणिबन्धं यावत्कल्पा देया इति ।

त्रेपः=अपानादिक्षालनविधिः, तथा चोक्तं श्रीनिशीथसूत्रतृतीयचतुर्थोद्देशके-"जे भिक्खू वा भिक्खुणी वा उच्चारपासवणं परिठावेत्ता परं तिण्हं णावापूराणं आयमइ आयमंतं वा साइज्जइ" [नि०सू०४/१११] सूत्रम् । अस्य चूर्णिः-★[1]'णाव'त्ति पसति, ताहि तिहिं आयमियव्वं । अण्णे भणंति-अंजली । पढमं णावापूरं तिहा करेत्ता अवयवे विकिंचेति, बितियं★ णावापूरं तिहा करेत्ता सर्वावयवान् विसोहेइ, ततियं णावापूरं तिहा करेत्ता तिण्णि कप्पे करेइ, सुद्धं, अतो परं जइ तो 'मासलहुं'ति षट्कायवधदोषो बकुशत्वं च, कारणे तु – अतिरित्तेण आयमइ जेण वा निल्लेवं णिग्गंधं भवतीत्यर्थः । तथा कारणे तु मूत्रेणापि कल्पते, उक्तञ्च बृहत्कल्पे-"णो कप्पइ निग्गंथाण वा निग्गंथीण वा अण्णमण्णस्स मोयं आइयत्तए वा आयमित्तए वा णण्णत्थ गाढेसु वा रोगायंकेसु" [बृह०सू० ५/३७] व्याख्या – नो कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा अन्योऽन्यस्य=परस्परस्य मोकं=मूत्रमापातुं वा आचमितुं वा, किं सर्वथैव ?, नेत्याह-गाढाः=अहिविषविशूचिकादयः अगाढाश्च= ज्वरादयो रोगातङ्कास्तेभ्योऽन्यत्र न कल्पते, तेषु कल्पते इत्यर्थः [बृह० ५/३७-वृत्तौ] इति, एवंविधाः साधवो यत्र भवन्ति स गच्छः ॥७२॥

---

१. '★......★' एतच्चिन्हान्तर्गतपाठः पूर्वमुद्रिते लुप्तः, अत्र A-आदिप्रतानुसारेण विन्यस्तः ।

**मउए निहुअसहावे, हास-द्दवविवज्जिए विगहमुक्के ।**
**[1]असमंजसमकरंते, गोयरभूमऽट्ठ वि[2]हरंति ॥७३॥**

मृदुका निभृतस्वभावा हास्यद्रवविवर्जिता विकथामुक्ताः ।
असमञ्जसमकुर्वन्तः गोचरभूम्यर्थं(गोचरभूम्यष्टकं)विहरन्ति ॥७३॥

व्याख्या – **द्रव्यभावभेदान्मृदुका द्विधा, तत्र** द्रव्यमृदुकाः=**अर्कतूलादिकाः,** भावमृदुकाः=**सिद्धान्तयथोक्तकथकाः जिनोक्ते निःशङ्कादिस्वभावा वा,** 'निभृतस्वभावाः' **अपवादापवादागमश्रवणे गुरुणा विद्यामन्त्रादिरहस्ये कथितेऽपि गम्भीरस्वभावाः गुर्वादिना ताडिता अपि गुरुकुलावासे निश्चलचित्ता वा,** 'हास्यद्रवविवर्जिताः' **तत्र हास्यं=सामान्येन हसनं द्रवः=परोपहासः, यद्वा हास्यं=दन्तोद्घाटनादिना हसनं द्रवः= कर्करादिना क्रीडादिकरणं** 'विगहमुक्के' **विकथाविमुक्ताः** 'असमञ्जसं' **गुर्वाज्ञाभङ्गा-द्यन्यायम**कुर्वन्तः **गोरिव चरणं गोचरस्तस्य भूमिर्गोचरभूमिस्तदर्थं विहरन्ति,** अयं भावः-**ज्ञानादिप्रयोजने भ्रमन्ति न निष्प्रयोजनमिति । यद्वा गोचरभूमिः=अभिग्रहस्य द्वितीयो भेदस्तस्याष्टौ भेदास्तदर्थं विचरन्ति, उपलक्षणादन्येऽपि ग्राह्याः ।**

**स चाभिग्रहो द्रव्यक्षेत्रकालभावभेदाच्चतुर्धा, तत्र लेपकृतं जगारिप्रमुखमलेपकृतं वा वल्लादिकं द्रव्यमहं ग्रहीष्यामि, अमुकेन वा दर्वी-कुन्तादिना दीयमानमहं ग्रहीष्येऽयं** द्रव्याभिग्रहः १ ।

**क्षेत्राभिग्रहेऽष्टौ गोचरभूमयो, यथा-यस्यामेकां दिशमभिगृह्योपाश्रयान्निर्गतः प्राञ्जलेनैव पथा समश्रेणिव्यवस्थितगृहपङ्क्तौ भिक्षार्थं परिभ्रमन् तावद् याति यावत्पङ्क्तौ चरमगृहम्, ततो भिक्षामगृह्णन्नेवापर्याप्तेऽपि प्राञ्जलयैव गत्या प्रतिनिवर्त्तते सा** ऋज्वी १, **यत्र पुनरेकस्यां गृहपङ्क्तौ परिपाट्या भिक्षमाणः क्षेत्रपर्यन्तं गत्वा प्रत्यागच्छन् पुनर्द्वितीयस्यां गृहपङ्क्तौ भिक्षामटति सा** गत्वाप्रत्यागतिका २, **यस्यां तु वामगृहाद्दक्षिणगृहे दक्षिणगृहाच्च वामगृहे भिक्षां पर्यटति सा** गोमूत्रिका ३, **यस्यां तु त्रिचतुरादीनि गृहाणि विमुच्याग्रतः पर्यटति सा** पतङ्गवीथिका ४, **यस्यां तु साधुः क्षेत्रं पेटावच्चतुरस्रं विभज्य मध्यवर्त्तीनि च गृहाणि मुक्त्वा चतसृष्वपि दिक्षु**

---

१. 'असमंजसमकरिंते' A-आदिषु । २. 'वियरंति' E-G-प्रते ।

समश्रेण्या भिक्षामटति सा पेटा ५, अर्द्धपेटाऽप्येवमेव नवरमर्द्धपेटासदृशसंस्थानयोर्दिग्द्वयसंबद्धयोर्गृहश्रेण्योरत्र पर्यटति, ६ तथा शम्बूकः=शङ्खस्तद्वत् या वीथिः सा शम्बूका, सा द्वेधा-यस्यां क्षेत्रमध्यभागात् शङ्खावर्त्तया परिभ्रमणभङ्ग्या भिक्षां गृह्णन् क्षेत्रबहिर्भागमागच्छति साऽभ्यन्तरशम्बूका ७, यस्यां तु क्षेत्रबहिर्भागात्तथैव भिक्षामटन् मध्यभागमायाति सा बहिःशम्बूका ८ । तथा श्रीवीरस्योदुम्बरविषयः, अन्योऽपि स्वपरग्रामे गृहसङ्ख्याविषयः क्षेत्राभिग्रहः २ ।

अमुकवेलायां मया भिक्षार्थं गन्तव्यमिति कालाभिग्रहः ३ ।

तथा गायन रुदन् अपसरणं कुर्वन् संमुखमागच्छन् पराङ्मुखः अलङ्कृतोऽनलङ्कृतः पुरुषो यदि दास्यति तदा मया ग्राह्यमित्ययं भावाभिग्रहः ४ इति ॥७३॥

**मुणिणं नाणाभिग्गह-दुक्करपच्छित्तमणुचरंताणं ।**
**जायइ चित्तचमक्कं, देविंदाणं पि तं गच्छं ॥७४॥**

मुनीनां नानाभिग्रह-दुष्करप्रायश्चित्तमनुचरताम् ।
जायते चित्तचमत्कारो देवेन्द्राणामपि स गच्छः ॥७४॥

व्याख्या – 'मुनीन्' साधून् 'नानाऽभिग्रहं' पूर्वोक्तलक्षणं दुष्करप्रायश्चित्तं चानुचरतो दृष्ट्वेति गम्यते 'जायते' उत्पद्यते चित्ते=मनसि चमत्कारः=आश्चर्यं चित्तचमत्कारः, केषां ? - देवेन्द्राणामपि यत्रैवंविधा मुनयो भवन्ति स गच्छः ।

तत्र प्रायश्चित्तं दशधा-

आहारादिग्रहणोच्चारस्वाध्यायभूमिचैत्ययतिवन्दनार्थं पीठफलकप्रत्यर्पणार्थं कुलगणसङ्घादिकार्यार्थं च हस्तशताद्बहिर्निर्गमे आलोचना प्रायश्चित्तं भवति, आलोचना च गुरोः पुरतः प्रकटीकरणम् तेनैव शुद्धिः १, समितिगुप्तिप्रमादे गुर्वाशातनायां विनयभङ्गे इच्छाकारादिसामाचार्यकरणे लघुमृषावादादत्तादानमूर्च्छासु अविधिनाऽऽवासादिकरणे कन्दर्पहास्यविकथाकषायविषयानुषङ्गादिषु प्रतिक्रमणं प्रायश्चित्तं मिथ्यादुष्कृतं, तेनैव शुध्यति, न गुरुसमक्षमालोच्यते इति भावः २, सहसाऽनाभोगेन

वा संभ्रमभयादेर्वा सर्वव्रतातिचारेषु उत्तरगुणातिचारेषु वा दुश्चिन्तितादिषु कृतेषु वा मिश्रं प्रायश्चित्तम्, यद् गुरोः पुर आलोच्य तदादिष्टं मिथ्यादुष्कृतं दत्ते इति भावः ३, पिण्डोपधिशय्यादिकेऽशुद्धे ज्ञाते यद्वा कालातिक्रान्ते क्षेत्रातिक्रान्ते अनुद्गतेऽस्तमिते वा गृहीते कारणगृहीते [1]उद्धरिते वा भक्तादिके विवेकः प्रायश्चित्तम्, त्यजन् शुद्ध इत्यर्थः ५, नौनदीसन्तारसावद्यस्वप्नादिषु कायोत्सर्गः प्रायश्चित्तं ४, पृथ्व्यादीनां संघट्टादौ तपः प्रायश्चित्तं ६, यः षण्मासक्ष[2]पकोऽन्यो वा विकृष्टतपःकरणसमर्थस्तपसा गर्वितो भवति यथा–'किं ममानेन प्रभूतेनापि तपसा क्रियते ?' इति, तपःकरणासमर्थो वा ग्लानाऽसहबालवृद्धादिः तथाविधतपःश्रद्धानरहितो वा निष्कारणतोऽपवादरुचिर्वा भवति तस्य छेदः प्रायश्चित्तम्, अहोरात्रपञ्चकदशकादिक्रमेण पर्यायच्छेदः क्रियत इति भावः ७, आकुट्ट्या पञ्चेन्द्रियवधे दर्पेण मैथुने उत्सन्नविहारे इत्यादौ मूलं प्रायश्चित्तम्, पुनर्व्रतारोपणमिति भावः, भिक्षोर्नवमदशमप्रायश्चित्ताऽऽपत्तावपि मूलमेव दीयते ८, स्वपक्षे परपक्षे वा निरपेक्षप्रहारिणि करादिघातके वा अर्थादाने इत्यादौ अनवस्थाप्यार्हं प्रायश्चित्तम्, यावदुत्कृष्टं तपो नाचीर्णं तावद् व्रतेषु न स्थाप्यते पश्चात्तु स्थाप्यत इति भावः, एतत्प्रायश्चित्तमुपाध्यायस्यैव दीयते ९, तीर्थकरादीनां बहुश आशातनाकारिणि नृपघातके नृपाग्रमहिषीप्रतिसेवके स्वपरपक्षकषायविषयप्रदुष्टे स्त्यानर्द्धिनिद्रावति पाराञ्चिकप्रायश्चित्तम्, स त्वव्यक्तलिङ्गधारी जिनकल्पिकवत् क्षेत्राद्बहिः स्थाप्यते द्वादश वर्षाणि, यदि प्रभावनां करोति तदा शीघ्रमेव प्रवेश्यते गच्छे, शुद्धत्वात्, इदं च प्रायश्चित्तमाचार्यस्यैव दीयते १०, तत्रानवस्थाप्यस्तपः-पाराञ्चिकश्च प्रथमसंहननचतुर्दशपूर्वधरे गतौ, शेषाः पुनर्लिङ्गक्षेत्रकालानवस्थाप्य-पाराञ्चिता यावत्तीर्थं तावद्भविष्यन्तीति ॥७४॥

अथ जीवरक्षादिद्वारेण गच्छस्वरूपमाह –

पुढवि-दग-अगणि-मारुअ-वाउ-व[3]णस्सइ-[4]तसाण [5]विविहाणं ।
मरणंतेऽवि न पीडा, कीरइ मणसा तयं गच्छं ॥७५॥

---

१. 'उद्धरिते' इति पूर्वमुद्रिते, अत्र A-आदिप्रतपाठः । २. '०क्षमको०' इति पूर्वमुद्रिते अत्र A-आदिप्रतपाठः ।
३. '०वणप्फई०' A-आदिषु । ४. 'तह तसाण' D-E-F-आदिपाठः । ५. 'विविहजीवाणं' A-प्रते ।

पृथिव्युदका-ऽग्नि-मारुत-वायु-वनस्पति-त्रसानां विविधानाम् ।
मरणान्तेऽपि न पीडा क्रियते मनसा स गच्छः ॥७५॥

व्याख्या – **पृथ्वीदकाग्निमारुतानां, वाशब्द एषां भेदसूचकः, तुशब्दस्तु यतनासूचकः, वनस्पतित्रसाणां विविधानां मनसाऽपि मरणान्तेऽपि यत्र पीडा=बाधा न क्रियते स गच्छः ।**

**तत्र पृथ्वीकायस्त्रिधा - सचित्ताचित्तमिश्रभेदात्, सचित्तो द्विधा - निश्चय-व्यवहाराभ्याम्, रत्नशर्कराप्रभृतीनां महापर्वतानां हिमवदादीनां च बहुमध्ये यः स निश्चयतः** सचित्तः १, **शेषोऽरण्यादौ पृथ्वीकायः स व्यवहारसचित्तः, उदुम्बरादिक्षीरद्रुमाणामधः पथि च मिश्रः, हलकृष्टो यः स** [१]**तत्क्षणादेवाऽऽर्द्रोऽशुष्कः क्वचिन्मिश्रः** २, **शीतोष्णक्षारक्षत्राग्निलवणौषधकाञ्जिकस्नेहशस्त्रैरभिहतो**ऽचित्तः ३ ।

**तथाऽप्कायोऽपि त्रिधा, घनोदधिघनवलयकरकाः समुद्रमध्ये द्रहमध्ये च यः स निश्चयतः सचित्तः, शेषोऽगडादीनां व्यवहारतः** सचित्तः १, [२]**अनुद्वृत्ते त्रिदण्डे मिश्रं, वर्षे पतितमात्रं च मिश्रं, चाउलोदकं यावद्बहु प्रसन्नं निर्मलं न स्यात्तावन्मिश्रं** २, **बहुप्रसन्ने** त्वचित्तमेवेति ३ ।

**तथेष्टकापाकादिमध्यगो विद्युदादिकश्च नैश्चयिकः अङ्गारादिको व्यावहारिकः** सचित्तः १, **मुर्मुरादिको** मिश्रः २, **ओदनव्यञ्जनाचाम्लावश्रवणादिको**ऽचित्ताग्निकायः ३ ।

**तथा घनतनुवाता निश्चयतः सचित्ताः, अतिहिमपाते यो वायुः अतिदुर्दिने च स नैश्चयिकः सचित्तः, प्राच्यादिवायुर्व्यवहारतः सचित्तः, क्षेत्रतो वायुभृतो दृतिर्जले एकहस्तशतगतश्चेदचित्तः, द्वितीयहस्तशतप्रारम्भे मिश्रः, तृतीयहस्तशतप्रारम्भे सचित्तः, कालतः वायुपूरितो बस्तिः स्निग्धे उत्कृष्टमध्यमजघन्ये त्रिविधेऽपि काले एकद्वित्रिपौरुषीभिर्द्वित्रिचतुःपौरुषीभिस्त्रिचतुःपञ्चपौरुषीभिश्च यथाक्रममचित्तः मिश्रः सचित्तः स्यात्, रूक्षे त्रिविधेऽपि काले एकद्वित्रिभिर्द्वित्रिचतुर्भिस्त्रिचतुःपञ्चभिर्दिनैर्यथाक्रममचित्तः मिश्रः सचित्तः स्यात् ।**

---

१. 'तत्क्षणादेवाद्र्धोऽशुष्कः' इति पूर्वमुद्रिते, अत्र A-आदि । २. 'अनुद्धृते' इति पूर्वमुद्रिते - अत्र A-आदिप्रतपाठः ।

तथा सर्व एवानन्तवनस्पतिकायो निश्चयतः सचित्तः, शेषः प्रत्येकवनस्पतिर्व्यवहारतः सचित्तः १, प्रम्लानफलकुसुमपर्णानि मिश्राणि, लोट्टस्य मिश्रकालो यथा –

"पणदिण मीसो लोट्टो अचालिओ सावणे य भद्दवए १ ।
चउ आसोए कत्तिय २ मग्गसिरपोसेसु तिन्नि दिणा ३ ॥१॥

पण पहर माहफग्गुणि ४ पहरा चत्तारि चित्तवइसाहे ५ ।
जिट्ठासाढे तिपहर ६ अंतमुहुत्तं च चालियओ ॥२॥" [ ]

द्वीन्द्रियाः सकलजीवप्रदेशवन्तः सचित्ताः, विपर्ययादचित्ताः, जीवन्मृता एकत्र संमिलिता मिश्राः, एवं त्रीन्द्रियादयः ।

यतना यथा–पृथिव्युदकयोर्गमने प्राप्ते पृथिव्यां गम्यं उदके पृथ्वीत्रसादिसद्भावात् १, पृथिवीवनस्पत्योः पृथिव्यां गम्यं न वनस्पतौ तद्दोषस्यापि संभवात् २, पृथिवीत्रसयोस्त्रसरहिते विरलत्रसे वा गम्यं निरन्तरे तु पृथिव्यामेव ३, जलवनस्पतिकाययोर्वनस्पतिना गम्यं उदके नियमाद्वनस्पतिसद्भावात् ४, इत्यादि ॥७५॥

**खज्जूरिपत्तमुंजेण, जो पमज्जे उवस्सयं ।**
**नो दया तस्स जीवेसु, सम्मं जाणाहि, गोयमा ! ॥७६॥**

खर्जूरीपत्रेन मुञ्जेन य उपाश्रयं प्रमार्जयति ।
न दया तस्य जीवेषु, सम्यग् जानीहि गौतम ! ॥७६॥

व्याख्या – खर्जूरपत्रमयप्रमार्जन्या मुञ्जमयबहुकर्या वा 'यः' साधुः उपाश्रीयते=भज्यते शीतादित्राणार्थं यः स उपाश्रयस्तमुपाश्रयं प्रमार्जयति तस्य मुनेर्जीवेषु 'दया' घृणा नास्ति हे गौतम ! त्वं सम्यग् जानीहीति ॥७६॥

**जत्थ य [1]बाहिर[2]पाणिअ-बिंदूमित्तंपि गिम्हमाईसु ।**
**तण्हासोसिअपाणा[3], मरणेऽवि मुणी न गिण्हंति ॥७७॥**

---

१. 'बायर०' E-प्रते । २. '०पाणस्स बिंदुमि०' F-प्रते । ३. '०पाणे' F-प्रते ।

यत्र च बाह्यपानीयबिन्दुमात्रमपि ग्रीष्मादिषु ।
तृष्णाशोषितप्राणाः, मरणेऽपि मुनयो न गृह्णन्ति ॥७७॥

व्याख्या – **हे गौतम** ! यत्र च **गच्छे** 'बाह्यपानीयं' **तटाक-कूप-वापी-नद्यादि-सचित्तजलं** 'बिन्दुमात्रमपि' **जलकणमात्रकमपि, क्व** ? - ग्रीष्मादिषु **कालेषु, आदिशब्दाच्छीतवर्षाकालयोः**, तृष्णया=**द्वितीयपरीषहेण** शोषिताः=**ग्लानिं प्रापिताः** प्राणाः=**उच्छ्वासादयो येषां ते तृष्णाशोषितप्राणाः** प्राणान्तेऽपि 'मुनयः' **साधवो** न गृह्णन्ति **स गच्छ इति, खुड्डुकवत्** ॥७७॥

**इच्छिज्जइ जत्थ सया, बीयपएणावि फासुअं उदयं ।**
**आगमविहिणा निउणं, गोअम ! गच्छं तयं भणियं ॥७८॥**

इष्यते यत्र सदा द्वितीयपदेनापि प्रासुकमुदकम् ।
आगमविधिना निपुणं, गौतम ! गच्छः स भणितः ॥७८॥

व्याख्या – **हे इन्द्रभूते** ! 'इष्यते' **वाञ्छाक्रियते** 'यत्र' **गणे** 'सदा' **सर्वकालं उग्रपदापेक्षया द्वितीयमपवादपदं तेनापि प्रगता असवः=प्राणा जीवा यस्मात्तत्प्रासुकम्, किम्** ? - 'उदकं' **जलं** 'आगमविधिना' **आचाराङ्ग-निशीथादिसिद्धान्तोक्तप्रकारेण निपुणं यथा स्यात्तथा गच्छो भणितः** ॥७८॥

**जत्थ य सूल विसूइय अन्नयरे वा विचित्तमायंके ।**
**उप्पण्णे जलणुज्जालणाइ, [1]कीरइ न मुणि तयं गच्छं ॥७९॥**

यत्र च शूले विशूचिकायां अन्यतरस्मिन् वा विचित्रातङ्के ।
उत्पन्ने ज्वलनोज्ज्वालनादि, क्रियते न मुने ! स गच्छः ॥७९॥

व्याख्या – यत्र च **गणे** शूले विशूचिकायां **च, आर्षत्वाद्विभक्तिलोपः, अन्यतरस्मिन् वा** 'विचित्रे' **अनेकविधे** 'आतङ्के' **सद्योघातिरोगे** 'उत्पन्ने' **प्रादुर्भूते सति** ज्वलनस्य=**अग्नेरु**ज्ज्वालनं=**प्रज्वलनं ज्वलनोज्ज्वालनं, अग्न्यारम्भमित्यर्थः** मुनयो न कुर्वन्ति, **आदिशब्दादन्यदपि सदोषं**, स गच्छः, **आवश्यकोक्ताषाढाचार्यवदिति** ॥७९॥

---

१. 'न करेइ, तं गच्छं' A-D-E-H-प्रतपाठः ।

**बीयपएणं सारूविगाइ सङ्काइमाइएहिं च ।**
**कारिंती जयणाए, गोयम ! गच्छं[1] तयं भणियं ॥८०॥**

द्वितीयपदेन सारूपिकादि-श्राद्धादिआदिभिश्च ।
कारयन्ति यतनया, गौतम ! गच्छः स भणितः ॥८०॥

व्याख्या – 'द्वितीयपदेन' **अपवादपदेन सारूपिकादिभिः श्राद्धादिभिश्च कारयन्ति** 'यतनया' **निशीथादिग्रन्थोक्तयतनाकरणेन, यथा–"साहुणो सूलं विसूइया वा होज्जा, तो तावणे इमा जयणा-महापीडाए जत्थ अगणी अहाकज्जो झियाइ तत्थ गंतुं सूलादि तावेयव्वं जइ गिहवइणो अचियत्तं न भवइ, अहव गुज्झगाणि तावेयव्वाणि ताणि य गिहत्थपुरओ न सक्कंति तावेउं तो ण गम्मइ"** [नि०भा० २३२-चूर्णौ] **इत्यादियतनाविशेषो विशेषज्ञैर्विशेषसूत्राद्विज्ञेयः, तत्र प्रथमं मुण्डितशिराः शुक्ल-वासःपरिधायी कच्छां न बध्नीत अभार्याको भिक्षां हिण्डमानः** सारूपिकस्तस्य **समीपे, तस्याभावे सभार्याको वा शुक्लाम्बरधरो मुण्डितशिराः सशिखाको-ऽदण्डकोऽपात्रकः** सिद्धपुत्रकः, **तस्याभावे त्यक्तचारित्रः** पश्चात्कृतः, **तस्याभावे गृहीताणुव्रतः** श्राद्धः, **तस्याभावे भद्रकान्यतीर्थिकस्तस्य समीपे कारयन्त्यग्नियतनां यत्र हे इन्द्रभूते!** 'तयं'ति **स गच्छो भणितो मयेति** ॥८०॥

**पुप्फाणं बीआणं, तयमाईणं च विविहदव्वाणं ।**
**संघट्टण-परिआवण, जत्थ न कुज्जा तयं गच्छं ॥८१॥**

पुष्पानां बीजानां, त्वगादीनां च विविधद्रव्याणाम् ।
सङ्घट्टनं परितापनं, यत्र न कुर्यात् स गच्छः ॥८१॥

व्याख्या – **पुष्पाणि चतुर्विधानि-जलजानि १, स्थलजानि २ । तत्र** जलजानि=**सहस्रपत्रादीनि** १, स्थलजानि=**कोरण्टकादीनि** २ । **तान्यपि प्रत्येकं द्विविधानि-** वृन्तबद्धानि=**अतिमुक्तकादीनि** ३ नालबद्धानि **च=जातिपुष्पप्रभृतीनि** ४ । **तत्र यानि नालबद्धानि तानि सर्वाणि सङ्ख्येयजीवानि, यानि तु वृन्तबद्धानि तान्यसङ्ख्येय-जीवानि, स्नुह्यादीनां पुष्पाणि अनन्तजीवात्मकानि, तेषां पुष्पाणां, तथा बीजानि=**

**शालीगोधूमयवबरट्टादीनि तेषां बीजानां त्वगादीनां च, आदिशब्दात्तृणमूल-पत्राङ्कुर-फलादीनां, विविधसजीवद्रव्याणां** संघट्टनं=**स्पर्शनं** परितापनं=**सर्वतः पीडनं** यत्र न क्रियते स गच्छः ॥८१॥

**हासं[१] खेड्डा कंदप्प, नाहियवायं न कीरए जत्थ ।**
**धावण डेवण लंघण-ममकाराऽवण्णउच्चरणं ॥८२॥**

हास्यं खेला कान्दर्पी नास्तिकवादो न क्रियते यत्र ।
धावनं डेपनं लङ्घनं ममकारः अवर्णोच्चारणम् ॥८२॥

व्याख्या – 'हास्यं' **सामान्येन हसनं वक्रोक्त्या हसनं वा** 'खेड्डा'इति **क्रीडा बालकवद् गोलकादिना रमणमित्यर्थः, क्रीडा वाऽन्ताक्षरिका प्रहेलिकादानादिरूपा,** 'कंदप्प'**त्ति कन्दर्पभावना, उपलक्षणत्वात् किल्बिषिका-ऽऽभियोगिका-ऽऽसुरिक-मोहभावनाः, तत्र मायया परविप्रतारणवचनं वाऽट्टट्टहासहसनं अनिभृतालापाश्च गुर्वादिनाऽपि सह निष्ठुरवक्रोक्त्यादिरूपाः कामकथा कामोपदेशप्रशंसा कायचेष्टा वाक्चेष्टा परविस्मापकविविधोल्लापाः** तत्कन्दर्पभावना १, **सातरसर्द्धिहेतवे यन्मन्त्रयोग-भूतिकर्मादिकरणं** तदाभियोगिकभावना २, **यत् श्रुतज्ञानादेः केवलिनां धर्माचार्यस्य सङ्घस्य साधूनां च निन्दाकरणं** तत्किल्बिषिकभावना ३, **यन्निरन्तरक्रोधप्रसरः, यच्च पुष्टालम्बनं विनाऽतीतादिनिमित्तकथनं** तदासुरीभावना ४, **यदात्मवधार्थं शस्त्रग्रहणं विषभक्षणं भस्मीकरणं जलप्रवेशनं भृगुपातादिकरणं कारणं विना** तन्मोहभावना ५ । 'नाहियवायं'**ति नास्तिकवादः, यथा–'नास्ति जीवः नास्ति परलोकः नास्ति पुण्यं नास्ति पापं' इत्यादिकम्** 'नाहियवायं'**ति मायया परविप्रतारणवचनं वा** 'न क्रियते' **न विधीयते साधुभिर्यत्र गणे, तथा** 'धावनं' **सामान्येन वक्रगत्या गमनं, यद्वा** 'धावनं' **अकाले कारणं विना वर्षाकल्पादिक्षालनं** 'डेवनं' **वेगेनाश्ववद्गमनं कोशिकतापसवत्,** 'लङ्घनं' **वाहादिकोल्लङ्घनं अर्हन्मित्रसाधुवत्, यद्वा** 'लङ्घनं' **परस्पर-कलहेन क्रोधादिना श्राद्धोपरि वाऽन्नपानादिमोचनं,** 'ममकारः' **ममताकरणं वस्त्रपात्रोपाश्रयश्राद्धादिषु** 'अवर्णोच्चारणं' **अवर्णवादकथनमर्हदादीनामिति** ॥८२॥

---

१. 'जइ हास खेड्ड कंदप्प नाहवायं' F-प्रते ।

**जत्थित्थीकरफरिसं, अंतरिअं कारणेऽवि उप्पन्ने ।**
**दिट्ठीविस-दित्तग्गी-विसं व वज्जिज्जए गच्छे ॥८३॥**

यत्र स्त्रीकरस्पर्शमन्तरितं कारणेऽपि उत्पन्ने
दृष्टिविष-दीप्ताग्नि-विषमिव वर्जयेत् गच्छे ॥८३॥

व्याख्या – यत्र **गणे** 'स्त्रीकरस्पर्शं' **साध्वीहस्तसङ्घट्टनं, उपलक्षणत्वात्पादादिसंघट्टनं** 'अंतरिअ'**मिति विना** 'कारणे'**त्ति कारणं, अत्र द्वितीयार्थे सप्तमी, कण्टकरोगोन्मत्तादिलक्षणम्, 'अपि' समुच्चये, किंभूतं कारणम् ?** – 'उत्पन्नं' **संजातं, दृष्टिविषसर्प-दीप्ताग्नि-विषमिव** वर्जयेत् **स** गच्छः । **यद्वा-यत्र स्त्रीकरस्पर्श=गृहस्थरामाकरपादादिसङ्घट्टनं 'अन्तरे' वस्त्रादिव्यवधाने, अत्र प्राकृतत्वाद्विभक्तिपरिणामः, कारणे उत्पन्नेऽपि दृष्टिविषसर्पदीप्ताग्निविषमिव वर्जयेत् स गच्छ इति ॥८३॥**

**बालाए वुड्ढाए, नत्तुअ दुहिआइ अहव भइणीए ।**
**न य कीरइ तणुफरिसं, गोयम ! गच्छं तयं भणियं ॥८४॥**

बालाया वृद्धाया नप्तृकाया दुहिताया अथवा भगिन्याः ।
न च क्रियते तनुस्पर्शः, गौतम ! गच्छः स भणितः ॥८४॥

व्याख्या – 'बालायाः' **अप्राप्तयौवनायाः** 'वृद्धायाः' **स्थविरायाः, उपलक्षणत्वान्मध्यमायाः, एवंविधायाः** 'नप्तृकायाः' **सुतसुतायाः** 'दुहितृकायाः' **सुतासुतायाः अथवा** 'भगिन्याः' **याम्याः, उपलक्षणत्वान्मातुः पुत्र्याः कलत्रस्येत्यादिग्रहणम्** 'तनुस्पर्शः' **अङ्गस्पर्शो न च क्रियते हे इन्द्रभूते!** स गच्छः । **अत्र सूत्रे स्पर्शनिषेध उक्तः, एवमन्ये शब्दादयोऽपि त्याज्याः, यतः पुरुषस्पर्शेन पुरुषस्य मोहोदयो भवति न वा, यदि भवेत्तदा मन्दः, न स्त्रीस्पर्शवदुत्कटः, स्त्रीस्पर्शेन पुनः पुरुषस्य नियमाद्भवति मोहोदय उत्कटः** १ । **एवं स्त्रियाः स्त्रीस्पर्शे सति भजना, स्त्रियाः पुरुषस्पर्शेन नियमान्मोहोदयः** २ । **तथा पुरुषस्य पुरुषशब्दं श्रुत्वा भजना, पुरुषस्येष्टे स्त्रीशब्दे श्रुतेऽवश्यं मोहोदयः** ३ । **एवं स्त्रिया अपि भावनीयम्** ४ । **तथैवमिष्टे रूपेऽपि जीवसहगते चित्रकर्मादिप्रतिमायां वा भाव्यम् । स्पर्शे उदाहरणानि यथा**–"आणंदपुरं **नगरं,** जितारी **राया,** वीसत्था **भारिया, तस्स पुत्तो** अणंगो **नाम, बालत्ते अच्छिरोगेण**

गहिओ, निच्चं रुयंतो अच्छइ, अन्नया जणणीए निगिन्नट्ठियाए अहाभावेण जाणूरुअंतरे छोढुं उवगूहिओ, दोऽवि तेसिं गुज्झा परोप्परं समफिडिया, तहेव तुण्हिक्को ठिओ, लद्धोवाओ, रुयंतं पुणो पुणो तहेव करेइ ठायइ रुयंतो, पवड्ढमाणो तत्थेव गिद्धो मोत्तुं पियं विलपंतीं, पिता से मओ, सो रज्जे ठिओ, तहावि तं मायरं परिभुंजइ, सचिवाईहिं बुज्झमाणोवि णो ठिओत्ति ॥१॥''

तथा –

''एगो वणिओ, तस्स महिला अतीव इट्ठा, सो वाणिज्जेण गंतुकामो तं आपुच्छइ, तीए भणियं-अहंपि गच्छामि, तेण सा नीया, सा गुव्विणी, समुद्दमज्झे विणट्ठं पवहणं, सा फलगं विलग्गा, अंतरदीवे लग्गा, तत्थेव पसूया दारगं, स दारगो संवुड्ढो, सा तत्थेव संपलग्गा, बहुणा कालेण अन्नपवहणे दुरुहित्ता सणगरमागया, तीए वुग्गाहिओ सो - मा लोगवुत्तेण अहं जणणित्ति काउं परिच्चइयव्वा, स लोगेण भण्णइ-'अगम्मगमणं मा करेहि, परिच्चयाहि', तहावि णो परिच्चयतित्ति ॥२॥''

तथा –

''वासुदेवज्येष्ठभ्रातृजराकुमारपुत्रजितशत्रुराज्ञः शशकभशकपुत्रौ, तयोर्भगिनी देवाङ्गनातुल्या यौवनं प्राप्ता सुकुमालिका, अशिवेन सर्वकुलवंशे प्रक्षीणे ते त्रयोऽपि कुमारत्वे प्रव्रजिताः, सुकुमालिकाऽतिरूपतया न भिक्षाद्यर्थं गन्तुं शक्नोति, तरुणाः पृष्ठत आगच्छन्ति, तन्निमित्तमुपाश्रयेऽप्यागच्छन्ति, गणिन्या गुरोः कथितं, तदा गुरुणा स्वभ्रातरौ रक्षार्थं भिन्नोपाश्रये तत्पार्श्वे मुक्तौ, तौ सहस्रयोधिनौ, तयोरेको भिक्षां हिण्डति अन्यस्तां रक्षति, एवं बहुकाले गते सति साधुपीडां दृष्ट्वा तयाऽनशनं कृतं, बहुभिर्दिनैः क्षीणा मूर्च्छा गता, मृतेति कृत्वा एकेन सा गृहीता, द्वितीयेन तस्या उपकरणं गृहीतं, सा मार्गे शीतलवातेन गतमूर्च्छा भ्रातृस्पर्शेन सवेदा जाता, तथाऽपि मौनेन स्थिता, ताभ्यां परिष्ठापिता, तयोर्गतयोः सा उत्थिता, आसन्नं व्रजता सार्थवाहेन गृहीता, स्वमहिला कृता, कालेन भिक्षार्थमागताभ्यां भ्रातृभ्यां दृष्टा, ससंभ्रममुत्थिता दत्ता भिक्षा, तथाऽपि मुनी तां निरीक्षमाणौ तिष्ठतः, तयोक्तं-

**'किं निरीक्षथः ?', तौ भणतः-'अस्मद्भगिनी तव सदृक्षाऽभूत्, किन्तु सा मृता, अन्यथा न प्रत्यय उत्पद्यते आवयोः', तयोक्तं-'सत्यं जानीथः, अहमेव सा', तया सर्वं पूर्वस्वरूपं कथितं, ताभ्यां सा वयःपरिणता सार्थवाहान्मोचिता दीक्षिता आलोच्य स्वर्गतेति ॥८४॥**

**किञ्च –**

**जत्थित्थीकरफरिसं, लिंगी अरिहावि सयमवि करिज्जा ।**
**तं निच्छयओ गोयम ! [1]जाणिज्जा मूलगुणभट्ठं ॥८५॥**

यत्र स्त्रीकरस्पर्शं लिङ्गी अर्होऽपि स्वयमपि (स्वयमेव) कुर्यात् ।
तं निश्चयतो गौतम ! जानीयात् मूलगुणभ्रष्टम् ॥८५॥

व्याख्या – यत्र=**गणे स्त्रीकरस्पर्शं** 'लिङ्गी' **मुनिः, किंभूतः ?** – 'अर्हन्नपि' **पूजादियोग्योऽपि** स्वयमपि कुर्यात् तं **गच्छं** निश्चयतो **हे** गौतम! जानीयात् 'मूलगुणभ्रष्टं' **पञ्चमहाव्रतरहितमिति पाठान्तरे तु – ''जत्थित्थीकरफरिसं, अंतरिया कारणेवि उप्पन्ने । अरिहावि करिज्ज सयं, तं गच्छं मूलगुणमुक्कं ॥'' सुगमा ॥ अत्र श्री**महानिशीथ-**पञ्चमाध्ययनोक्त**सावद्याचार्यस्य **दृष्टान्तो ज्ञेय इति ॥८५॥**

**अथापवादमाह –**

**कीरइ बीयपएणं, सुत्तमभणिअं न जत्थ विहिणा उ ।**
**उप्पण्णे पुण कज्जे, दिक्खाआयंकमाईए ॥८६॥**

क्रियते द्वितीयपदेन सूत्राभणितं न यत्र विधिना तु ।
उत्पन्ने पुनः कार्ये दीक्षाऽऽतङ्कादिके ॥८६॥

व्याख्या – [2]यत्र=**गणे** द्वितीयपदेन=**अपवादेन** सूत्रानुक्तम्=**आगमाप्रतिपादितं** पुनः दीक्षाऽऽतङ्कादिके कार्ये=**कारणे** उत्पन्ने विधिनापि **न क्रियते स गच्छः** । 'कीरइ बीयपएणं सुत्तंमि भणिय' **मित्यपि पाठः, अनेन पाठेन गाथाव्याख्यानं यथा**–यत्र=**गच्छे**

---

१. 'जाणेज्जा' **D-E-F-G-H**-प्रतेषु । २. '''क्रियते' विधीयते 'द्वितीयपदेन' उत्सर्गपदापेक्षयाऽपवादपदेन 'सुत्तमभणिय'मित्यत्र मकारोऽलाक्षणिकः सूत्रे–बृहत्कल्पादौ अभणितं–भगवता अकथितं सूत्रभणितं साध्वीपदे न न 'यत्र' गणे 'विधिवत्' शास्त्रोक्तप्रकारेण, तुशब्दोऽनेकद्रव्यक्षेत्रकालभावप्रकारसूचकः, 'उत्पन्ने' प्रकटीभूते पुनः कार्ये महालाभकारणे, किंभूते कार्ये ?–दीक्षायां गृहीतायां दीक्षाऽऽतङ्कादिकं तस्मिन् आदिशब्दाद्विषमविहारादाविति, आतङ्क आदिर्यत्र तत्, स न गच्छ इति ।'' **इति पूर्वमुद्रिते**, अत्र **A-B-C-D** प्रतानुसारेणं संयोजितः पाठः ।

द्वितीयपदेन=**उत्सर्गपदापेक्षयाऽपवादपदेन** सूत्रे=**बृहत्कल्पादौ** भणितं=**भगवता कथितं साध्वीपादकण्टककर्षणादिकं** दीक्षाऽऽतङ्कादिके=**दीक्षायां गृहीतायां आतङ्क आदिर्यत्र तद् दीक्षातङ्कादिकं तस्मिन्**, आदिशब्दाद् **विषमविहारादाविति**, कार्ये=**महालाभकारणे** विधिना=**शास्त्रोक्तप्रकारेण, तुशब्दोऽनेकद्रव्यक्षेत्रकालभावप्रकारसूचकः, न क्रियते साध्वीनां, स न गच्छ इति, तत्त्वं तु जिनगम्यमिति ॥**

**अत्र किञ्चिन्निशीथचूर्णिपञ्चदशोद्देशकगतं यथा**-"एत्थ सीसो **पुच्छइ-आगमे य पव्वावणिज्जा अज्जा अतो संसओ किं परियट्टियव्वाओ न परियट्टियव्वाओ ?,** आयरिओ **भणइ-णत्थि कोइ णियमो, जहा अवस्सं परियट्टियव्वाओ णत्थि वत्ति, जइ पुण पव्वावेत्ता आणाए परिवट्टति तो महानिज्जराए वट्टइ, अह अणाणाए उ पालेइ तो अतिमहामोहं पकुव्वइ, दीहं संसारं णिव्वत्तेइ, तो केरिसेण परियट्टियव्वाओ? को वा परियट्टणे विही ?, अतो भण्णइ**-सहू १ भीयपरिसत्ति २, **एतेहिं दोहिं पदेहिं चउभंगो कायव्वो, सहू भीयपरिसो १ असहू भीयपरिसो २ सहू अभीयपरिसो ३ असहू अभीयपरिसो ४, तत्थ धितिबलसंपुण्णो इंदियणिग्गहसमत्थो थिरचित्तो य आहारुवहिखेत्ताणि य तप्पाउग्गाणि उप्पाएउं समत्थो एरिसो** 'सहू' १, **जस्स भया सव्वो साहुसाहुणिवग्गो ण किंचि अकिरियं करेइ भया कंपइ एरिसो** 'भीयपरिसो' २, **एत्थ पढमभंगिल्लस्स परिवट्टणं अणुण्णायं, सेसेसु तिसु भंगेसु णाणुण्णायं, अह परियट्टंति तो चउगुरुं, सो पढमभंगिल्लो जइ जिणकप्पं पडिवज्जओ अणुवट्टावगस्सासति जइ जिणकप्पं पडिवज्जइ तो चउगुरुगा, अण्णं च-जिणकप्पठियस्स जा णिज्जरा ताओ विहीए संजतीओ अणुपालेयंतस्स विउलतरा णिज्जरा भवति**" [नि० ४९२५/४९२६] **त्ति ॥८६॥**

**किञ्च –**

**मूलगुणेहिं विमुक्कं, बहुगुणकलियंपि लद्धिसंपन्नं ।**
**उत्तमकुलेऽवि जायं, निद्धाडिज्जइ, तयं गच्छं ॥८७॥**

मूलगुणैर्विमुक्तो, बहुगुणकलितोऽपि लब्धिसम्पन्नः ।
उत्तमकुलेऽपि जातो, निर्धाटयन्ति स गच्छः ॥८७॥

व्याख्या – 'बहुगुणकलितं' **विज्ञानादिगुणवृन्दसहितमपि** 'बहुलब्धिसंपन्नं' **अनेका-**

**हारवस्त्राद्युत्पादनलब्धिकलितं मधुक्षीराश्रवादिलब्धियुक्तं वा** 'उत्तमकुलेऽपि जातं' **उग्रभोगादिके चान्द्रादिके वा कुले जातम्=उत्पन्नं, एवंविधगुणयुक्तमपि साधुसाध्वीवर्गं** 'मूलगुणै:' **प्राणातिपातविरमणादिभि: विशेषेण** मुक्तं=**भ्रष्टं विमुक्तं यत्राचार्या:** 'निर्धाटयन्ति' **तिरस्कारं कृत्वा स्वगणान्निष्काशयन्तीत्यर्थ:** 'तयं'**ति स** गच्छ:, **उपलक्षणात् स्त्यानर्द्धिनिद्राऽतिदुष्टस्वभावलक्षणमपि निष्काशयन्तीति** ॥८७॥

**जत्थ हिरण्ण-सुवण्णे, धण-धण्णे कंस-तंब-फलिहाणं ।**
**सयणाण आसणाण य, झुसिराणं चेव परिभोगो ॥८८॥**

**जत्थ य वारडिआणं, तत्तडिआणं च तह य परिभोगो ।**
**मुत्तुं सुक्किलवत्थं, का मेरा तत्थ गच्छम्मि ? ॥८९॥**

यत्र हिरण्यसुवर्णयो-र्धनधान्ययो: कांस्यताम्रस्फटिकानाम् ।
शयनानामासनानाञ्च, शुषिराणां चैव परिभोग: ॥८८॥

यत्र च रक्तवस्त्राणां, नीलपीतादिरङ्गितवस्त्राणाञ्च तथा च परिभोग: ।
मुक्त्वा शुक्लं वस्त्रं, का मर्यादा तत्र गच्छे ? ॥८९॥

व्याख्या – यत्र **गणे** 'हिरण्यस्वर्णयो:' **तत्र हिरण्यं=रूप्यं अघटितस्वर्णं वा स्वर्णं च=घटितस्वर्णं, तथा** 'धनधान्ययो:' **तत्र धनं चतुर्धा**-गणिमं=**पूगफल-नालिकेरादिकं** १, धरिमं=**गुडादि** २, मेयं=**घृतादि** ३, पारिच्छेद्यं=**माणिक्यादि** ४, **अत्राद्यन्तभेदेनाधिकार:,** धान्यं=**अपक्वयवगोधूमशालिमुद्गादि चतुर्विंशतिविधं,** 'कंस'**त्ति कांस्यानि=स्थालकच्चोलकादीनि पात्राणि** 'तंब'**त्ति** ताम्राणि=**ताम्रसम्बन्धि-लोट्टिकादीनि स्फटिकरत्नमयानि भाजनादीनि, उपलक्षणत्वात् काचकपर्दिका-दन्तादिबहुमूल्यानि पात्राणि, पात्रादिषु च पित्तलकादिवालिकानां बन्धनानि तेषाम् । तथा चोक्तं** निशीथसूत्रे आचाराङ्गे **च-"जे भिक्खू वा भिक्खुणी वा अयपायाणि वा** १ **कंसपा०** २ **तंबपा०** ३ **तउयपा०** ४ **सुवण्णपा०** ५ **रूप्पपा०** ६ **सीसगपा०** ७ **रीरियपा०** ८ **हारपुटपा० त्ति = लोहपात्राणि** ९ **मणिकायपा०** १० **संखपा०** ११ **सिंगपा०** १२ **दंतपा०** १३ **चेलपा०** १४ **सेलपा०** १५ **चम्मपा०** १६ **वइरपा०** १७ **करेइ करेंतं वा साइज्जइ, धरेइ धरेंतं वा साइज्जइ, परिभुंजइ परिभुंजंतं वा**

**साइज्जइ, तस्स चाउम्मासियं परिहारठाणं अणुग्घातियं ॥** [नि० उ० ११/सू० १-२-३] **जे भिक्खू वा भिक्खुणी वा अयबंधणाणि वा १ कंसबंधणाणि वा २ जाव १६ वइरबंधणाणि वा १७ करेइ करेंतं वा साइज्जइ जाव परिभुजंतं वा साइज्जइ तस्सवि पुव्वपच्छित्तं ।"** [नि० उ० ११, सू० ४-५-६] **'सयणासण'त्ति शयनानां=खट्वापल्यङ्कादीनां आसनानां=मञ्चिका-चाकलकादीनां चशब्दाद्गुप्त-दवरक-जीणक-जलेचक-शेत्रिजिकादीनां, तथा** 'झुसिराणं'**ति सच्छिद्राणां पीठ-फलकादीनां परिभोगो=निरन्तरव्यापारणम् । तथा यत्र च** 'वारडिआणं' **ति आद्यन्त-जिनतीर्थापेक्षया रक्तवस्त्राणां** '[१]**तत्तडियाणं'ति नीलपीतविचित्रभातिभरतादियुक्त-वस्त्राणां च** 'परिभोगः' **सदा निष्कारणं व्यापारः** 'मुक्त्वा' **परित्यज्य** 'शुक्लवस्त्रं' **यतियोग्याम्बरमित्यर्थः, क्रियत इति शेषः, का मर्यादा ?, न काचिदपि** तत्र गणे **इति ॥८८-८९॥**

**कांस्यताम्रादिभ्यः स्वर्णरूप्यं बह्वनर्थकारीत्यतस्तन्निषेधं दृढयन्नाह –**

**जत्थ हिरण्ण-सुवण्णं, हत्थेण पराणगं पि नो छिप्पे ।**
**कारणसमप्पियंपि हु निमिसखणद्धंपि, तं गच्छं ॥९०॥**

यत्र हिरण्यसुवर्णे हस्तेन परकीयेऽपि न स्पृशेत् ।
कारणसमर्पितेऽपि हु निमेषक्षणार्धं स गच्छः ॥९०॥

व्याख्या – यत्र **गणे** 'हिरण्यस्वर्णं' **पूर्वोक्तशब्दार्थं साधुः** 'हस्तेन' **स्वकरेण** 'पराणगंपि'**त्ति परकीयमपि=परसम्बन्ध्यपि** 'न स्पृशेत्' **न संघट्टयेत्** 'कारणसमर्पितमपि' **केनाप्यगारिणा केनापि भयस्नेहादिहेतुनाऽर्पितमपि** 'निमेषक्षणार्द्धमपि' **तत्र निमेषो=नेत्रसञ्चालनरूपः, अष्टादशनिमेषैः काष्ठा, काष्ठाद्वयेन लवः, लवपञ्चदशभिः कला, कलाद्वयेन लेशः, लेशैः पञ्चदशभिः क्षणः, तयोरर्द्धमपि** स गच्छः । **यद्वा-यत्र परकीयमपि हिरण्यस्वर्णं हस्तेन साधुर्न स्पृशेत् कारणसमर्पितमपि,** भावार्थस्त्वयम्-**कार्ये संपूर्णे कृते सतीत्यर्थः, उक्तञ्च** निशीथपीठिकायाम्-**"विसे कणग'त्ति विसघत्थस्स कणगं=सुवण्णं घेत्तुं घसिऊण विसणिग्घायणट्ठा तस्स पाणं दिज्जइ"** [नि० भा० ३९४-चूर्णौ] **त्ति ॥९०॥**

---

१. 'तेकूडियाणं' इति पूर्वमुद्रिते, अत्र A-प्रतपाठः ।

**अथाऽर्यिकाद्वारेण गणस्वरूपमाह –**[1]

**जत्थ य अज्जालद्धं, पडिग्गहमाईवि विविहमुवगरणं ।**
**परिभुंजइ साहूहिं, तं गोयम ! केरिसं गच्छं ॥९१॥**

यत्र चार्यालब्धं, पतद्ग्रहाद्यपि विविधमुपकरणम् ।
परिभुज्यते साधुभिः स गौतम ! कीदृशो गच्छः ? ॥९१॥

व्याख्या – यत्र च **गणे** 'आर्यालब्धं' **साध्वीप्राप्तं पतद्ग्रहप्रमुखं** 'विविधं' **नानाभेदमुपकरणं** परिभुज्यते साधुभिः **कारणं विना** 'हे गौतम!' **हे इन्द्रभूते !**, स कीदृशो गच्छो ?, **न कीदृशोऽपीति ।**

**अत्र किञ्चिदुपकरणस्वरूपं निशीथतो यथा–"जे भिक्खू वा २ गणणातिरित्तं वा पमाणातिरित्तं वा उवहिं धरेइ, उवहिं धरेंतं वा साइज्जइ तस्स चउलहुयं"** [उ० १६, सू० ३९] **तथा –**

**"जो जिणकप्पिओ एगेणं कप्पेणं संथरइ सो एगं गेण्हइ परिभुंजइ वा, जो दोहिं सं० सो दो गेण्हइ परि०, एवं ततिओवि, जिणकप्पिओ वा जो अचेलो संथरइ सो अचेलो चेव अच्छइ, एस अभिग्गहविसेसो भणिओ, एतेण अधिकतर-वत्थे ण हीलियव्वो । जम्हा जिणाणं एसा आणा–सव्वेणवि तिण्णि कप्पा घेत्तव्वा थेरकप्पियाणं, जइवि अपाउएण संथरइ तहावि तिण्णि कप्पा णियमा घेत्तव्वा** [नि० भा० ५८०८-चूर्णौ] **इति, जो सामण्णभिक्खू तस्सेयं वत्थप्पमाणं भणियं, जो पुण गणचिंतगो गणावच्छेयगो सो दुल्लहवत्थादि देसे दुगुणपडोयारं तिगुणं वा, अहवा जो अतिरित्तो उवग्गहिओ वा सो सव्वो गणचिंतगस्स परिग्गहो भवइ, महाजणो त्ति गच्छो, तस्स आवत्तिकाले उवग्गहकरो भविस्सति"** [नि० भा० ५८११-५८१२-चूर्णौ] **ति ।**

**तथा–"जेसु खित्तेसु चाउम्मासं कयं, तत्थ दो मासा वत्थं न गेण्हंति, [इतरेसिं पासत्थाइयाण जं खेत्तं तं दो मासे ण वज्जिज्जति]**[2] **किं कारणं ?, जेण पासत्थाइ वासासुवि उवगरणं गेण्हंति, ण य चउपाडिवए पुणो णियमा विहरंति, तेण कारणेन तेहिं सुद्धे असुद्धे वा उवगरणे गहिए जं सेसगं सड्ढगा पयच्छंति**

---

१. 'अथाऽऽर्यकाद्वारेण' इति **पूर्वमुद्रिते**, अत्र A-आदिप्रतपाठः । २. अयं कोष्ठकान्तर्गतः पाठो **निशीथभाष्य-**चूर्ण्यनुसारेण (भा० ३२५९) **बृहत्कल्पभाष्यानुसारेण** (भा० ४२८९) च प्रक्षिप्तः, स चावश्यकः, न पुनरुलभ्यते अत्रत्यासु सर्वास्वपि हस्तप्रतिषु ।

तं सेसगं संविग्गाणं ण कप्पइ [ [1]संविग्गाणं कप्पइ ?] घेत्तुं, सपरखेत्तेसु ततियमासे गेण्हंति, चिक्खल्लपंथा, वासं वा णोवरमए, बाहिं वा असिवं दुब्भिक्खं, एवमाइएहिं कारणेहिं चउपाडिवए ण णिग्गया तत्थ दो मासमज्झे कोइ वत्थाणि देज्जा ते पडिसेहंति, दोसु मासेसु पुण्णेसु गेण्हंति, जम्हा जे इह खित्ते वासावासमवट्ठिया तेसिं वत्थे दाहामोत्ति सड्ढयाण जो भावो सो निग्गएसु वोच्छिज्जइ, साहूणं वा जे वत्था संकप्पिया ते अण्णसाधूणं अण्णपासंडत्थाणं वा देंति, अप्पणा वा परिभुंजंति वा, बालअसहुगिलाणा सीयं पडंतं ण सहइ, एवमाइएहिं कारणेहिं दोहिं मासेहिं अपुण्णेहिंवि ओमत्थगपणगपरिहाणीए गहणं कायव्वंति, उडुबद्धे य मासकप्पं जत्थ ठिया तत्थवि उक्कोसेणं दो मासा परिहरंति, कारणे ओमत्थगपणग-परिहाणीए गेण्हंति" [नि० भा० ३२५८-३२६६-चूर्णौ] इच्चाइ उवहिवित्थरो निसीहदसमोद्देसओ णेओत्ति ॥९१॥

किञ्च –

अइदुल्लहभेसज्जं, बलबुद्धिविवड्डणंपि पुट्ठिकरं ।
अज्जालद्धं भुंजइ, का मेरा तत्थ गच्छम्मि ? ॥९२॥

अतिदुर्लभभैषज्यं, बलबुद्धिविवर्धनमपि पुष्टिकरम् ।
आर्यालब्धं भुज्यते, का मेरा तत्र गच्छे ? ॥९२॥

व्याख्या – 'अतिदुर्लभं' दुष्प्रापं 'भेषजं' तथाविधचूर्णादिकं उपलक्षणत्वा-दौषधमपि बलं च=शरीरसामर्थ्यं बुद्धिश्च=मेधा तयोर्विवर्द्धनमपि 'पुष्टिकरं' शरीरगुणकरं 'आर्यालब्धं' साध्व्यानीतं यत्र गणे साधुभिर्भुज्यते तत्र 'का मेरा' का मर्यादा ?, न काचिदित्यर्थः ॥९२॥

एगो एगित्थिए सद्धिं, जत्थ चिट्ठिज्ज गोयमा ! ।
संजइए विसेसेण, निम्मेरं तं तु भासिमो ॥९३॥

एक एकाकिस्त्रिया सार्धं यत्र तिष्ठेत् गौतम ! ।
संयत्या विशेषेण, निर्मेरं तं तु भाषामहे ॥९३॥

व्याख्या – 'एकः' अद्वितीयः साधुः एकाकिन्या=रण्डाकुरण्डादिस्त्रिया सार्द्धं

---

[1] असौ पाठः निशीथचूर्ण्यादौ समुपलभ्यते, सङ्गतश्चापि, न पुन अत्रत्यासु हस्तप्रतिषु समुपलभ्यते ।

'यत्र' **गणे राजमार्गादौ वा** तिष्ठेत् **हे** गौतम !, **तथा एकाकिन्या** संयत्या **सार्द्धं** 'विशेषेण' **हास्यविकथादिबहुप्रकारेण यत्र गणे साधुभिः परिचयः क्रियते** 'तु' **पुनः तं गच्छं** 'निर्मर्यादं' **जिनाज्ञाविकलं** 'भाषामहे' **कथयामः, एवं तं गच्छं निर्मर्यादं सद्गुणव्यवस्थाविकलं भाषयाम इति** ॥९३॥

**दढचारित्तं मुत्तं, आइज्जं मयहरं च गुणरासिं ।**
**[१]इक्को [२]अज्झावेई, तमणायारं, न तं गच्छं ॥९४॥**

दृढचारित्रां मुक्तां आदेयां महत्तरां स गुणराशिम् ।
एकाकी अध्यापयति, सोऽनाचारः न स गच्छः ॥९४॥

व्याख्या – **दृढं चारित्रं=पञ्चमहाव्रतादिलक्षणं यस्याः सा तथा तां** 'मुक्तां' **निःस्पृहां** 'आदेयां' **लोके आदेयवचनां** 'मइहरं'ति=**मतिगृहं गुणराशिं साध्वीं, चशब्दात् महत्तरां, यद्वा महत्तरपदस्थितां सर्वसाध्वीनां स्वामिनीमित्यर्थः, महत्तरास्वरूपं यथा–**

**"सीलत्था कयकरणा कुलजा परिणामिया य गंभीरा ।**
**गच्छाणुमया वुड्ढा महत्तरत्तं लहइ अज्जा ॥१॥"** [ ]

**एवंविधामप्येकाकिनीमार्यां** 'एकः' **अद्वितीयो मुनिः** 'अध्यापयति' **सूत्रतोऽर्थतो वा तन्त्रं पाठयतीत्यर्थः, हे शिष्य !** तमनाचारं **जानीहि,** न तं गच्छं, **'मुत्तुं'ति पाठान्तरे यत्र गणे दृढचारित्रं मदहरं गुणराशिं एवंविधमाचार्यं मुक्त्वा=परित्यज्य, एतदुक्तं भवति-एवंविधः कदाचिदध्ययनोद्देशकादिकं पाठयेदिति** ॥९४॥

**घणगज्जिय[३]-हयकुहए-विज्जूदुग्गिज्झगूढहिययाओ ।**
**अज्जा अवारिआओ, इत्थीरज्जं, न तं गच्छं ॥९५॥**

**जत्थ समुद्देसकाले, साहूणं मंडलीइ अज्जाओ ।**
**गोअम ! ठवंति पाए, इत्थीरज्जं, न तं गच्छं ॥९६॥**

घनगर्जितहयकुहकविद्युद्दुर्ग्राह्यगूढहृदयाः ।
आर्या अवारिताः, स्त्रीराज्यं, न स गच्छः ॥९५॥

---

१. 'एक्को' H-प्रते । २. 'अज्जावेई' **पूर्वमुद्रिते** । ३. 'य-कुहय-विज्जू गोयमा ! संजईम वि दुगिज्झ०' इति E-प्रते ।

यत्र समुद्देशकाले साधूनां मण्डल्यां आर्याः ।
गौतम ! स्थापयन्ति पादौ स्त्रीराज्यं न स गच्छः ॥९६॥

व्याख्या – घनस्य गर्जितं **भाविनि दुर्ज्ञेयं**, हयस्य कुहकं=**उदरस्थो वायुविशेषः**, विद्युत्=**प्रतीतैव ता इव दुर्ग्राह्यं हृदयं यासां ता आर्या अवारिताः=स्वेच्छाचारिण्यो यत्र गणे तत् स्त्रीराज्यं न तु स गच्छः ॥९५॥**

यत्र **गणे** 'समुद्देशकाले' **भोजनकाले** साधूनां मण्डल्यां 'आर्याः' **संयत्यः** हे गौतम ! 'पादौ स्थापयन्ति' **मण्डलीमध्ये आगच्छन्तीत्यर्थः**, तत् स्त्रीराज्यं **जानीहि त्वं**, न तं गच्छम् । **जओ –**

**"अकाले पइदिणं आगच्छमाणीए लोयाणं संका भवइ, भोयणवेलाए सागारियाऽभावेण मोक्कलमणेण आलावे संलावे भवइ, साहूणं चउत्थे संका भवइ, परुप्परं पीई भवइ, तओ सव्वेऽवि साहवो अज्जाए अणुवट्टंति, अज्जाणुरागरत्ता न मुणंति अप्पणो सज्झायपडिलेहणाइअं संजमहाणी, तओ संघाडए संजइए संजमहाणिकारणीए रज्जं भवति, संजईए संघाडए रज्जं कुणमाणीए पयठाणीयावि पहाणपुरिसा रज्जुबंधणबद्धबइल्लतुल्ला भवंति, साहूणं च दुग्गई फलं भवइ, अओ-'उस्सग्गमग्गेण साहूहिं समं भोयणवेलाए अण्णत्थवि बहुसंसग्गो संजईए न कायव्वो'त्ति, साहुणाऽवि पढमपएण संजईण मंडलीए एगागिणा न गंतव्वं" [ ] ति ॥९६॥**

**अथ सन्मुनिसद्गुणप्ररूपणेन सद्गणस्वरूपमाह –**

**जत्थ मुणीण कसाया, जगडिज्जंता वि परकसाएहिं ।**
**नेच्छंति समुट्ठेउं, सुनिविट्ठो पंगुलो चेव ॥९७॥**

**धम्मंतरायभीए, भीए संसारगब्भवसहीणं ।**
**न उईरंति कसाए, मुणी मुणीणं तयं गच्छं ॥९८॥**

**कारणमकारणेणं, अह कहवि मुणीण उट्ठहि कसाए ।**
**उदएवि जत्थ रुंभहि, खामिज्जइ जत्थ तं गच्छं ॥९९॥**

यत्र मुनीनां कषायाः दीप्यमाना अपि परकषायैः ।
नेच्छन्ति समुत्थातुं सुनिविष्टः पंगुलश्चैव ॥९७॥

धर्मान्तरायभीताः भीताः संसारगर्भवसतिभ्यः ।
नोदीरयन्ति कषायान् मुनयः मुनीनां स गच्छः ॥९८॥

कारणेन अकारणेनाथ कथमपि मुनीनां उत्तिष्ठन्ति कषायाः ।
उदयेऽपि यत्र रुध्यन्ते क्षाम्यन्ते यत्र स गच्छः ॥९९॥

व्याख्या – **आसां व्याख्या यथा**-यत्र=**गणे मन्वन्ते=जानन्ति तत्त्वस्वरूपमिति मुनयस्तेषां** मुनीनां=**परमर्षीणां** 'कषायाः' **क्रोध-मान-माया-लोभरूपाः** 'जगडिज्जंतावि'**त्ति** दीप्यमाना अपि=**धगधगायमानं क्रियमाणा अपि, कैः ?** - **परेषां=दासदासीमातङ्गद्विजामात्यभूपालादीनां कषायाः=उत्कटक्रोधादयस्तैः** परकषायैः नेच्छंति समुत्थातुं **मेतार्य-गजसुकुमाल-स्कन्धकाचार्यशिष्यादीनां कषायवत्**, 'चेव'**त्ति यथार्थे यथा** '**सु**' **इति=अतिशयेन निविष्टः=स्थितः** 'सुनिविष्टः' **पदमपि गन्तुमसमर्थ इत्यर्थः** 'पङ्गुलः' **पङ्गुः उत्थातुं न शक्नोतीति ॥९७॥ अगाधसंसारसागरे पततां जीवानां धत्ते इति** धर्मः=**सर्वज्ञोक्तज्ञानदर्शनचरणरूपस्तस्यान्तरायो=निद्राविकथा-कुमत्यादिविघ्नस्तस्माद्भीताः=त्रस्ताः, तथा** 'भीताः' **कम्पमानाः, संसरणं** संसारो=**भवभ्रमणं, गर्भे वसनं=वसतिः** गर्भवसतिः, **संसारश्च गर्भवसतिश्च** संसारगर्भवसती **ताभ्यां, यद्वा संसारे=चतुर्गत्यात्मके गर्भवसतयस्ताभ्यः** 'नोदीरयन्ति' **प्रशान्ताः सन्तः कुवाक्यादिना नोत्थापयन्तीत्यर्थः, कान् ?** - 'कषायान्' **क्रोधादीन्** मुनयो मुनीनां स गच्छः ।

**अत्र कषायोदये उदाहरणानि वाच्यानि, यथा**-क्रोधे **गोघातकमरुकोदाहरणं** १, मानेऽ**च्चंकारिभट्टोदाहरणं** २, मायायां **पण्ड्वार्योदाहरणं** ३, लोभे **आर्यमङ्ग्वाचार्योदाहरण ४ मिति ॥९८॥**

**तथा** 'कारणे' **गुरुग्लानशैक्षादिवैयावृत्त्यादिप्रयोजने सारणवारणनोदनादिकारणे वा** 'अकारणे' **बहिःप्रयोजनाभावे वा** 'णं' **वाक्यालङ्कारे, यद्वा मकारोऽलाक्षणिकः कारणाकारणेन, अथ कथमपि** 'मुनीनां' **ज्ञातागमतत्त्वानां कषायविपाकवेत्तॄणां**

'उट्ठिहिंति' **उत्पद्यन्ते=प्रकटीभवन्ति** 'कषायाः' **क्रोधादयः** 'उदएवि'**त्ति उत्पद्यमाना अपि यत्र** 'रुंभेहिंति' **रुध्यन्ते** क्षाम्यन्ते च यत्र स गच्छः ॥९९॥

**सील-तव-दाण-भावण-चउविहधम्मंतरायभयभीए ।**
**जत्थ बहू गीयत्थे, गोयम ! गच्छं तयं भणिअं ॥१००॥**

शीलतपोदानभावनाचतुर्विधधर्मान्तरायभयभीताः ।
यत्र बहवो गीतार्था गौतम ! गच्छः स भणितः ॥१००॥

व्याख्या – **दीयत इति** दानं=**सुपात्रानुकम्पादिकं** १, शीलम्=**अष्टादशधाऽब्रह्मवर्जनं** २, **तप्यतेऽष्टप्रकारं कर्मानेनेति** तपः=**रत्नावलीकनकावल्येकावली-मुक्तावलीश्रेणिवर्गघनप्रमुखषष्ट्यधिकशतत्रय-३६०भेदभिन्नं, उक्तञ्च** श्रीगणिविद्या-**प्रकीर्णके**-

**"महा १ भरणि २ पुव्वाणि, तिण्णि उग्गा वियाहिया ।**
**एएसु तवं कुज्जा, सब्भिंतरबाहिरं ॥१॥**

**तिण्णि सयाणि सट्ठाणि, तवोकम्माणि आहिया ।**
**उग्गनक्खत्तजोएसु, तेसुमन्नतरं करे ॥२॥"**

[गणि० श्लो० ३५-३६]

**इति, भाव्यते=संसारस्वरूपमनित्यत्वेन चिन्त्यतेऽनयेति** भावना, **इत्येवंरूपस्य चतुर्विधधर्मस्यान्तरायभयभीताः, सूत्रे तु बन्धानुलोम्यात् 'सीलतवदाणभावण'त्ति, यत्रोक्तलक्षणा बहवो गीतार्थाः=सूत्रार्थज्ञातारो भवन्ति हे** गौतम ! स गच्छो भणितः । अत्रानुकम्पादाने **जयराजोदाहरणं**, सुपात्रदाने **सुबाहुकुमारोदाहरणं**, शीलेऽ**नङ्गलेखोदाहरणं**, तपसि **स्कन्धककालीदेव्याद्युदाहरणं**, भावनायां **भरतोदाहरणं वाच्यमिति ॥१००॥**

**उक्तमुत्तमगणस्वरूपम्, अथाधमाधमगणस्वरूपमाह –**

**जत्थ य गोयम ! पंचण्ह, कहवि सूणाण इक्कमवि हुज्जा ।**
**तं गच्छं तिविहेणं, वोसिरिअ वइज्ज अन्नत्थ ॥१०१॥**

यत्र च गौतम ! पञ्चानां, कथमपि सूनानामेकमपि भवेत् ।
तं गच्छं त्रिविधेन, व्युत्सृज्य व्रजेदन्यत्र ॥१०१॥

व्याख्या – यत्र **गणे च** हे गौतम ! 'पञ्चानां' **घरट्टिका १ उदूखल २ चुल्लक ३ पानीयगृह ४ सारवण ५ लक्षणानां कथमपि** 'सूनानां' **अनाथाशरणजीववृन्द-वधस्थानानां खट्टिकगृहसदृशानां मध्ये एकमपि भवेत्** तं 'गच्छं' **अधममुनिसमूहं** 'त्रिविधेन' **मनोवाक्कायेन कृतकारितानुमत्यात्मकेन** 'व्युत्सृज्य' **परित्यक्त्वा** 'व्रजेत्' **गच्छेत्** 'अन्यत्र' **सत्परम्परागतगण इति** ॥१०१॥

**सूणारंभपवत्तं, गच्छं वेसुज्जलं [1]न सेविज्जा ।**
**जं चारित्तगुणेहिं तु उज्जलं तं तु सेविज्जा ॥१०२॥**

सूनारम्भप्रवृत्तं, गच्छं वेषोज्ज्वलं न सेवेत ।
यश्चारित्रगुणैः तूज्ज्वलस्तं तु सेवेत ॥१०२॥

व्याख्या – 'सूनारम्भप्रवृत्तं' **षड्जीवमर्दनपरं खण्डन्याद्यधिकरणकर्त्तारं वा** 'गच्छं' **साध्वाभासगणं, वेषेण=कल्पकम्बलीचोलपट्टरजोहरणमुखपोतिकादि-लक्षणनेपथ्येन साधुद्रव्यलिङ्गेनेत्यर्थः उज्ज्वलं=सागरडण्डीरवत् परमश्वेतं** वेषोज्ज्वलं **न सेवेत, दुःखलक्षसंसारवर्द्धकत्वात्, कीदृशं सेवेत ? इत्याह** – 'यं' **गणं** 'चारित्रगुणैः' **समितिगुप्त्यादिगुणैः** 'उज्ज्वलं' **निरतीचारमालोचितातीचारं वा तुशब्दाद् द्रव्यलिङ्गेन मलिनमपि, तं गणं सेवेत, तुशब्दात् तद्गतमुनीनां वैयावृत्त्यादिकमपि कुर्वीत, संसारक्षयहेतुकत्वादिति** ॥१०२॥

**जत्थ य मुणिणो कयविक्कयाइं कुव्वंति [2]संजमब्भट्ठा ।**
**तं गच्छं गुणसायर ! विसं व [3]दूरं परिहरिज्जा ॥१०३॥**

यत्र च मुनयः क्रयविक्रयादि कुर्वन्ति संयमभ्रष्टाः ।
तं गच्छं गुणसागर ! विषमिव दूरतः परिहरेत् ॥१०३॥

व्याख्या – यत्र **गणे** 'मुनयः' **साधुवेषविडम्बकाः प्रवचनोपघातकारकाः आत्म-क्लेशकारकाः** 'कय'**त्ति मूल्येन वस्त्रपात्रौषधशिष्यादिकं स्वीकुर्वन्ति** 'विक्कयाइं'**ति**

---

१. 'न वासिज्जा' E-F-G-प्रते । २. 'संजमुब्भट्ठा' H-प्रते । ३. 'दूरे' E-प्रते ।

मूल्येनान्येषां वस्त्रपात्रजपमालादिकमर्पयन्ति, 'जत्थ ये'त्यत्र चकारादन्यैः क्रय-विक्रयादिकं कारापयन्ति कुर्वन्तमन्यमनुमोदयन्ति च, किंभूताः ? - संयमात्=पृथिव्यादिसप्तदशविधात् भ्रष्टाः=सर्वथा यतनातत्परतारहिताः, दूरीकृतचारित्रगुणा इत्यर्थः, 'तं' पूर्वोक्तस्वरूपं 'गच्छं' गणं गुणानां=ज्ञानादिगुणानां सागरः=समुद्रो गुणसागरस्तस्यामन्त्रणं 'हे गुणसागर !' हे शिष्य ! 'विषमिव' हलाहलविषमिव 'दूरं' अदर्शनं यथा स्यात्तथा परिहरेत् । अत्र विषं तूपमामात्रं येन [१]विषादेकमरणं भवति न वा, परं गुणभ्रष्टगच्छसङ्गात् कुमतिग्रस्तगणसङ्गाच्चानन्तानि जन्ममरणानि अनन्ते संसारे भवन्तीति ॥१०३॥

**आरंभेसु पसत्ता, सिद्धंतपरंमुहा विसयगिद्धा ।**
**मुत्तुं मुणिणो गोयम ! वसिज्ज मज्झे सुविहियाणं ॥१०४॥**

आरम्भेषु प्रसक्ताः सिद्धान्तपराङ्मुखा विषयगृद्धाः ।
मुक्त्वा मुनीन् गौतम ! वसेत् मध्ये सुविहितानाम् ॥१०४॥

व्याख्या – आरम्भेषु=पृथिव्याद्युपमर्दनेषु बहुवचनात् संरम्भसमारम्भयोरपि ग्रहः तेषु प्रकर्षेण=मनोवाक्कायव्यापारेण सक्ताः=तत्पराः प्रसक्ताः, यद्वा आरम्भेषु=जीवोपमर्दकारिषु परिग्रहादिषु सक्ताः=मेलनपालनादितत्परास्तान्, सिद्धान्तेषु=आचाराङ्गादिश्रुतरत्नेषु पराङ्मुखाः=विपरीतवक्त्राः, तदुक्तानुष्ठानलेशशून्यत्वात् तत्परि-ज्ञानशून्यत्वाच्च, विषयो द्विधा - कामरूपो भोगरूपश्च, तत्र कामः=शब्दरूपलक्षणः भोगो=गन्धरसस्पर्शरूपस्तस्मिन् गृद्धान् मुक्त्वा मुनीन् हे गौतम ! 'वसेत्' निवासं कुर्यादिति, मध्ये, केषां ? - सुष्ठु=मनोवाक्कायेन शोभनमनुष्ठानं विहितं=निष्पादितं यैस्ते सुविहितास्तेषां सुविहितानामिति ॥१०४॥

**तम्हा सम्मं निहालेउं, गच्छं सम्मग्गपट्ठियं ।**
**वसिज्जा पक्ख मासं वा, जावज्जीवं तु गोयमा ! ॥१०५॥**

तस्मात्सम्यग् निभाल्य, गच्छं सन्मार्गप्रस्थितम् ।
वसेत पक्षं मासं वा, यावज्जीवं तु गौतम ! ॥१०५॥

---

१. 'विषादिक(ना)मरणं' इति पूर्वमुद्रिते, अत्र A-आदिप्रतपाठः ।

व्याख्या – **यस्मात्पूर्वोक्तगणनिवसनमनन्तसंसार[1]भ्रमणकारणमुक्तं तस्मात्** 'सम्यक्' **सर्वप्रकारेण** 'निभाल्य' **कुशाग्रीयबुद्ध्या पर्यालोच्य** 'गच्छं' **मुनिगणं** सन्मार्ग-प्रस्थितं=**मोक्षपथं प्रति चलितमित्यर्थः** 'वसेत्' **गुर्वाज्ञया तिष्ठेत् पक्षं यावत्, मासं यावत्, वाशब्दान्मासद्वयादिकं यावत्, यावज्जीवं वा हे** गौतम ! ॥१०५॥

**[2]खुड्डो वा अहवा सेहो, जत्थ रक्खे उवस्सयं ।**
**तरुणो वा जत्थ एगागी, का मेरा तत्थ भासिमो ? ॥१०६॥**

क्षुल्लो वाथवा शैक्षो यत्र रक्षेत् उपाश्रयम् ।
तरुणो वा यत्र एकाकी का मर्यादा तत्र भाषामहे ? ॥१०६॥

व्याख्या – यत्र **गणे** 'क्षुल्लः' **बालरूपः वाशब्दः पूरणे अथवा** 'शैक्षः' **नवदीक्षितः** 'रक्षेत्' **सदा प्रतिपालयेत्** उपाश्रयं=**साधुवसनस्थानं** वा=**अथवा** 'तरुणो' **युवा साधुर्यत्रैकाकी उपाश्रयं रक्षेत्,** तत्र **गणे** का मर्यादा=**कां जिनगणधराज्ञां भाषामहे वयं ?, बहुदोषकारणत्वात्, तथाहि - एगो खुड्डो रमइ रममाणस्स अण्णे धुत्ताइया उवहिं हरंति, बालस्स वा भोलविऊण अण्णत्थ गच्छंति, वसहीए वा कयावि डज्झमाणाए खुड्डो वत्थाईगहणत्थं पविसति तत्थ बलइत्ति, सप्पो वा डसइ, नडाइयपेच्छणत्थं च गच्छिज्जा, एवमाई बाले दोसा १ । सेहे तु कयाई सघरं गच्छेज्जा अन्नत्थ वा गच्छेज्जा, अम्मापियरो अण्णो वा सयणो कयाइ मिलिज्जा स णेहेण रोइज्जा, भासासमिई वा भंजिज्जा, उड्डाहं वा करिज्जा, एवमाइ सेहे दोसा २ । तरुणे पुण कयाई मोहोदएणं हत्थकम्मं करिज्जा, अंगादाणं वा किड्डाए चालिज्जा, कयाई एगं तरुणं बहूइओ रंडाकुरंडाओ आगच्छंति चउत्थं भंजिज्जा, उड्डाहं वा करिज्जा, मोहोदएण गच्छं मुत्तूण गच्छिज्ज वा, एवमाई एगागिस्स खुड्डाइयस्स दोसा" निसीहचुण्णीओ [ ] त्ति ॥१०६॥**

**जत्थ य एगा खुड्डी, एगा तरुणी उ रक्खए वसहिं ।**
**गोयम ! तत्थ विहारे, का सुद्धी बंभचेरस्स ॥१०७॥**

---

१. 'भ्रमणकारणं मुक्त्वा' इति **पूर्वमुद्रिते**, अत्र **A**-आदिप्रतपाठः । २. 'खुड्डो वुड्डो तहा सेहो' इति **D-E-F-H**-प्रते ।

यत्र चैकाकिनी क्षुल्लिका एकाकिनी तरुणी तु रक्षति वसतिं ।
गौतम ! तत्र विहारे, का शुद्धिः ब्रह्मचर्यस्य ? ॥१०७॥

व्याख्या – यत्र च **साध्वीगणे** एका क्षुल्लिका एका तरुणी **च**, **तुशब्दान्नवदीक्षिता च**, रक्षति वसतिं **हे** गौतम ! **तत्र** 'विहारे' **साध्वीचर्यायां** 'का शुद्धिः' **का निर्मलता** 'ब्रह्मचर्यस्य' **तुर्यव्रतस्य ?, अपि तु न काऽपीत्यर्थः । इत्थवि दोसा-कयाइ वसहीए एगा खुड्डी किड्डिज्जा कोइ अवहरिज्ज वा बलाउ वा कोइ सेविज्जा इच्चाइ बहुदोसा १ । तरुणीए दोसा मोहोदएण फलादिणा चउत्थं सेविज्जा, एगागिणिं दट्ठूण तरुणा समागच्छंति, हासाइयं कुव्वंति, अंगे वा लग्गंति तओ उड्डाहो भवति, तप्फासाओ वा मोहोदओ भवति, सीलं भंजिज्ज वा, गब्भो वा भवति, जइ गालइ तो महादोसो भवइ, अह वड्ढइ तो पवयणे महाउड्डाहो भवति, अहवा पुव्वकीलियं समरमाणी वेस्साइयं वा दट्ठूण गच्छं मुत्तूण एगागी तरुणी साहुणी गच्छिज्जा, एवमाई दोसा भवंति, तो उवस्सए एगा तरुणी ण मुत्तव्वे" [ ] ति ॥१०७॥**

**जत्थ य उवस्सयाओ, [१]बाहिं गच्छे दुहत्थमित्तंपि ।**
**एगा रत्तिं समणी, का मेरा तत्थ गच्छस्स ? ॥१०८॥**

यत्र चोपाश्रयात् बहिर्गच्छेद् द्विहस्तमात्रामपि ।
एकाकिनी रात्रौ श्रमणी, का मर्यादा तत्र गच्छस्य ? ॥१०८॥

व्याख्या – यत्र च **गणे** उपाश्रयाद्बहिरेकाकिनी रात्रौ 'श्रमणी' **साध्वी** द्विहस्तमात्रामपि **भूमिं** गच्छेत् तत्र गच्छस्य का मर्यादा ? । **इत्थवि दोसा-"कयाई परदारसेवका रयणीए एगागिणिं दट्ठूण हरिज्जा, उड्डाहं वा करंति, पच्छन्नं वा रायाई भममाणो संकिज्जा-का एसा ?, चोरावि अवहरंति, वत्थाईयं वा गिण्हंति, अहवा कयाई गुरुणीए फरुसं चोयणं संभरमाणी पुव्वकीलियं वा रयणीए विसेसओ संभरइ, तो एगागिणी कत्थवि गच्छिज्जा, इच्चाइ दोसमूलं णाऊण रयणीए एगागिणीए समणीए उवस्सयाओ बाहिं सया न गंतव्वं" [ ] ति ॥१०८॥**

---

१. 'राइं' A-D-प्रते ।

**जत्थ य एगा समणी, एगो समणो य जंपए [1]सोम ! ।**
**नियबंधुणा वि सद्धिं, तं गच्छं गच्छगुणहीणं ॥१०९॥**

यत्र च एकाकिनी श्रमणी एकाकी साधुश्च जल्पते सौम्य ! ।
निजबन्धुनापि सार्द्धं, तं गच्छं गच्छगुणहीनम् ॥१०९॥

व्याख्या – **यत्र चोत्सर्गे**णैकाकिनी श्रमणी=**मुण्डी एकाकिना निजबन्धुनाऽपि सार्द्धं जल्पति, यद्वा** एकाकी साधु**र्निजभगिन्याऽपि सार्द्धं जल्पति,** हे सौम्य ! = **हे गौतम !** तं गच्छं गच्छगुणहीनं **जानीहि, यत एकाकिन्या सार्द्धं जल्पनेन बहुदोषोत्पत्तिर्भवति, कामवृत्तेर्मलिनत्वादिति। तथा च साध्वीनां जल्पनेन प्रीत्यादयो भवन्ति, उक्तञ्च –**

**"संदंसणेण पीई** १ **पीईउ रई** २ **रईउ वीसंभो** ३ **।**
**वीसंभाओ पणओ** ४ **पणयावि अ भवइ पडिबंधो** ५ **॥१॥"** [ ]

**साध्वीनां संदर्शनेन साधूनां प्रीतिरुत्पद्यते** १, **प्रीत्या चित्तसमाधानं** २, **ततो विश्रम्भो=विश्वासः** ३, **विश्वासात्प्रणयः=स्नेहः** ४, **तस्मात्प्रतिबन्धः** ५ **॥१॥**

**"जह जह करेसि नेहं तह तह नेहो अ वड्ढइ तुमंसि ।**
**तेण नडिओमि बलियं जं पुच्छसि दुब्बलतरोसि ॥१॥"** [ ]

**हे साध्वि ! यथा यथा त्वं मम स्नेहं संपादयसि तथा** २ **मम त्वयि स्नेहो वर्द्धते, तेन स्नेहेन नटितोऽस्मि यत्त्वं पृच्छसि दुर्बलतरोऽसि ॥२॥**

**"इय संदंसण-संभासणेण संदीविओ मयणवण्ही ।**
**बंभाई गुणरयणे डहइ अणिच्छेवि पमयाओ ॥१॥"** [ ] **इति,**

**स्त्रीणां रण्डाकुरण्डादीनां साध्वीनां मुण्डीवेषधारणीनां साधुसंयमनृपविष-कन्यकानां च संदर्शनसंभाषणेन संदीपितो मदनवह्निर्ब्रह्मचर्यादीन् गुणरत्नान् प्रमादात् अनिच्छतोऽपि साधोर्दहतीति ॥१०९॥**

**जत्थ जयार-मयारं, समणी जंपइ गिहत्थपच्चक्खं ।**
**पच्चक्खं संसारे, अज्जा पक्खिवइ अप्पाणं ॥११०॥**

---

१. 'सोम्म' **D-G**-प्रते ।

यत्र जकारमकारं, श्रमणी जल्पति गृहस्थप्रत्यक्षम् ।
प्रत्यक्षं संसारे, आर्या प्रक्षिपति आत्मानम् ॥११०॥

व्याख्या – **यत्र यकारं जकारं वा मकारं च, तत्र यकारजकारे यथा-दुष्टस्तव योनिर्येन त्वमुत्पन्ना, याहि शठेन सार्द्धं योगिनी भव, किं तव लग्नो यक्षः ?, त्वां याकिनी भक्षयति ?, तव जननी मृता तव जनको मृतः, रे ! जोषं कुरु, किं जन्मान्तरे यक्षिणी भविष्यसि ?, मकारं यथा-म्रियतां, मरिष्यति तव गुरुणी, मृतस्तव गुरुः, मुखं मा दर्शय, दुष्टं मुखं कृष्णं कुरु, तव मुखे विष्ठा पतिष्यति, चिन्तां मा कुरु, मुखं लात्वा गच्छ इतः, इत्यादिवचनपूर्वकं** 'श्रमणी' **श्रीजिनप्रवचन-दमनी** 'जल्पति' **बाढस्वरेण कुत्सितं वक्तीत्यर्थः** 'गृहस्थप्रत्यक्षं' **गृहस्थानां श्रवणं यथा स्यात्तथा** प्रत्यक्षं=**साक्षात् भवपरम्पराकोटिसङ्कुले** 'संसारे' **चतुर्गत्यात्मके** 'आर्या' **साध्व्याभासवेषा वेषविडम्बिका** 'प्रक्षिपति' **पातयतीत्यर्थः** 'आत्मानं' **स्वयमिति** ॥११०॥

**जत्थ य गिहत्थभासाहिं[१], भासए अज्जिआ सुरुट्ठावि ।**
**तं गच्छं गुणसायर ! समणगुणविवज्जियं जाण ॥१११॥**

यत्र च गृहस्थभाषाभिः भाषते आर्या सुरुष्टाऽपि ।
तं गच्छं गुणसागर ! श्रमणगुणविवर्जितं जानीहि ॥१११॥

व्याख्या – यत्र **गणे च** 'गृहस्थभाषाभिः' **सावद्यरूपाभिर्भाषते, गृहस्थानां यथा-तव गृहं ज्वलतु, तव पुत्रो यमगृहे गच्छतु, त्वं तवाम्बाऽपि शाकिन्यौ स्तः, साध्वीनां यथा-तव शबं कर्षयामि, तव दन्तपङ्क्तिं पातयामि, तव चरणौ कर्त्तयामि, तव जठरेऽग्निक्षेपं कुरु रे शाकिनि ! रे रण्डे !, इत्यादि भाषते,** आर्यिका=**अधमा मुण्डी** सुरुष्टा=**अतिशयेन क्रोधाग्निना ज्वलिता,** अपिशब्दात् **स्वभावस्थाऽपि गृहस्थभाषाभिर्भाषते-तव गृहं पतितं दृश्यते कथं तत्रोद्यमं न कुरुषे ?, तव पुत्री वृद्धाऽस्ति वरगवेषणं कुरु त्वं, त्वया सुष्ठु कृतो विवाहः, तव पुत्रवधूटी भव्याऽस्ति, तव गृहे महिषी दुर्बलाऽस्ति, यौतकं कथं न ददासि ? वध्वा आणकं कथं न**

---

१. 'भासाइ भा०' D-G-प्रते ।

**क्रियताम् ? इत्यादिरूपामिति,** तं गच्छं हे गुणसागर ! श्रमणगुणविवर्जितं 'जानीहि' **अवगच्छ, अन्यत् किं कथ्यते ? इति ॥१११॥**

**गणिगोअम ! जा उचिअं, सेयं वत्थं विवज्जिउं ।**
**सेवए चित्तरुवाणि, न सा अज्जा वियाहिया ॥११२॥**

गणिन् गौतम ! या उचितं श्वेतवस्त्रं विवर्ज्य ।
सेवते चित्ररूपाणि, न सा आर्या व्याहृता ॥११२॥

व्याख्या – **हे** गणिगौतम ! 'या' **आर्या** उचितं श्वेतं **साध्वीयोग्यं** 'वस्त्रं' **वसनं** 'विवर्ज्य' **परित्यज्य सेवते** 'चित्ररूपाणि' **विविधभरतादियुक्तानि वस्त्राणि, यद्वा चित्राणि=आश्चर्यकराणि रूपाणि=गूल्ल-फुद्दद्रिका-कमलादीनि येषां तानि चित्ररूपाणि बहुमूल्यवस्त्राणि साध्व्ययोग्यानि** न सा 'आर्या' **साध्वी** 'व्याहृता' **मया, न कथितेत्यर्थः, किन्तु सा जिनप्रवचनोड्डाहकारिणीति ॥११२॥**

**सीवणं तुन्नणं भरणं, गिहत्थाणं तु जा करे ।**
**तिल्लुउव्वट्टणं वा वि, अप्पणो य परस्स य ॥११३॥**

सीवनं तुन्नं भरणं, गृहस्थानां तु या करोति ।
तैलोद्वर्तनं वापि, आत्मनश्चाऽपरस्य च ॥११३॥

व्याख्या – **या=आर्या** सीवनं **खण्डितवस्त्रादेः** तुन्नं **जीर्णवस्त्रादेः** भरणं **कञ्चुकटोपिकाकुञ्चिकादीनां भरतभरणं** गृहस्थानां, **तुशब्दाद् गृहस्थगृहद्वारादिरक्षणानि करोति, तथा च या** तैलेन **उपलक्षणत्वात् घृतदुग्धतरिकादिना** 'उद्वर्त्तनं' **अङ्गोपाङ्गानां मर्दनं तैलोद्वर्त्तनं, अपिशब्दादङ्गक्षालन-विविधमण्डनादिकं** करोति **सुभद्राऽऽर्यादिवत्** 'आत्मनश्च' **स्वस्य** 'परस्य च' **गृहस्थबालकादेः, सा "पासत्था पासत्थविहारणी उसन्ना उसन्नविहारणी कुसीला कुसीलविहारणी"त्यादिदोषान्विताऽवगन्तव्येति ॥११३॥**

**गच्छइ सविलासगई, सयणीअं तूलिअं सबिब्बोअं ।**
**उव्वट्टेइ सरीरं, सिणाणमाईणि जा कुणइ ॥११४॥**

गच्छति सविलासगतिः शयनीयं तूलिकां च सबिब्बोकम् ।
उद्वर्त्तयति शरीरं स्नानादीनि या करोति ॥११४॥

व्याख्या – 'गच्छइ सविलासगई'त्ति **अत्रापि बिब्बोकशब्दस्य परामर्शः, या आर्या बिब्बोकपूर्वकं यथा स्यात्तथा** 'सविलासगतिर्गच्छति' **विलाससमन्वितया गत्या राजमार्गादौ पण्याङ्गनावत् परिभ्रमतीत्यर्थः, बिब्बोकविलासयोर्लक्षणं यथा-**

**"इष्टानामर्थानां प्राप्तावभिमानगर्वसम्भूतः।**
**स्त्रीणामनादरकृतो** बिम्बोको **नाम विज्ञेयः ॥१॥**

**स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैव ।**
**उत्पद्यते विशेषो यः श्लिष्टः स तु** विलासः **स्यात् ॥२॥"**

[प्रश्नव्या०सू०२७-वृत्तौ]

**अन्ये त्वाहुः -"विलासो नेत्रजो ज्ञेयः" । तथा** शयनीयं=**मञ्चकादिरूपं करोति, किंभूतं ?-डमरुकमणिन्यायेन सकारोऽत्रापि योज्यः** 'सतूलीयं'ति **गुप्तदवरकसहितं, पुनः किंभूतं ?-**'सबिब्बोकं' **गल्लोपधानसहितं, उक्तञ्च** कल्पे-"**उभओ बिब्बोयणे**" **उभयतः=शिरोऽन्तपादान्तावाश्रित्य 'बिब्बोयणे'त्ति उपधाने गूण्डके यत्रेति, तथा** 'उद्वर्त्तयति' **पिष्टिकादिना मर्दयतीत्यर्थः** 'शरीरं' **स्ववपुः, स्नानादीनि आदिशब्दाद्विलेपनमङ्गे कण्ठे पुष्पमालादि हस्ते तालवृन्तादिकं धूपनं वस्त्रादेः दृशोरञ्जनं दन्तकाष्ठमित्यादिकं** या करोति **सा आर्या नोक्ता श्रीवर्द्धमानस्वामिना, किन्तु वेषविडम्बनी जिनाज्ञाकन्दलीकुठारिका प्रवचनमालिन्यकारिणी अनाचारिणी सम्यक्त्वतरुकरिणी प्रमादसरणिः मुनिमनोभङ्गकारिणी सत्साधुयोधवारुणीति ॥११४॥**

**गेहेसु गिहत्थाणं, गंतूण कहा कहेइ काहीया ।**
**तरुणाइ अहिवडंते, अणुजाणे[1] साइ पडिणीया ॥११५॥**

गृहेषु गृहस्थानां गत्वा कथां कथयति काथिका ।
तरुणादीन् अभिपततः अनुजानाति सा प्रत्यनीका ॥११५॥

व्याख्या – **गृहेषु गृहस्थानां गत्वा** 'कथां' **धर्माभासकथां संसारव्यापारविषयां**

---

१. 'जाणे जा उ सा पडणी' **A-D-G-प्रते** ।

वा 'कथयति' वचनविलासेन विस्तारयतीत्यर्थः, 'काहीया'त्ति 'कथिका' कथाकथिका-ऽऽर्या । तथा या च तरुणादीन् पुरुषान् 'अहिवडंते'त्ति 'अभिमुखमागच्छतः' सन्मुखमागच्छमानान् 'अनुजानाति'=आगम्यतां, भवतामागमनं भव्यं, भव्यमस्मदीय-स्थानजातं स्थीयतां, गमनप्रस्तावे पुनरागमनं विधेयं, परत्वं न चिन्तनीयं, अस्मद्योग्यं कार्यं ज्ञाप्यमित्यादिकं वचनाडम्बरं करोतीत्यर्थः, सा=मुण्डी, इकारः पादपूरणे, प्रत्यनीकमिव=प्रतिसैन्यमिव या सा प्रत्यनीका गुरुगच्छसङ्घप्रवचनस्य प्रतिकूलविधानादिति ॥११५॥

किञ्च –

**वुड्ढाणं तरुणाणं, रत्तिं अज्जा कहेइ जा धम्मं ।**
**सा गणिणी गुणसायर ! पडिणीआ होइ गच्छस्स ॥११६॥**

वृद्धानां तरुणानां रात्रौ आर्या कथयति या धर्मं ।
सा गणिनी गुणसागर ! प्रत्यनीका भवति गच्छस्य ॥११६॥

व्याख्या – 'वृद्धानां' जराजीर्णानां पुरुषाणां 'तरुणानां' मन्मथवयःप्राप्तानां उपलक्षणत्वान्मध्यमवयःप्राप्तानां 'रत्तिं'ति रात्रौ निशायां याऽऽर्या कथयति धर्मं सा 'गणिनी' मुख्यसाध्वी हे गुणसागर ! प्रत्यनीका भवति गच्छस्य । यदि च गणिन्याः पुंसां रात्रौ धर्मकथने गणस्य प्रत्यनीकत्वं जायते तदाऽन्यसाध्वीनां का कथा ?, ननु विशेषतरं भवति प्रत्यनीकत्वमिति ॥११६॥

**जत्थ य समणीण-मसंखडाइं गच्छंमि नेव जायंति ।**
**तं गच्छं गच्छवरं, गिहत्थभासाउ नो जत्थ ॥११७॥**

यत्र च श्रमणीनामसंखडानि गच्छे नैव जायन्ते ।
स गच्छः गच्छवरः गृहस्थभाषास्तु न यत्र ॥११७॥

व्याख्या – यत्र=गणे, चात् सङ्घाटकेऽपि 'श्रमणीनां' मोक्षमार्गप्रवृत्तसाध्वीनां 'असंस्कृतानि' परस्परं गृहस्थसार्द्धं वा स्वगणमुनिसार्द्धं स्वसङ्घाटकमुनिवर्गसार्द्धं वा कलहगालिप्रदानावर्णवादादीनि 'नैव जायन्ते' कदाऽपि नैवोत्पद्यन्ते तं 'गच्छं' गणं 'गच्छवरं' गणप्रधानम्, तथा च यत्र गणे 'गृहस्थभाषाः' पूर्वोक्तसावद्यरूपाः, यद्वा

"मामा आई बाप भाई बाई बेटी" इत्यादिका नोच्यन्ते स गच्छो गच्छवर इति ॥११७॥

**जो जत्तो वा जाओ, नालोयइ दिवसपक्खियं वावि ।**
**सच्छंदा[1] समणीओ, मयहरियाए न ठायंति ॥११८॥**

यो यावान् वा जातः नालोचयन्ति दैवसिकं पाक्षिकं वापि ।
स्वच्छन्दाः श्रमण्यः महत्तरिकाया न तिष्ठन्ति ॥११८॥

व्याख्या – यो यावानिति 'जातः' उत्पन्नस्तं तथा 'नालोचयति' न गुरोः कथयति, तथा दैवसिकं पाक्षिकं वा, अपिशब्दाच्चातुर्मासिकं सांवत्सरिकं चातीचारं नालोचयति, तथा 'स्वच्छन्दाः' स्वेच्छाचारिण्यः श्रमण्यो 'महत्तरिकायाः' मुख्यसाध्व्याः आज्ञायां न तिष्ठन्ति स गच्छो मोक्षपदसाधको न, किन्तूदरपूरक एवेति ॥११८॥

**विंटलिआणि पउंजंति, गिलाण-सेहीण नेव[2] तप्पंति ।**
**अणगाढे आगाढं, करंति आगाढि अणगाढं ॥११९॥**

विंटलिकानि प्रयुञ्जन्ते, ग्लानशैक्ष्यान् नैव तर्पयन्ति ।
अनागाढे आगाढं कुर्वन्ति आगाढे अनागाढम् ॥११९॥

व्याख्या – 'विण्टलिकानि' निमित्तादीनि, यद्वा 'वेण्टलिकानि' यन्त्रमन्त्रादीनि 'प्रयुञ्जन्ति' प्ररूपयन्तीत्यर्थः 'ग्लानिकानां' रोगिणीनां 'सेहीण'त्ति नवदीक्षितसाध्वीनां 'नेय तप्पंति'त्ति औषधभेषजवस्त्रपात्रज्ञानाभ्यासादिना चिन्तां न कुर्वन्तीत्यर्थः । तथा आगाढम्=अवश्यकर्त्तव्यं सर्पभक्षितविषमूर्छितमरणान्तशूलादिपीडितप्रति-जागरणादिकम्, न आगाढमनागाढम् तस्मिन् अनागाढे कार्ये 'आगाढं' अवश्यकर्तव्य-मिति कृत्वा कुर्वन्तीत्यर्थः, तथा 'आगाढे' पूर्ववर्णितस्वरूपे कार्ये अनागाढं कार्यं कुर्वन्ति, [3]★तदनुचितं प्रतिजागरणं कुर्वन्तीत्यर्थः★, यद्वा 'अणगाढे'त्ति आचाराङ्गादि-अनागाढयोगानुष्ठाने 'आगाढं'ति भगवतीप्रमुखमागाढयोगानुष्ठानं कुर्वन्ति, तथा आगाढयोगानुष्ठानेऽनागाढयोगानुष्ठानं कुर्वन्ति च ॥११९॥

---

१. 'दाउ व सवणे मय०' F-प्रते । २. 'नेय' E-F-G-H-प्रते, 'नेव तिप्पंति' D-प्रते । ३. '★......★' एतच्चिन्हान्तर्गतः पाठः पूर्वमुद्रिते नोपलभ्यते, अत्र A-आदिप्रतानुसारेण विन्यस्तः ।

तथा –

**अजयणाए पकुव्वंति, पाहुणगाण अवच्छला ।**
**चित्तलयाणि अ सेवंते, चित्ता रयहरणे तहा ॥१२०॥**

अयतनया प्रकुर्वन्ति प्राघूर्णिकानामवत्सला ।
चित्तलानि च सेवन्ते, चित्राणि रजोहरणानि तथा ॥१२०॥

व्याख्या – 'अयतनया' **जीवयतनां विनेत्यर्थः** 'पकुव्वंति'**त्ति प्रकर्षेण=मनोवाक्कायेन भिक्षाटनभोजनमण्डल्युद्धरणस्थण्डिलगमनग्रामानुग्रामपरिभ्रणवसति-प्रमार्जनप्रतिलेखनाऽऽवश्यकादिकं कुर्वन्ति, यद्वा न विद्यते यतना=आचरणेनाथ षट्कायपरिपालना यत्र सा अयतना=केवलद्रव्यलिङ्गधारणा तया प्रकुर्वन्ति जठरपूरणार्थं रामाद्यावर्जनादिकमिति, तथा** 'प्राघूर्णकानां' **ग्रामान्तरागतानां मार्गश्रम-संयुक्तानां क्षुत्पिपासापीडितानां साध्वीनां** 'अवच्छल'**त्ति निर्दोषभव्यान्नपानादिना बहुमानपूर्वकं भक्तिं न कुर्वन्तीत्यर्थः, तथा** 'चित्तलिआणि'**त्ति चित्रितानि=नानाचित्रसंयुक्तानि वस्त्रकम्बलीपात्रदण्डादीनि, यद्वा** 'चीतलिकानि' **चउकचीतलिका-पाचीका-सारपासकादीनि** 'सेवन्ते' **स्वयं प्रवर्त्तयन्तीत्यर्थः, चशब्दाद्धस्ते मिन्ध्यिका, चरणेऽलक्तकुङ्कुमादि, कण्ठे हारकादि इत्यादि कामाङ्गानि सेवन्ति, तथा रजोहरणे** 'चित्ता' **इति चित्राणि बाह्याभ्यन्तरपञ्चवर्णगुल्लादिकर्षणानि कुर्वन्तीति, हे गौतम ! ता अनार्या उच्यन्त इति ॥१२०॥**

**गइ-विब्भमाइएहिं, आगारविगार तह [1]पगासंति ।**
**[2]जह [3]वुड्ढण मोहो, समुईरइ किं तु तरुणाणं ? ॥१२१॥**

गतिविभ्रमादिभिः आकारविकारं तथा प्रकाशयन्ति ।
यथा वृद्धानां मोहः समुदीर्यते किं तु तरुणानाम् ? ॥१२१॥

व्याख्या – **या=आर्या** 'गतिविभ्रमादिकैः' **गमनविलासादिकैः** आकारश्च=**स्थूलधीगम्यदिगवलोकनमुखनयनादिचेष्टा** विकारश्च=**स्तनकक्षादिप्रदेशे हस्ता-**

---

१. 'पगासिंति' A-D-E-F-G-H-प्रते । २. 'जह कमढगाण मोहो' F-प्रते, 'जह कब्ब(प्प)ट्ठगाण मोज्ञे' E-G-प्रते । ३. 'वुड्ढाणवि मोहो' D-H-प्रते ।

ङ्गुल्यादिक्षेपणं आकारविकारं तं 'तथा प्रकाशयन्ति' तथा प्रकटीकुर्वन्ति यथा 'वृद्धानामपि' स्थविराणामपि 'मोहः' वेदोदयः कामानुराग इत्यर्थः 'समुदीरइ'त्ति तत्क्षण एवोत्पद्यते, 'तुः' पुनरर्थे, किं पुनस्तरुणानां साधूनाम् ? इति, हे सौम्य ! ताः साध्व्यो न, किन्तु नट्य इति ॥१२१॥

बहुसो उच्छोलिंती, मुह-नयणे हत्थ-पाय-कक्खाओ ।
गिण्हेइ[1] रागमंडल, सोइंदिअ तह य [2]कब्बट्टे ॥१२२॥

बहुशो उच्छोलयन्ति मुखनयनानि हस्तपादकक्षाः ।
गृह्णन्ति रागमंडलं श्रवणेन्द्रियं तथैव कल्पस्थाः ॥१२२॥

व्याख्या – 'बहुशः' कारणं विना वारंवारं 'उच्छोलिंती'ति क्षालयन्तीत्यर्थः 'मुखनयने' वक्त्राक्षिणी हस्तपादकक्षाश्च । तथा च याऽऽर्या 'गिण्हेइ'त्ति परेभ्यो रागज्ञेभ्यो 'गृह्णन्ति' शिक्षन्ते 'रागमण्डलं' श्रीराग १ गऊडी २ मल्हार ३ केदारउ ४ मालवीगुडउ ५ सिन्धुउ ६ देशाख ७ आसाउरी ८ अधरस ७ काल्हेरउ ८ भूपाल ९ सामेरी १० मारऊणी ११ मेवाडउ १२ रामगिरी १३ केदारगउडी १४ मधुराग १५ प्रभाती १६ सबाब १७ वेलाउली १८ वसंत १९ नाट २० धन्यासी २१ इत्यादिकं रागसमूहं 'तहय'त्ति च पुनस्तद्रागमण्डलं गृहीत्वा 'तथा' तेन प्रकारेण करोति यथा 'कब्बट्टे'त्ति प्राकृतत्वाद्विभक्तिपरिणामः, तरुणपुरुषाणां, यद्वा 'कब्बट्टे'त्ति समयभाषया बालकास्तेषामपि 'सोइंदिय'त्ति श्रोत्रेन्द्रियं श्रवणेन्द्रियं परमसन्तोषं प्राप्नोति । यद्वा 'गिण्हइ'त्ति गृह्णन्ति करचालनेन तथा वादयन्ति रागमण्डलं चाङ्गप्रमुखं यथा बालतरुणादीनां श्रवणेन्द्रियं तोषं यातीति, यद्वा रागमण्डलं श्रोत्रेन्द्रियेण गृह्णन्ति, तथा च गृहस्थबालकान् क्रीडार्थं गृह्णन्तीति । यत्रोत्तरार्द्धे पाठान्तरं यथा-"गिण्हइ रामणमंडणं भोयंति य तह य कब्बट्टे"त्ति, अस्यार्थः-'कब्बट्टे'त्ति गृहस्थबालकान् स्नेहाद् गृह्णन्ति तेषां 'रामणे'ति क्रीडां कारयन्ति 'मण्डनं' शरीर-भूषणां कुर्वन्ति, तथा तान् भोजयन्तीति ता आर्याः केन कथ्यन्ते ?, न केनापीति ॥१२२॥

१. 'गिन्हइ रामण मंडण भोइंति य तह' F-प्रते । २. 'कप्पट्ठे' G-प्रते, 'कब्बट्ठे' H-आदिषु, 'कप्पस्स' F-प्रते ।

**जत्थ य थेरी तरुणी, थेरी तरुणी अ अंतरे सुयइ ।**
**गोअम ! तं गच्छवरं, वरनाण-चरित्तआहारं ॥१२३॥**

यत्र च स्थविरा तरुणी, स्थविरा तरुणी च अन्तरिताः ।
स्वपन्ति गौतम ! तं गच्छवरं वरज्ञानचारित्राधारम् ॥१२३॥

व्याख्या – यत्र च **गणे** 'स्थविरा' **वृद्धा** तरुणी च=**युवती साध्वी, स्थविरा च तरुणी, चकारान्मध्यमा तरुणी तरुणीमध्यमा च** 'अन्तरे' **अन्तराले स्वपिति, अन्यथा तरुणीनां निरन्तरशयने परस्परं जङ्घाकरस्तनपादादिस्पर्शने सति मन्मथचिन्ता पूर्वस्मरणादिकं भवति, अतः स्थविरान्तरिताः स्वपन्ति, हे गौतम ! तं गच्छवरं जानीहि, किंभूतं ?-वरज्ञानचारित्राधारमिति ॥१२३॥**

**[1]धोयंति कंठि[2]आओ पो[3]यंति तह य दिंति पोत्ताणि ।**
**गिहिकज्जचिंतगीओ, न हु अज्जा गोअमा ! ताओ ॥१२४॥**

धावन्ति कण्ठिकाः प्रोतयन्ति तथा च ददति वस्त्राणि ।
गृहिकार्यचिन्तिकाः न हु आर्या गौतम ! ताः ॥१२४॥

व्याख्या – 'धावन्ति' **कारणं विना नीरेण क्षालयन्तीत्यर्थः** 'कण्ठिकाः' **गलप्रदेशान् तथा** 'पोयंती'**ति आभरणमुक्ताफलचीडकादीनि** 'प्रोतयन्ति' **रन्ध्रे सूत्रादिकं सञ्चारयन्तीत्यर्थः, गृहस्थानामिति गम्यते, तथा** 'ददति' **अर्पयन्ति,** 'पोत्ताणि' **बालकार्थं वस्त्रखण्डानि, चकाराद् दुग्धौषधजटिकादिकमपि ददति, यद्वा शरीरे** 'पोतानि' **मलस्वेदादिस्फेटनाय जलार्द्रीकृतवस्त्राणि** 'ददति' **घर्षयन्तीत्यर्थः,** 'गृहिकार्यचिन्तिकाः' **अगारिगृहव्यापारकरणतत्पराः,** नैव **ता** आर्याः **हे** गौतम !, **किन्तु कर्म्मकर्य्य इत्यर्थः ॥१२४॥**

**[4]खरघोडाइट्ठाणे, वयंति ते वा वि तत्थ वच्चंति ।**
**वेसत्थीसंसग्गी, उवस्सयाओ समीवंमि ॥१२५॥**

खरघोटकादिस्थाने व्रजन्ति ते वापि तत्र व्रजन्ति ।
वेश्यास्त्रीसंसर्गिः उपाश्रयः समीपे ॥१२५॥

---

१. 'धोइंति' **A-D-F-G-H**-प्रते । २. '०आउ' **D**-आदिप्रते । ३. 'पोइंति' **A**-आदिप्रते । ४. 'थलघो०' **E-F-G**-प्रते ।

व्याख्या – **खरघोटकादिस्थाने व्रजन्ति साध्व्यः, तत्र खरशब्देन दासप्रायः, यदुक्तमोघनिर्युक्तौ-"खरउ द्व्यक्षरो दासप्रायः द्व्यक्षरिका दासी"ति, घोटकशब्देन द्यूतकारादिधूर्त्ताः, यदुक्तं** निशीथचूर्णौ-**"घोडेहिं गाहा-घोडा वट्ठा जूयकरादिधुत्ता" इति, आदिशब्दादन्येऽपि तादृशा ग्राह्याः, तथा** 'तेऽपि' **खरघोटकादयः** 'तत्र' **आर्यास्थाने** व्रजन्ति, **अकालसकाले आगच्छन्तीत्यर्थः, वाशब्दात् परोक्षे ते ताभिः सह ता वा तैः सह दोहकगाथादिमुत्कलनेन परिचयं कुर्वन्तीति, तथा** 'उपाश्रयसमीपे' **साध्वीवसतिपार्श्वे वेश्या स्त्री तस्याः, यद्वा वेश्यो=ना तत्सदृशा याः स्त्रियस्तासां, यद्वा वेश्यायाः स्त्री दासीलक्षणा तस्याः, यद्वा वेश्या या स्त्री नटपुरुषमेलापकलक्षणा तस्याः, वेश्या स्त्री तत्पुत्रीलक्षणा तस्या वा, अथवा वेषस्त्री=योगिन्यादिवेषधारिका तस्याः, यदि वा वेषस्य=रजोहरणादिद्रव्यलिङ्गस्य अर्थः=उदरपूरणमुग्धवञ्चनादि-प्रयोजनं वेषार्थः, स च विद्यते यस्यासौ वेषार्थी, सर्वभ्रष्टाचारी साधुरित्यर्थः, आर्षत्वाद्दीर्घः, तस्य संसर्गो भवति हे गौतम ! साऽऽर्या द्व्यक्षरिकोच्यते न त्वार्येति ॥१२५॥**

**[1]सज्झायमुक्कजोगा, धम्मकहा विगह पेसण गिहीणं ।**
**गिहि[2]निस्सिज्जं [3]बाहिंति, संथवं तह करंतीओ ॥१२६॥**

स्वाध्यायमुक्तयोगाः धर्मकथाविकथाप्रेषणगृहिणाम् ।
गृहिनिषद्यां बाधन्ते संस्तवं कुर्वन्त्यः ॥१२६॥

व्याख्या – 'षट्कायमुक्तयोगाः' **को भावः ? - षट्कायेषु=पृथिव्यादिषु मुक्तो= दूरीकृतो योगो=यत्नालक्षणो व्यापारो याभिस्ताः षट्कायमुक्तयोगाः संयत्यो धर्मकथामधर्मकथां वा ★[4]कथयन्ति गृहस्थानाम्★, तथा विकथां परस्परं विधवादिसार्द्धं वा स्त्र्यादिकथां कुर्वन्ति, तथा गृहस्थानां कार्यादौ प्रेषणं कुर्वन्ति** 'गृहिनिषद्यां वाहयन्ति' **गृहस्थानामासनादिकमुपवेशनार्थं मुञ्चन्तीत्यर्थः, यदि वा** गृहिणां निषद्या= **चक्कलक[5]गद्दिकादिरूपा तां** 'वाहिंती'**ति व्यापारयन्तीत्यर्थः, संस्तवो द्विधा गुण-**

---

१. 'छक्कायमुक्क०' **E-H**-प्रते । २. '०निस्सेज्जं' **H**-प्रते । ३. 'वाहिंति' **D-E-F-G-H**-प्रते । ४. '★.........★' एतच्चिन्हान्तर्गतपाठस्तु पूर्वमुद्रिते नोपलभ्यते, अत्र **A**-आदिप्रतपाठः । ५. "गब्दिका०" इति **A**-प्रते ।

सम्बन्धिसंस्तवभेदात्, एकैको द्विधा पूर्वपश्चाद्भावित्वात्, तत्र दानात्पूर्वं पश्चाद्वा गुणान् यत्र स्तौति स गुणसंस्तवः, सम्बन्धिसंस्तवस्तु जननीजनकभ्रातृभगिन्यादि-पूर्वकालभावित्वात् पूर्वः, श्वश्रूश्वशुरकलत्रपुत्रादिपश्चात्कालभावित्वात्पश्चात्संस्तवः, आत्मपरतारुण्यादिलक्षणं वयो ज्ञात्वा तदनुरूपं यत् श्वेतपट्यः सम्बन्धं कुर्वन्ति स सम्बन्धिसंस्तवस्तं संस्तवं 'करंतीउ'त्ति कुर्वन्त्यस्ताः साध्व्यो न भवन्तीति ॥१२६॥

**समा सीस-पडिच्छीणं, चोअणासु अणालसा ।**
**गणिणी गुणसंपन्ना, पसत्थपरिसाणुगा[१] ॥१२७॥**

समाः शिष्यप्रातीच्छिकानां चोदनासु अनालस्याः ।
गणिन्यो गुणसम्पन्नाः प्रशस्तपरिषदनुगताः ॥१२७॥

व्याख्या – 'समाः' तुल्या भवन्ति, रागद्वेषपरिणामाभावात् 'सीस'त्ति स्वशिष्याः =स्वसङ्घाटिका इत्यर्थः, प्रतीच्छिकाश्च=स्वपरगच्छात् ज्ञानवैयावृत्त्याद्यर्थमागतास्तासां तासु वेति, 'चोयणासु'त्ति नोदनादिषु पूर्वोक्तशब्दार्थेषु 'अनालस्याः' सर्वथा-ऽऽलस्यरहिताः, गुणाः=ज्ञानदर्शनचारित्ररूपास्तैः संपन्नाः=समन्विताः, प्रशस्ता-क्षमाविनयवैयावृत्त्यादिगुणयुक्तत्वात् परिषत्=परिवाररूपा तयाऽनुगताः=सदा संयुक्ताः, एवंविधो गणः=साध्वीपरिवाररूपो विद्यते यासां ता गणिन्यो=मुख्यसाध्व्यो भवन्तीति ॥१२७॥

**संविग्गा भीयपरिसा य, उग्गदंडा य कारणे ।**
**सज्झाय-झाणजुत्ता य, संगहे अ विसारया ॥१२८॥**

संविग्ना भीतपर्षदश्च उग्रदण्डाश्च च कारणे ।
स्वाध्यायध्यानयुक्ताः सङ्ग्रहे च विशारदाः ॥१२८॥

व्याख्या – 'संविग्नाः' परमसंवेगरसलीनाः भीता=भयं प्राप्ता परिषत्=परिवारो यासां ताः भीतपरिषदः, यद्वा भीता=स्वपरसङ्घाटिकया सह कलहादिकरणेन भयं गता परिषद् यासां तास्तथा, यद्वा भयमिहलोकभयं=स्वगुरुगुरुणां गणकुल-जात्यादीनामपकीर्त्तिलक्षणं परलोकभयं=महाव्रतदूषणलक्षणं परिषदि=परिवारे यासां

---

१. '०पुरिसाणुगा' पूर्वमुद्रिते, अत्र E-H-आदिप्रतपाठः ।

तास्तथा, उग्रः तीव्रो दण्डः प्रायश्चित्तादिरूपो यासां ता उग्रदण्डाश्च 'कारणे' अकर्त्तव्ये कृत इति, 'स्वाध्यायध्यानसंयुक्ताः' तत्र स्वाध्यायः पञ्चधा - वाचना १ प्रच्छना २ परावर्त्तना ३ ऽनुप्रेक्षा ४ धर्म्मकथा ५ रूपः । ध्यानं च धर्मशुक्ललक्षणम्, यद्वा ध्यानं चतुर्धा पिण्डस्थादि, यदुक्तम् –

"झाणं चउव्विहं होइ तत्थ पिंडत्थयं १ पयत्थं च २ ।
रूवत्थं ३ रूवाइय ४ मेएसिमिमं तु वक्खाणं ॥१॥

देहत्थं गयकम्मं [1]चंदाभं नाणिणं विऊ जत्थ ।
परम्मिस्सरियं अप्पं पिच्छइ तं होइ पिंडत्थं १ ॥२॥

मंतक्खराणि सारीरपउमपत्तेसु चिंतए जत्थ ।
जोगी गुरूवएसा पयत्थमिह वुच्चए तं तु २ ॥३॥

जं पुण सपाडिहेरं ओसरणत्थं जिणं परमनाणिं ।
पडिमाइ समारोविय, झायइ तं होइ रूवत्थं ३ ॥४॥

जं परमाणंदमयं परमप्पाणं निरंजणं सिद्धं ।
झाएइ परमगुरुं रूवाईयं तमिह झाणं ४ ॥५॥" [ ] इति ।

तथा 'सङ्ग्रहे' शिष्यादिसङ्ग्रहणे, चकारादुपग्रहे च=निर्दोषवस्त्रपात्रादिसङ्ग्रहणे 'विशारदाः' कुशलास्ता गणिन्य इति ॥१२८॥

**जत्थुत्तर-पडिउत्तर वडिआ [2]अज्जा उ साहुणा सद्धिं ।**
**पलवंति सुरुट्ठा वी, गोयम ! किं तेण गच्छेण ? ॥१२९॥**

यत्र उत्तरं प्रत्युत्तरं वृद्धा आर्याः साधुना सार्द्धम् ।
प्रलपन्ति सरोषा अपि गौतम ! किं तेन गच्छेन ? ॥१२९॥

व्याख्या – 'यत्र' गणे उत्तरं प्रत्युत्तरं वा ददाति, तत्रोत्तरं=एकवारं प्रत्युत्तरं= पुनः पुनरिति, कलहेनाशुभरागेण वेति शेषः, 'वडिआ'ति मुख्यभिक्षुणी वृद्धा वा=जराग्रस्ता वा 'आर्या' अनार्यारूपा, तथा च यत्र मुख्या अन्या वा मुण्ड्यः

१. 'चेदात्तं (जं दंतं)' इति पूर्वमुद्रिते, अत्र A-आदिप्रतपाठः । २. 'अज्जाओ' H-प्रते ।

'साधुना' मुख्यगुरुणा अन्येन मुनिना वा 'सार्द्धं' साकं प्रकर्षेण लोकसमक्षमसमक्षं वा यथा वाक्यं लपन्ति=वदन्ति, किंभूताः?-सु=अतिशयेन रुष्टाः= कोपचाण्डालत्वं प्राप्ताः 'सुरुष्टाः' अत्यन्तकोपगता इत्यर्थः, अपिशब्दादल्परुष्टा अपि हे गौतम ! किं 'तेन' अधमरूपेण 'गच्छेन' मुण्डीवृन्देनेति ॥१२९॥

जत्थ य गच्छे गोयम ! उप्पण्णे कारणंमि अज्जाओ ।
गणिणीपिट्ठिआओ, भासंती मउअसद्देण ॥१३०॥

यत्र च गच्छे गौतम ! उत्पन्ने कारणे आर्याः ।
गणिनीपृष्टिस्थिता भाषन्ते मृदुकशब्देन ॥१३०॥

व्याख्या – यत्र च 'गच्छे' गणे हे गौतम ! 'उत्पन्ने' प्रादुर्भूते 'कारणे' ज्ञानदर्शन-चरणानामन्यतरस्मिन् कार्ये 'आर्याः' लघुसाध्व्यः गणिनी=मुख्यसाध्वी तस्याः पृष्ठिस्थिताः=पश्चाद्भागे व्यवस्थिताः 'भाषन्ते' जल्पन्ति, केन ? - 'मृदुकशब्देन' अल्पर्जुर्निर्विकारवाक्येन स्थविर-गीतार्थादिसार्द्धमिति । 'पट्ठवियाउ'त्ति पाठे तु गणिन्या प्रस्थापिताः=प्रेषिताः सत्यो 'मृदुकशब्देन' विनयपूर्वकवचनकथनेन भाषन्ते स गच्छ इति ॥१३०॥

माऊए दुहियाए, सुण्हाए अहव [1]भइणिमाईणं ।
जत्थ न अज्जा अक्खइ, गुत्तिविभेयं तयं गच्छं ॥१३१॥

मातुः दुहितुः स्नुषायाः अथवा भगिन्यादीनाम् ।
यत्र न आर्या आख्याति गुप्तिविभेदं स गच्छः ॥१३१॥

व्याख्या – 'मातुः' जनन्याः 'दुहितुः' सुतायाः पुत्रस्य वाऽपत्यं, 'स्नुषायाः' वधूट्याः, अथवा भगिन्यादीनां 'यत्र' गणे न 'आर्या' भिक्षुणी 'आख्याति' कथयति 'गुप्तिविभेदं' नाम प्रकारं, कोऽर्थः ? - कारणं विना स्वपरवर्गे वदति=ममेयं माता ममेयं दुहितेत्यादि, यदि वा अहमस्यास्या वा माता अहमस्यास्या वा दुहिता अहमस्य वधूटीत्यादि न जल्पति स गच्छ इति, यद्वा मात्रादीनां गुप्तेः=किमपि गोप्यस्य लोकावाच्यरूपस्य नाख्याति साध्वी स गच्छ इति ॥१३१॥

---

१. 'भयणि०' E-प्रते ।

[1]दंसणियारं कुणई, चरित्तनासं जणेइ मिच्छत्तं ।
दुण्हवि वग्गाणऽज्जा, विहारभेयं करेमाणी ॥१३२॥

दर्शनातिचारं करोति चारित्रनाशं जनयति मिथ्यात्वम् ।
द्वयोरपि वर्गयोः आर्याः विहारभेदं कुर्वाणाः ॥१३२॥

व्याख्या – 'दर्शनातिचारं' **सम्यक्त्वातिचारं करोति** 'चारित्रनाशं' **चरणविनाशं मिथ्यात्वं च** 'जनयति' **निष्पादयति द्वयोरपि** 'वर्गयोः' **साधुसाध्वीलक्षणयोः स्वपरे आर्या** 'विहारभेदं' **जिनोक्तमार्गविनाशं 'करेमाणी'ति कुर्वाणा, यद्वा विहारो=मास-कल्पादिना विचरणं तस्य भेदो=मर्यादोल्लङ्घनं तं कुर्वाणा, एकत्र वसने साध्वीनां कारणं विना दर्शनचरणादिबहुविनाशहेतुत्वादिति ।**

**तथा च विहारं कुर्वतां यतीनां कदाचिन्नावा १ संघट्ट २ लेप ३ लेपोपरिकं ४ जलं भवेत्, तत्रेयं यतना, यथा–**

**"दो जोयण वंकेणं थलेण परिहरइ बेडियामग्गं ।**
**सढजोयण घट्टेणं १, जोयण लेवेण २ उवरि दो गाऊ ३ ॥१॥**

**सढजोयण वंकेणं थलेण लेवोवरिं च वज्जेइ ।**
**अधजोयण लेवेणं १ संघट्टेणेगजोयणेणं च २ ॥२॥**

**एगजोयण थलेणं, संघट्टेणद्धजोयणेण मुणी ।**
**लेवं वज्जइ य तहा घट्टं अधजोयण थलेण ॥३॥**

**एवं मग्गाभावे नावाईहिंपि कारणे मुणिणो ।**
**गच्छंतस्सवि दोसो न कोवि भणिओ जिणिंदेहिं ॥४॥" [ ]**

**एएसिं गाहाणं** भावत्थो **जहा-दोहिं जोयणेहिं गए थलपहेण गम्मइ मा य णावाए, जइ थलपहे सरीरोवघाई तेणा सीहा वा वाला वा भवंति, थलपहे भिक्खं वा ण लब्भइ, वसही वा, तो दिवड्ढजोयणेणं संघट्टेण गम्मइ मा य णावाए, अह णत्थि संघट्टो सति वा परं दोसजुत्तो तो जोयणेण लेवेण गच्छउ**

१. 'दंसणइयार' H-प्रते ।

मा य णावाए, अह णत्थि लेवोवि सति वा पुव्वुत्तदोसजुत्तो तो अद्धजोयणेण लेवोवरिणा गच्छउ मा य णावाए, अह तंपि णत्थि सति वा दोसजुयं तदा णावाए गच्छउ, एवं दुजोयणहाणीए णावाए पत्तो १, दिवड्ढजोयणेण थलपहेण गच्छउ, मा य लेवोवरिणा, थलपहे असति दोसजुत्ते वा तो एगजोयणेण संघट्टेण गच्छउ मा य लेवोवरिणा, अह तंपि नत्थि दोसजुत्तो वा तो अद्धजोयणेण लेवेणं गच्छउ मा य लेवोवरिणा २, एगजोयणेण थलपहेण गच्छउ मा य लेवेणं, अह नत्थि दोसजुत्तो वा तो अद्धजोयणेण संघट्टेण गच्छउ मा य लेवेणं ३, अद्धजोयणेण थलपहेणं गच्छउ मा य संघट्टेणं ४, एतेसिं परिहासेणं असतीए णावा १ लेवोवरि २ लेव ३ संघट्टेहिंवि ४ गंतव्वं जयणाए" इति ॥१३२॥

**तम्मूलं संसारं, जणेइ अज्जावि गोयमा ! नूणं ।**
**तम्हा धम्मुवएसं, [1]मुत्तुं अन्नं न भासिज्जा ॥१३३॥**

तन्मूलं संसारं जनयति आर्यापि गौतम ! नूणं ।
तस्मात् धर्मोपदेशं मुक्त्वा अन्यत् न भाषते ॥१३३॥

व्याख्या – **तत्पूर्वोक्तजिनाज्ञाखण्डनमूलं संसारं** 'जनयति' **अर्जयतीत्यर्थः** 'आर्या' **साध्वी, अपिशब्दान्मुनिरपि,** हे गौतम ! 'नूनं' **निश्चितं** 'तम्हा' **इति यस्माज्जिनाज्ञाखण्डने विरुद्धप्ररूपणेऽनन्तभवभ्रमणं जायते तस्माद्धर्मोपदेशं स्वर्गापवर्गसौख्यप्रदं मुक्त्वा** 'अन्यत्' **आप्तवाक्यविसंवादि** 'न भाषेत' **न स्वपरसभायां प्ररूपयेदिति** ॥१३३॥

**मासे मासे उ जा अज्जा, एगसित्थेण पारए ।**
**[2]कलहे गिहत्थभासाहिं, सव्वं तीए निरत्थयं ॥१३४॥**

मासे मासे तु या आर्या एकसिक्थेन पारयेत् ।
कलहे गृहस्थभाषाभिः, सर्वं तस्याः निरर्थकम् ॥१३४॥

व्याख्या – **'मासे मासे उ'त्ति मासक्षपणं २ कृत्वेत्यर्थः, तुशब्दान्मासक्षपणद्वित्र्यादिकं कृत्वाऽपि याऽऽर्या** 'एकसित्थेन' **अद्वितीयेन कूरादिरूक्षरूपेण, न तु**

---

१. 'मोत्तुं' D-आदिप्रते । २. 'कलहइ' D-आदिप्रते ।

सिक्थद्वयादिनेत्यर्थः, 'पारयेत्' पारणकं करोतीत्यर्थः, एवंविधाऽपि साध्वी यदि 'कलहे'त्ति "द्वितीयातृतीययोः सप्तमी"ति द्वितीयार्थे सप्तमी 'कलहं' राटिं स्वपरवर्ग-समक्षं करोति, काभिः ?-गृहस्थानां=अनार्यरूपाणां भाषा=मर्मोद्घाटनाऽऽल-प्रदान-शापप्रदान-मकारचकारादिगालिप्रदानलक्षणास्ताभिर्गृहस्थभाषाभिः, 'सर्वं' तपः-कष्टादिकं 'तीइ'त्ति 'तस्याः' नामसाध्व्याः कुरण्डतुल्यायाः 'निरर्थकं' सर्वथा निष्फलमित्यर्थः । ननु साध्वी कलहं करोति साधुः किं न करोति ?, उच्यते-प्रवाहेण स्तोककार्येऽपि रामाः शुनीवत्कलहं निष्पादयन्ति, न तथा साधवः, अत आर्याः प्रोक्ता इति ॥१३४॥

अथ कस्मादिदमुद्धरितमिति दर्शयति –

**महानिसीह-कप्पाओ, ववहाराओ तहेव य ।**
**साहु-साहुणिअट्ठाए, गच्छायारं समुद्धियं ॥१३५॥**

महानिशीथकल्पात् व्यवहारात् तथैव च ।
साधुसाध्वीनामर्थाय गच्छाचारः समुद्धृतः ॥१३५॥

व्याख्या – श्रीमहानिशीथात्=प्रवचनपरमतत्त्वकल्पात् कल्पात्=बृहत्कल्पलक्षणात् 'व्यवहारात्' परमनिपुणात् तथैव च निशीथादिभ्यः 'साधुसाध्व्यर्थाय' साधुसाध्वीनां हितार्थायेत्यर्थः 'गच्छाचारं' गणाचारप्रतिपादकप्रकीर्णकं सिद्धान्तरूपं 'समुद्धृतं' उत्सर्गापवादनिरूपणेन बद्धमिति ॥

अत्र शिष्यः प्रश्नयति-प्रकीर्णकानामुत्पत्तिः किं गणधरात् गणधरशिष्यात् प्रत्येकबुद्धात् तीर्थकरमुनेर्वा ?, उच्यते-प्रत्येकबुद्धात्तीर्थकरविशिष्टमुनेर्वा, यदुक्तं नन्दिसूत्रे –

"से किं तं अंगबाहिरं ?, अंगबाहिरं दुविहं पण्णत्तं, तं० आवस्सयं च १ आवस्सयवइरित्तं च २, से किं तं आवस्सयं ?, २ छव्विहं पन्नत्तं, तं जहा-सामाइअं १ चउव्वीसत्थओ २ वंदणयं ३ पडिक्कमणं ४ काउस्सग्गो ५ पच्चक्खाणं ६, से तं आवस्सयं । से किं तं आवस्सयवइरित्तं ?, आव० दुविहं पन्नत्तं, तं०-कालियं उक्कालियं च, से किं तं उक्कालियं ?, उ० अणेगविहं पन्नत्तं, तं०-

दसवेयालियं १ कप्पिआकप्पियं २ चुल्लकप्पसुयं ३ महाकप्पसुयं ४ उववाइयं ५ रायपसेणियं ६ जीवाभिगमो ७ पन्नवणा ८ महापन्नवणा ९ पमायप्पमायं १० नंदी ११ अणुओगदाराइं १२ देविंदत्थओ १३ तंदुलवेयालियं १४ चंदाविज्झयं १५ सूरपण्णत्ती १६ पोरिसिमंडलं १७ मंडलपवेसो १८ विज्जाचरणविणिच्छओ १९ गणिविज्जा २० झाणविभत्ती २१ मरणविभत्ती २२ आयविसोही २३ वीयरागसुयं २४ संलेहणासुयं २५ विहारकप्पो २६ चरणविही २७ आउरपच्चक्खाणं २८ महापच्चक्खाणं २९ एवमाइ, से तं उक्कालियं १ । से किं तं कालियं ?, २ अणेगविहं पन्नत्तं, तं०-उत्तरज्झयणाइं १ दसाउ २ कप्पो ३ ववहारो ४ निसीहं ५ महानिसीहं ६ इसिभासियाइं ७ जंबुद्दीवपण्णत्ती ८ दीवसागरपण्णत्ती ९ चंदपण्णत्ती १० खुड्डिआ विमाणपविभत्ती ११ महल्लिया विमाणपविभत्ती १२ अंगचूलिआ १३ वग्गचूलिआ १४ विवाहचूलिआ १५ अरुणोववाए १६ वरुणोववाए १७ गरुलोववाए १८ धरणोववाए १९ वेसमणोववाए २० वेलंधरोववाए २१ देविंदोववाए २२ उट्ठाणसुए २३ समुट्ठाणसुए २४ नागपरिआवणिआ २५ निरयावलियाउ २६ कप्पिआओ २७ कप्पवडिंसियाओ २८ पुप्फिआओ २९ पुप्फचूलिआओ ३० वण्हीदसाओ ३१, एवमाइआइं चउरासीइं पइन्नगसहस्साइं भगवओ अरहओ उसहसामिस्स आइतित्थयरस्स १, तहा संखिज्जाइं पइन्नगसहस्साइं मज्झिमगाणं जिणवराणं २, चउद्दसपइण्णगसहस्साणि भगवओ वद्धमाणसामिस्स ३, अहवा जस्स जत्तिआ सीसा उप्पत्तिआए १ वेणइआए २ कम्मिआए ३ पारिणामिआए ४ चउव्विहाए बुद्धीए उववेआ तस्स तत्तिआइं पइण्णगसहस्साइं १, पत्तेअबुद्धावि तत्तिआ चेव, से तं कालिअं, से तं आवस्सयवइरित्तं, से तं अणंगपविट्ठं [नन्दी० सू० ४४]"

अत्र 'एवमाइयाइं' इत्याद्यंशस्य वृत्तिः – 'एवमाइयाइं' इत्यादि, कियन्ति नाम नामग्राहमाख्यातुं शक्यन्ते प्रकीर्णकानि ? तत एवमादीनि चतुरशीतिप्रकीर्णक-सहस्राणि भगवतोऽर्हतः श्रीऋषभस्वामिनस्तीर्थकृतः १, तथा सङ्ख्येयानि प्रकीर्णकसहस्राणि मध्यमानामजितादीनां जिनवरेन्द्राणां, एतानि च यस्य यावन्ति तस्य तावन्ति प्रथमानुयोगतो वेदितव्यानि २, तथा चतुर्दश प्रकीर्णकसहस्राणि

भगवतोऽर्हतो वर्द्धमानस्वामिनः ३, इयमत्र भावना—इह भगवत ऋषभस्वामिनश्चतुरशीतिसहस्रसङ्ख्याः श्रमणा आसीरन्, ततः प्रकीर्णकरूपाणि चाध्ययनानि कालिकोत्कालिकभेदभिन्नानि सर्वसङ्ख्यया चतुरशीतिसहस्रसङ्ख्यान्यभवन्, कथम्? इति चेत्, उच्यते, इह यद् भगवदर्हदुपदिष्टश्रुतमनुसृत्य भगवन्तः श्रमणा विरचयन्ति तत्सर्वं प्रकीर्णकमुच्यते, अथवा श्रुतमनुसरन्तो यदात्मनो वचनकौशलेन धर्मदेशनादिषु ग्रन्थपद्धतिरूपतया भाषन्ते तदपि सर्वं प्रकीर्णकं, भगवतश्च ऋषभस्वामिन उत्कृष्टा श्रमणसम्पदासीत् चतुरशीतिसहस्रप्रमाणा ततो घटन्ते प्रकीर्णकान्यपि भगवतश्चतुरशीतिसहस्रसङ्ख्यानि १। एवं मध्यमतीर्थकृतामपि सङ्ख्येयानि प्रकीर्णकसहस्राणि भावनीयानि २। भगवतस्तु वर्द्धमानस्वामिनश्चतुर्दश श्रमणसहस्राणि तेन प्रकीर्णकान्यपि भगवतश्चतुर्दशसहस्राणि ३।

अत्र द्वे मते-एके सूरयः प्रज्ञापयन्ति-इदं किल चतुरशीतिसहस्रादिकमृषभादीनां तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यं, इतरथा पुनः सामान्यश्रमणाः प्रभूततरा अपि तस्मिन् तस्मिन् ऋषभादिकाले आसीरन् १। अपरे पुनरेवं प्रज्ञापयन्ति-ऋषभादितीर्थकृतां जीवतामिदं चतुरशीतिसहस्रादिकं श्रमणपरिमाणं, प्रवाहतः पुनरेकैकस्मिन् तीर्थे भूयांसः श्रमणा वेदितव्याः, तत्र ये प्रधानसूत्रविरचनशक्तिसमन्विताः सुप्रसिद्धास्तद्गता अतत्कालिका अपि तीर्थे वर्त्तमानास्तेऽत्राधिकृता द्रष्टव्याः २। एतदेव मतान्तरमुपदर्शयन्नाह-'अहवे'त्यादि, अथवेति प्रकारान्तरोपदर्शने यस्य ऋषभादेस्तीर्थकृतो यावन्तः शिष्यास्तीर्थे औत्पत्तिक्या १ वैनयिक्या २ कर्मजया ३ परिणामिक्या ४ चतुर्विधया बुद्ध्या उपेताः=समन्विता आसीरन् तस्य ऋषभादेस्तावन्ति प्रकीर्णकसहस्राणि अभवन्, प्रत्येकबुद्धा अपि तावन्त एव २।

अत्रैके व्याचक्षते-इह एकैकस्य तीर्थकृतस्तीर्थेऽपरिमाणानि प्रकीर्णकानि भवन्ति, प्रकीर्णककारिणामपरिमाणत्वात्, केवलमिह प्रत्येकबुद्धरचितान्येव प्रकीर्णकानि द्रष्टव्यानि, प्रकीर्णकपरिमाणेन प्रत्येकबुद्धपरिमाणप्रतिपादनात्, स्यादेतत् प्रत्येकबुद्धानां शिष्यभावो विरुध्यते, तदेतदसमीचीनं, यतः प्रव्राजकाचार्यमेवाधिकृत्य शिष्यभावो निषिध्यते, न तु तीर्थकरोपदिष्टशासनप्रतिपन्नत्वेनापि, ततो न कश्चिद्दोषः, तथा च

**तेषां ग्रन्थः-"इह तित्थे अपरिमाणा पइन्नगा पइण्णगसामिअपरिमाणत्तणओ, किंतु इह सुत्ते पत्तेयबुद्धपणीयं पइण्णगं भाणियव्वं, कम्हा?, जम्हा पइण्णगपरिमाणेण चेव पत्तेयबुद्धपरिमाणं कीरइ, भणियं-'पत्तेयबुद्धावि तत्तिया चेव''त्ति, चोयग आह-नणु पत्तेयबुद्धा सिस्सभावो य विरुज्झए ?, आयरिओ आह-तित्थगरपणीय-सासणपडिवन्नत्तणओ तस्स सीसा हवंती''ति ।**

अन्ये पुनरेवमाहुः-**सामान्येन प्रकीर्णकैस्तुल्यत्वात् प्रत्येकबुद्धानामत्राभिधानं न तु नियोगतः प्रत्येकबुद्धरचितान्येव प्रकीर्णकानीति, 'से त'मित्यादि, तदेतत्कालिकं, तदेतदावश्यकव्यतिरिक्तं, तदेतदनङ्गप्रविष्टमिति** [नन्दी० सू० ४४-वृत्तौ] ॥१३५॥

**पढंतु साहुणो एयं, असज्झायं विवज्जिउं ।**
**उत्तमं सुयनिस्संदं, गच्छायारं सुउत्तमं ॥१३६॥**

पठन्तु साधवः एतद् अस्वाध्यायिकं विवर्ज्य ।
उत्तमं श्रुतनिस्यन्दं गच्छाचारं सूत्तमम् ॥१३६॥

व्याख्या – 'पठन्तु' **व्यक्तवाचा सूत्रतोऽर्थतश्च कण्ठगतं कुर्वन्तु** 'साधवः' **मोक्षसाधनतत्परमुनयः, उपलक्षणत्वात् साध्व्योऽपि** । ननु **यदुक्तं साधुसाध्व्य एव पठन्ति किं श्राद्धादयो न सिद्धान्तं पठन्ति ?,** उच्यते-**न पठन्त्येव, यदुक्तं श्रीनिशीथ-सूत्रस्यैकोनविंशतिकोद्देशकप्रान्ते-"जे भिक्खू वा भिक्खुणी वा अण्णउत्थियं वा गारत्थियं वा वाएइ वाएंतं वा साइज्जइ"** [नि० १९/२७]

अस्य चूर्णिः-**गिही अण्णतित्थिया वा ण वाएयव्वा, इत्थ दसमउद्देसाओ अत्थो जहा-"अण्णउत्थियं वा गारत्थियं वा वायति अण्णतित्थिगा अण्णतित्थिणीओ अहवा गिहत्था गिहत्थीओत्ति, भवे कारणं वाएज्जावि, 'पव्वज्जाए' गाहा, गिहि अण्णपासंडि वा पव्वज्जाभिमुहं सावगं वा छज्जीवणियंति जाव सुत्तत्थो अत्थओ जाव पिंडेसणा, एस गिहत्थाइसु अववाओ"** [नि० भा० ६२६४-चूर्णौ] **त्ति ।**

**तथा** 'एयं'ति **एनं गच्छाचारं पूर्वोक्तशब्दार्थं, किं विधाय ?**-'अस्वाध्यायं' **अपठनप्रस्तावं स्थानाङ्गोक्तं** 'वर्जयित्वा' **परित्यज्य, स्थानाङ्गोक्ता अस्वाध्याया यथा-**

"दसविहे अंतलिक्खिए असज्झाइए पण्णत्ते, तं जहा-उक्कावाए १ दिसिदाहे २ गज्जिए २ विज्जुए ४ निग्घाए ५ जूवए ६ जक्खालित्तए ७ धूमिय ८ महिया ९ रयउग्घाए १०" [स्था० १०/सू० ७१४] इदं सूत्रम्,

अस्य वृत्तिः-'अंत०' आकाशभवं 'अस०' अवाचनादि, दिग्विभागे महानगर-प्रदीपनकमिव य उद्द्योतो भूमावप्रतिष्ठितो गगनतलवर्त्ती स दिग्दाहः २, 'निर्घातः' साभ्रे निरभ्रे वा गगने व्यन्तरकृतो महागर्जितध्वनिः ५, सन्ध्याप्रभा चन्द्रप्रभा च यत्र युगपद् भवतस्तत् 'जूयगो'त्ति भणितं, सन्ध्याप्रभाचन्द्रप्रभयोर्मिश्रत्वमिति भावः, तत्र चन्द्रप्रभावृता सन्ध्याऽपगच्छतीति न ज्ञायते ।

श्रुतस्य=महानिशीथकल्पादेः सिद्धान्तस्य निःस्यन्दं=सारभूतं बिन्दुभूतं वा सुष्ठु=अतिशयेन उत्तमं 'सूत्तमं' प्रधानतमं तदुक्तक्रियाकरणेन मोक्षगमनहेतुत्वादिति ॥१३६॥

किञ्च –

**गच्छायारं सुणित्ताणं, पठित्ता भिक्खुभिक्खुणी ।**
**कुणंतु जं जहाभणियं इच्छंता हियमप्पणो ॥१३७॥**

गच्छाचारं श्रुत्वा पठित्वा भिक्षवः भिक्षुण्यः ।
कुर्वन्तु यद्यथा भणितमिच्छन्तः हितमात्मनः ॥१३७॥

॥ इति गच्छाचारप्रकीर्णकसूत्रम् ॥

व्याख्या – एनं 'गच्छाचारं' सत्साधुगणमर्यादारूपं 'श्रुत्वा' सद्गुरुभ्योऽर्थमाकर्ण्य 'पठित्वा' मोक्षमार्गसाधकसाधुपार्श्वे योगोद्वहनविधिना सूत्रं गृहीत्वा 'साधवः' मुमुक्षवः 'भिक्षुण्यः' व्रतिन्यश्च 'कुर्वन्तु' निष्पादयन्तु यद् यथाऽत्र भणितं तत्तथेति 'इच्छन्तः' वाञ्छां कुर्वन्तः 'हितं' पथ्यं, कस्य? आत्मनः ॥१३७॥

इतिश्रीविजयदानसूरिविजयमानराज्ये भव्यसुमनःसुमनस्सुपतीनां दुष्टदुःखाकुल-दुर्जटस्थिरजिह्वव्याप्तनिर्दयदुर्बोधज्ञानान्धकुगुरुवचनोपदेशाग्निधूम्रश्यामसुखोत्सूत्र-वारुण्यपवित्रास्यकुमतिकुवासनावेलाभयङ्करकलहपङ्कबहुलकुराजगर्त्तादुश्चारकुसाधु-

महाडम्भागाधमदमहत्तुङ्गपर्वतसङ्कीर्णशारीरमानसदुःखमयदुष्षमाकालकलिलसागर-निमज्जज्जन्तुपोतायमानानां श्रीतपोगणमुनिनक्षत्रगणितानन्तानन्तकुमतिकुमतिकुवृष्ट्यार्द्रीकृतमुग्धध्यनन्ताशोषयत्तपस्तेजोजगदुद्द्योतयत्सुगुणसङ्घकमलोज्जृम्भयदज्ञानतमःकर्षयत्प्रत्यूषाण्डानां पावनीकृतात्मनां श्रीआनन्दविमलसूरीश्वराणां शिष्याणुशिष्येण वानराख्येन पण्डितश्रीहर्षकुलावाप्तगच्छाचाररहस्येन गच्छाचारप्रकीर्णकटीकेयं समर्थिता, आगमज्ञैः संशोध्येति, मम मूर्खशिरोमणेः कोऽपि दोषो न कर्षणीयः, अत्र मया यज्जिनाज्ञाविरुद्धं लिखितं व्याख्यातं च तन्मम त्रिविधंत्रिविधेन मिथ्यादुष्कृतं भवतु ॥

॥ इति श्रीगच्छाचारप्रकीर्णकटीका समाप्ता ॥

॥ श्रीगच्छाचारप्रकीर्णकं समाप्तम् ॥

## પ્રથમાવચૂરિ

પૂર્વાચાર્યવિરચિત...

## દ્વિતીયાવચૂરિ

પંડિતશ્રીહર્ષકુલવિરચિત...

॥ श्रीशङ्खेश्वरपार्श्वनाथाय नमः॥
॥ तस्स भुवणेक्कगुरुणो णमो अनेगंतवायस्स ॥
॥ परमपूज्यसुविहितश्रुतस्थविरपरम्परायै नमः ॥
॥ तपागच्छाचार्यश्री-प्रेम-भुवनभानु-जयघोष-जितेन्द्र-गुणरत्न-रश्मिरत्नसूरिसद्गुरुभ्यो नमः ॥

**पूर्वमहर्षिप्रणीत-अवचूरिद्वयसमन्वितम्**

# ॥ श्रीगच्छाचारप्रकीर्णकम् ॥

**आदौ शास्त्रकारः स्वेष्टदेवतां नमस्कुर्वन् ग्रन्थमारभते –**

**नमिऊण महावीरं, तियसिंदनमंसिअं महाभागं ।**
**गच्छाचारं किंची, उद्धरिमो सुअसमुद्दाओ ॥१॥**

नत्वा महावीरं त्रिदशेन्द्रनमस्यितं महाभागम् ।
गच्छाचारं किञ्चिदुद्धरामः श्रुतसमुद्रात् ॥१॥

प्रथमावचूरिः – **'नमिऊण'** इत्यादि, श्रीवीरं=विशेषेण ईरयत्यष्टप्रकारं कर्मेति वीरस्तम्, अथवा वीरः = सुभटः कर्मरिपूणां मर्दने तं श्रीवीरजिनेन्द्रं नत्वा, किम्भूतम् ? **त्रिदशेन्द्रैः** = देवेन्द्रै**र्नमस्कृतम्**, पुनः किम्भूतम् ? **महाभागं** महानुभावं वा महातिशय-शालिनम्, एवंविधं चरमतीर्थपतिं नत्वा **गच्छाचारं** = गणाचारं **किञ्चिद्** = स्वल्पमात्रमपि **वयमुद्धरामः**, कुतः ? **श्रुतसमुद्रात्** = सिद्धान्तार्णवादिति सम्बन्धः ॥१॥

द्वितीयावचूरिः –

श्रीवीरपादाम्बुजयुग्ममादावानन्दतो हर्षकुलः प्रणम्य ।
शब्दावचूर्णिं प्रकरोति गच्छाचारप्रकीर्णकस्य सुबोधनार्थं ॥

'नमि०' इत्यादि, **श्रीवीरं नत्वा**, किम्भूतम् ? **त्रिदशेन्द्रैर्नमस्कृतम्**, **महाभागं** = महातिशयशालिनम्, **श्रुतसागराद् गच्छाचारं किञ्चिदुद्धरामो** वयमिति ॥१॥

**अत्थेगे गोयमा ! पाणी, जे उम्मग्गपइट्ठिए ।**
**गच्छम्मि संवसित्ताणं, भमई भवपरंपरं ॥२॥**

सन्त्येके गौतम ! प्राणिनः ये उन्मार्गप्रतिष्ठिते ।
गच्छे संवस्य भ्रमन्ति भवपरम्पराम् ॥२॥

(प्र.अ.) – '**अत्थेगे**' इत्यादि, हे **गौतम ! अत्र** = अस्मिन् संसारे **एके** = केचित् **प्राणिनः** सन्तीति ये प्राणिनः **उन्मार्गे प्रतिष्ठिते** = उन्मार्गगामिनि **गच्छे** = बहुसमुदायरूपे **वासं** = निवासं कृत्वा **भवपरम्परां भ्रमन्ति** = पर्यटन्तीति गाथार्थः ॥२॥

(द्वि.अ.) – '**अत्थेगे**' इत्यादि, हे **गौतम ! एके** = केचित् **प्राणिनः** सन्ति, **ये उन्मार्गप्रतिष्ठिते** = उन्मार्गगामिनि **गच्छे वासं** कृत्वा **भवपरम्परां** = जन्मपरम्परां **भ्रमन्ति** ॥२॥

**अतो हेतोर्यत् क्रियते तदाह –**

**जामद्ध जाम दिण पक्खं, मासं संवच्छरंपि वा ।**
**सम्मग्गपट्ठिए गच्छे, संवसमाणस्स गोयमा ! ॥३॥**

यामादर्धं यामं दिनं पक्षं, मासं संवत्सरमपि वा ।
सन्मार्गप्रस्थिते गच्छे, संवसमानस्य गौतम ! ॥३॥

(प्र.अ.) – '**जामद्ध**' इत्यादि, यामः = प्रहरः तस्यार्द्धम् **यामार्द्धम्** = चतुर्[1]घटिकारूपम्, **यामम्** = प्रहरम्, यावद् **दिनम्** = अहोरात्रम्, **पक्षम्** = पञ्चदशाहोरात्ररूपम्, **मासम्** = पक्षद्वयमानम्, **संवत्सरं** = मासद्वादशमानम्, **च**शब्दाद् बहुदिनमपि **संवसमानस्य** पुरुषस्य ॥३॥

(द्वि.अ.) – '**जामद्ध**' इत्यादि, **यामादर्धम्** = चतुर्घटिकं, **प्रहरम्, दिनम्** = अहोरात्रम्, **पक्षम्, मासम्, संवत्सरमपि च, सन्मार्गप्रतिष्ठिते गच्छे संवसमानस्य** पुरुषस्य ॥३॥

**लीला अलसमाणस्स, निरुच्छाहस्स वीमणं ।**
**[2]पिक्खविक्खाइ अन्नेसिं, महाणुभागाण साहुणं ॥४॥**

---

१. 'चतुर्थ०' इति **A**-प्रते । २. 'पक्खाविक्खीइ' **A-D** प्रतपाठः । 'पिक्खाविक्खिइ' **B-C**-प्रतपाठः । 'पेक्खाविक्खिइ' **E-F**-प्रतपाठः । 'पेक्खोविक्खाइ' **H**-प्रतपाठः ।

लीलालसायमानस्य, निरुत्साहस्य विमनस्कस्य ।
पश्यतः अन्येषां महानुभागानां साधूनाम् ॥४॥

(प्र.अ.) – '**लीला०**' इत्यादि, **लीलया अलसमानस्य**[1] = आलस्यं कुर्वाणस्य **उत्साहरहितस्य विमनस्कस्य** = शून्यचित्तस्य **अन्येषां प्रेक्षया विलोकया** = विलोकनेन **महानुभागानां साधूनाम्** ॥४॥

(द्वि.अ.) – '**लीला०**' इत्यादि, **लीलया अलसमानस्य** = आलस्यं कुर्वाणस्य **उत्साहरहितस्य विमनस्कस्य** = शून्यचित्तस्य **अन्येषां प्रेक्षया** = परस्परविलोकनेन **महानुभागानां साधूनाम्** ॥४॥

**उज्जमं सव्वथामेसु, घोरवीरतवाइअं ।**
**लज्जं[2] संकं अइक्कम्म, तस्स वीरिअं समुच्छले ॥५॥**

उद्यमं सर्वस्थामसु, घोरवीरतपः-आदिकं ।
लज्जां शङ्कामतिक्रम्य, तस्य वीर्यं समुच्छलेत् ॥५॥

(प्र.अ.) – '**उज्जमं०**' इत्यादि, **उद्यमं सर्वस्थामसु** = क्रियासु, किंविशिष्टम् ? **घोरवीरतपःप्रमुखं** दृष्ट्वा **तस्य** = सुखशीलस्यापि पुरुषस्य **वीर्यं समुच्छलेदि**ति, सोऽपि क्रियापरो भवतीति गाथार्थः ॥५॥

(द्वि.अ.) – '**उज्जमं०**' इत्यादि, **उद्यमं सर्वस्थामसु** = सर्वक्रियासु, किम्भूतमुद्यमम्? **घोरवीरतपःप्रमुखं** दृष्ट्वा **लज्जाशंकामतिक्रम्य तस्य** = सुखशीलस्यापि पुरुषस्य **वीर्यं समुच्छलेत्** = सोऽपि शुद्धक्रियां कुर्यादिति गाथार्थः ॥५॥

**वीरिएणं तु जीवस्स, समुच्छलिएण गोयमा! ।**
**जम्मंतरकए पावे, पाणी मुहुत्तेण निद्दहे ॥६॥**

वीर्येण तु जीवस्य समुच्छलितेन गौतम ! ।
जन्मान्तरकृतानि पापानि प्राणी मुहूर्तेन निर्दहेत् ॥६॥

(प्र.अ.) – '**वीरिए०**' इत्यादि, तस्य **जीवस्य वीर्येण समुच्छलितेन** हे **गौतम !**

---

१. 'अनलस०' इति C-प्रते । २. 'ईसक्का संक भय लज्जा तस्य' F-प्रते, 'इकासंत भय लज्जा तस्स' G-प्रते ।

**जन्मान्तरकृतम्** = बहुभवोपार्जितं **पापं प्राणी** = जीवः **मुहूर्त्त**मात्रेण कालेन **निर्दहेत्** = ज्वालयेदिति सम्बन्धः ॥६॥

(द्वि.अ.) – '**वीरिए०**' इत्यादि, **जीवस्य वीर्येण समुच्छलितेन** हे **गौतम** ! **जन्मान्तरकृतं पापं प्राणी मुहूर्त्तमात्रेण निर्दहेत्** = ज्वालयेत् ॥६॥

**तम्हा निउणं निहालेउं, गच्छं सम्मग्गपट्ठिअं ।**
**वसिज्ज तत्थ आजम्मं, गोयमा ! संजए मुणी ॥७॥**

तस्मान्निपुणं निभाल्य, गच्छं सन्मार्गप्रस्थितम् ।
वसेत्तत्र आजन्म गौतम ! संयतो मुनिः ॥७॥

(प्र.अ.) – '**तम्हा०**' इत्यादि, **तस्मान्निपुणं निभाल्य** = विलोक्य **गच्छं सन्मार्गप्रस्थितं वसेत्** = अवतिष्ठेत् **तत्र** = गच्छे **आजन्म**मिति = यावज्जन्म यावज्जीवमिति हे **गौतम ! संयतो मुनिः** = सत्क्रियासाधुरिति गाथार्थः ॥७॥

(द्वि.अ.) – '**तम्हा०**' इत्यादि, **तस्मान्निपुणं** विलोक्य **गच्छं सन्मार्गप्रतिष्ठितं वसेत् तत्र** यावज्जीवं हे **गौतम ! संयतो मुनिः** = सत्क्रियासाधुरिति ॥७॥

**मेढी आलंबणं खंभं, दिट्ठी जाणं सुउत्तिमं[१] ।**
**सूरी [२]जं होइ गच्छस्स, तम्हा तं तु परिक्खए ॥८॥**

मेढिरालम्बनं स्तम्भो दृष्टिर्यानं सुयुक्तिमान् ।
सूरिर्यस्माद्भवति गच्छस्य तस्मात्तं तु (एव) परीक्षेत ॥८॥

(प्र.अ.) – '**मेढी०**' इत्यादि, **मेढीति** कोऽर्थः ? खलके यत्र स्तम्भिकामुत्क्षिप्य वृषान् वाहयन्ति सा मेढी तद्वद् **आलम्बनम्** = आधारभूतः, **स्तम्भो** = गृहभारधारकः, **दृष्टिः** = सर्ववस्तुप्रकाशकात्मा, **यानम्** = यानपात्रं जलधौ, तद्वद**ुत्तम**मिति सर्वत्र योज्यम्, एवंविधः **सूरिर्यत्र गच्छे** भवेत्, **तस्माद्** गच्छं **तमा**चार्यं च **परीक्षयेत्** प्रज्ञावान् इति गाथार्थः ॥८॥

(द्वि.अ.) – '**मेढी०**' इत्यादि, मेढी = खलकमध्यवर्त्तिनी स्थूणा, **आलम्बनम्** =

१. 'सुउत्तमं' **पूर्वमुद्रिते** । २. 'सूरी उ' F-प्रते ।

रज्ज्वादिः, **स्तम्भो दृष्टिर्यानं सूत्तम**मिति प्रतीतम्, एतच्च सर्वत्र योज्यम्, एवंविधः **सूरिर्गच्छस्य** भवति, **तस्मात् तम्** = आचार्यं **परीक्षयेत्** = परीक्षां कुर्यादिति गाथार्थः ॥८॥

**भयवं ! केहि लिंगेहि, सूरिं उम्मग्गपट्ठियं ।**
**वियाणिज्जा छउमत्थे, मुणी ! तं मे निसामय ॥९॥**

भगवन् ! कैर्लिङ्गैः, सूरिमुन्मार्गप्रस्थितम् ।
विजानीयात् छद्मस्थः, मुने ! तन्मे निशामय ॥९॥

(प्र.अ.) – '**भयवं०**' इत्यादि, शिष्यः पृच्छति-हे **भगवन् ! कैः कैः लिङ्गैः** = चिह्नैः **उन्मार्गप्रस्थितं सूरिं सन्मार्गप्रस्थितं** च **छद्मस्थो** मुनिः कथं **जानीयादि**त्युक्ते गुरुराह – **हे मुने ! तत्** = चिह्नं **मम** = कथय[१]तस्त्वं **शृणु** निर्गमवाक्यम् ॥९॥

(द्वि.अ.) – '**भयवं०**' इत्यादि, हे भगवन् ! **कैर्लिङ्गैः** = कैश्चिह्नै**रुन्मार्गप्रतिष्ठितं सन्मार्गप्रस्थितं** च **छद्मस्थः** कथं **जानीयात्** ? तच्चिह्नानि **मम कथयतः शृणु** ॥९॥

**सच्छंदयारिं दुस्सीलं, आरंभेसु पवत्तयं ।**
**पीढयाइपडिबद्धं, आउक्कायविहिंसगं ॥१०॥**

स्वच्छन्दचारिणं दुःशीलमारम्भेषु प्रवर्तकम् ।
पीठकादिप्रतिबद्धं, अप्कायविहिंसकम् ॥१०॥

(प्र.अ.) – '**सच्छंद०**' इत्यादि, **स्वच्छन्दचारिणम्, दुःशीलम्** = दुराचारं दुष्टाचारम्, षड्विधजीवार**म्भेषु प्रवर्त्तकम्, पीठफलकादिप्रतिबद्धम्, आदि**शब्दात् शय्यासनवस्त्र-पात्रपरिग्रहः, तेषु **प्रतिबद्ध** इति कोऽर्थः ? वर्षाकालं विनापि उपभुङ्क्ते, तम्, अप्कायं सचित्तं विराधयतीति **अप्कायविराधकः** स्वार्थे कप्रत्यय एवंविधम् ॥१०॥

(द्वि.अ.) – '**सच्छं०**' इत्यादि, **स्वच्छंदश्चारिणम्, दुःशीलम्** = दुराचारम्, **आरम्भेषु प्रवर्त्तकम्, पीठफलकादिप्रतिबद्धम्** ऋतुबद्धेष्वपि, सचित्ता**प्कायविहिंसकम्** ॥१०॥

---

१. 'कथय । यतस्त्वं०' इति A-प्रते ।

**मूलुत्तरगुणब्भट्ठं, सामायारीविराहयं ।**
**अदिन्नालोयणं निच्चं, निच्चं विगहपरायणं ॥११॥**

मूलोत्तरगुणभ्रष्टं, सामाचारीविराधकम् ।
अदत्तालोचनं नित्यं, नित्यं विकथापरायणम् ॥११॥

(प्र.अ.) – '**मूलु०**' इत्यादि, **मूलगुणाः** = पञ्चमहाव्रतादयः, **उत्तरगुणाः** = चरणकरणसप्ततिप्रभृतयस्तेभ्यः परि**भ्रष्टम्**, पुनः किम्भूतम् ? **सामाचारी** = इच्छामिच्छेत्यादि-रूपा ओघरूपा च, तस्या **विराधकम्**, **नित्य**मदत्तालोचना यस्य स **अदत्तालोचन**स्तम्, अन्यस्मै स्वपापानि न कथयति, **नित्यं विकथापरायणम्**, एवंविधमाचार्यमुन्मार्गगामिनं हे शिष्य जानीया इति ॥११॥

(द्वि.अ.) – '**मूलु०**' इत्यादि, **मूलोत्तरगुणभ्रष्टम्**, **सामाचारीविराधकम्**, **नित्यम-दत्तालोचनम्** = दत्ताऽऽलोचना येन स दत्तालोचनः, न दत्तालोचनोऽदत्तालोचनस्तम्, स्वपापं नान्यस्मै कथयति, तथा **नित्यं विकथापरायणम्** एवंविधमाचार्यमुन्मार्गगामिनं जानीयात् ॥११॥

**छत्तीसगुणसमण्णागएण तेणवि अवस्स कायव्वा[१] ।**
**परसक्खिया विसोही, सुट्ठुवि ववहारकुसलेण ॥१२॥**

षट्त्रिंशद्गुणसमन्वागतेन तेनापि अवश्यं कर्तव्या ।
परसाक्षिका विशोधिः सुष्ट्वपि व्यवहारकुशलेन ॥१२॥

(प्र.अ.) – '**छत्तीस०**' इत्यादि, **षट्त्रिंशद्गुणसमन्वागतेन सुष्ठु** = अतिशयेन जीत**व्यवहारकुशलेन** = जीतआलोचनाग्रन्थनिपुणेन **परसाक्षिकी विशोधिः तेनापि** = आचार्येण **अवश्यं कर्त्तव्ये**ति ॥१२॥

(द्वि.अ.) – '**छत्तीस०**' इत्यादि, **षट्त्रिंशद्गुणसमन्वागतेन सुष्ठु** = अतिशयेन जीतादि**व्यवहारकुशलेन** = आलोचनाग्रंथकुशलेन **परसाक्षिकी विशोधिः** = आलोचना **तेनापि** = आचार्येण **अवश्यं कर्त्तव्या** ॥१२॥

---

१. 'दायव्वा' **A-B-C-D-E-F-G-H**, अत्र श्रीवानर्षिगणिविरचितवृत्त्याः हस्तादर्शानुसारेण 'कायव्वा' इति ।

दृष्टान्तमाह –

**जह सुकुसलोऽवि विज्जो, अण्णस्स कहेइ अत्तणो वाहिं ।**
**विज्जुवएसं[1] सुच्चा, पच्छा सो कम्ममायरइ ।।१३।।**

यथा सुकुशलोऽपि वैद्योऽन्यस्य कथयति आत्मनो व्याधिम् ।
वैद्योपदेशं श्रुत्वा, पश्चात् स कर्म आचरति ।।१३।।

(प्र.अ.) – **'जह०'** इत्यादि, **यथा कुशलोऽपि वैद्यः आत्मनो व्याधिमन्यस्य कथयति** स **वैद्योपदेशं श्रुत्वा पश्चात् स** = वैद्यः प्रतिकारं वैद्य**कर्म** करोति । ज्ञाततत्त्वार्थो हि गुरुपार्श्वे सम्यगवगमन[2]शीलो भवति । अत्रोपनयः - वैद्यसमो गुरुः पाप[3]शल्यसमो व्याधिः स त्वन्यगुरून्निवेद्य पश्चात् स्वयं निर्व्याधिर्भवति, तदनुज्ञात-शल्योद्धरणोऽन्यान्निर्व्याधीन्[4] करोतीत्यर्थः ।।१३।।

(द्वि.अ.) – **'जह०'** इत्यादि, **यथा सुष्ठु** = अतिशयेन **कुशलोऽपि वैद्य आत्मनो व्याधिमन्यस्य कथयति स** च वैद्यो **वैद्योपदेशं श्रुत्वा पश्चाद्** वैद्य**कर्म आचरति** ।।१३।।

**देसं खित्तं[5] तु जाणित्ता, वत्थं पत्तं उवस्सयं ।**
**संगहे साहुवग्गं च, सुत्तत्थं च निहालई[6] ।।१४।।**

देशं क्षेत्रं तु ज्ञात्वा वस्त्रं पात्रं उपाश्रयं ।
संगृह्णीत साधुवर्गं च, सूत्रार्थं च निभालयति ।।१४।।

(प्र.अ.) – **'देस०'** इत्यादि, निपुणो ज्ञाततत्त्व आचार्यो **देशम्, क्षेत्रं तु**शब्दात् कालभावपरिग्रहः, तद् **ज्ञात्वा**ऽपि = विपश्य शेमुषीलोकनेन **वस्त्रम्, पात्रम्, उपाश्रयं,** [7]**साधुवर्गं च** एतानि **संगृह्णीयात्** = संग्रहं कुर्यात् **च**शब्दात् **सूत्रार्थस्य** च चिन्तनं करोति नित्यम् ।।१४।।

---

१. 'विज्जोवएस सोच्चा' **F**-प्रते । २. '०गमनो भवति' इति **A**-प्रते । ३. '०पापसमो०' इति **A**-प्रते । ४. '०व्याधीकरो०' इति **A-B**-प्रते । ५. 'खेत्तं' **D-E-F-G-H**, अत्र **B-C**-प्रतपाठः, 'खित्त' **A**-प्रते । ६. 'निहालिउं' **F-G** । ७. '०साधुवर्गं साध्वीवर्गं चैतानि०' इति **C**-प्रते ।

(द्वि.अ.) – '**देस०**' इत्यादि, आचार्यो **देशम्, क्षेत्रं तु ज्ञात्वा वस्त्रम्, पात्रम्, उपाश्रयं, साधुवर्गं चै**तानि **संगृह्णीयात्** = संग्रहं कुर्यात्, **च** = पुनः **सूत्रार्थ**चिन्तनं करोति ॥१४॥

**संगहोवग्गहं विहिणा, न करेइ अ जो गणी ।**
**समणं समणिं तु दिक्खित्ता, सामायारिं न गाहए ॥१५॥**

संग्रहोपग्रहं विधिना, न करोति च यो गणी ।
श्रमणं श्रमणीं तु दीक्षित्वा, सामाचारीं न ग्राहयेत् ॥१५॥

(प्र.अ.) – '**संगहो०**' इत्यादि, '**संग्रहोपग्रहम्**' **संग्रहम्** = वस्त्राद्युपकरणमीलनम् **उपग्रहम्** = वस्त्राद्युपकरणरक्षणं **विधिना** [१]आचार्यो गच्छार्थं **न करोति, श्रमणं श्रमणीं तु दीक्षयित्वा** सम्यग्भारमारोप्य **सम्यग्मार्गं न ग्राहयति** = सत्यमार्गं न शिक्षापयति इति गाथार्थः ॥१५॥

(द्वि.अ.) – '**संग०**' इत्यादि, '**संग्रहोपग्रहम्**' **संग्रहो** = वस्त्रादिमीलनम् **उपग्रहं** च वस्त्रादीनां संरक्षणं **विधिना** च आचार्यो गच्छार्थं **न करोति, श्रमणं श्रमणीं तु दीक्षयित्वा सामाचारीं न ग्राहयति** = न शिक्षयति ॥१५॥

**बालाणं जो उ सीसाणं, जीहाए उवलिंपए ।**
**न सम्ममग्गं गाहेइ, सो सूरी जाण वेरिओ ॥१६॥**

बालानां यः पुनः शिष्याणां, जिह्वया उपलिम्पेत् ।
न सम्यग् मार्गं ग्राहयति, स सूरिर्जानीहि वैरी ॥१६॥

(प्र.अ.) – '**बालाणं०**' इत्यादि, **बालानां शिष्याणां च** पुनः **यः** = आचार्यो **जिह्वयोपलिम्पयेत्** कोऽर्थः ? अत्यंतबाह्यहितं करोति, यस्तु **सम्यग्मार्गं न ग्राहयति** = अवितथपथं न शिक्षापयति तमाचार्यं गच्छं निर्वाहन्तमपि **वैरिकं जानीहि** = रिपुसमानं जानीहि ॥१६॥

(द्वि.अ.) – '**बालाणं०**' इत्यादि, **बालानां शिष्याणां** पुन**र्यो** आचार्यो **जिह्वया**

---

५. '०विधिना गच्छार्थं०' इति A-प्रते ।

**उपलिम्पेत्** = अत्यंतबाह्यहितं करोति, **सम्यग्मार्गं न ग्राहयति** = सत्यमार्गं न शिक्षापयति तमाचार्यं **वैरिणं जानीहि** ॥१६॥

**जीहाए विलिहंतो, न भद्दओ सारणा जहिं नत्थि ।**
**दंडेण वि ताडंतो, स भद्दओ सारणा जत्थ ॥१७॥**

जिह्वया विलिहन् न भद्रकः सारणा यत्र नास्ति ।
दण्डेनापि ताडयन् स भद्रकः सारणा यत्र ॥१७॥

(प्र.अ.) – **'जीहा०'** इत्यादि, **जिह्वया विलिहन्** = अत्यंतबाह्यहितं कुर्वन् आचार्यो **भद्रो** न भवति, **यत्र गच्छे** [१]सारणा **न** भवति । **दण्डेनापि ताडयन् स** आचार्यो **भद्रो** = मनोहरो[२] **यत्र सारणाऽ**स्ति ॥१७॥

(द्वि.अ.) – **'जीहा०'** इत्यादि, **जिह्वया विलिहन्** आचार्यो **भद्रो** = सुंदरो **न** भवति, **यत्र** गच्छे **सारणा नास्ति । दण्डेनापि ताडयन्** स आचार्यो **भद्रो** = मनोहरो **यत्र सारणास्ति** ॥१७॥

**सीसोवि वेरिओ सो उ, जो गुरुं नवि बोहए ।**
**पमायम[३]इराघत्थं, सामायारीविराहयं ॥१८॥**

शिष्योऽपि वैरी स तु यो गुरुं न विबोधयति ।
प्रमादमदिराग्रस्तं, सामाचारीविराधकम् ॥१८॥

(प्र.अ.) – **'सीसोवि०'** इत्यादि, **यः शिष्यः प्रमादमदिरया** = आलस्यसुरया **ग्रस्तं** गुरुं स्वधर्माचार्यं **न बोधयेत्** = न प्रतिबोधयेत् **स** शिष्यो गुरूणां **वैरी** = रिपुसमो भण्यते । गुरुं किम्भूतम् ? **सामाचारीविराधकम्** सामाचारी = दशधा ओघरूपा च तस्या विराधकम् ॥१८॥

(द्वि.अ.) – **'सीसोवि०'** इत्यादि, **स** तु **शिष्योऽपि वैरी**त्युच्यते **यः प्रमाद-मदिराग्रस्तम्, सामाचारीविराधकं** स्वकगुरुं **न बोधयति**[४] = न सन्मार्गे स्थापयतीति ॥१८॥

---

१. 'स्मारणा' इति A-B-C-प्रते । २. '०मनोहरो न भवति' इति A-प्रते । ३. '०मयरा०' F-प्रते । ४. '०न दोषयति०' इति B-प्रते ।

**कैः कैः प्रतिबोधयति वचनैरिति ? तदाह –**

**तुम्हारिसावि मुणिवर !, पमायवसगा हवंति जइ पुरिसा ।**
**[1]तेणऽन्नो को अम्हं, आलंबण हुज्ज संसारे ? ॥१९॥**

युष्मादृशा अपि मुनिवर ! प्रमादवशगा भवन्ति यदि पुरुषाः ।
तेनान्यः कोऽस्माकमालम्बनं भविष्यति संसारे ? ॥१९॥

(प्र.अ.) – **'तुम्हा०'** इत्यादि, हे **मुनिवर ! युष्मादृशा अपि** महद्गुणवन्तो महानुभागाः पूज्याः **पुरुषाः प्रमादवशगाः** = प्रमादगमनशीला **यदि भवन्ति तदा चान्यः को गुरुरस्मादृशां** पुरुषाणामस्माकं वा **आलम्बनं** संसारावटपतनरज्जुकोऽस्मिन्**संसारे** ? ॥१९॥

(द्वि.अ.) – **'तुम्हा०'** इत्यादि, हे **मुनिवर** ! = साधुश्रेष्ठ ! **युष्मादृशा अपि** मुनयः **पुरुषाः** = विदितसकलतत्त्वा **यदि प्रमादवशगाः** = प्रमादिनो भवन्ति । तदा**ऽन्यः कोऽस्माकं** मन्दधर्मणा**मालम्बनं** भवे = **संसारे** पततामिति गम्यम् ॥१९॥

**नाणंमि दंसणंमि य, चरणंमि य तिसु वि[2] समयसारेसु ।**
**चोएइ जो ठवेउं, गणमप्पाणं च सो अ गणी ॥२०॥**

ज्ञाने दर्शने च चरणे च त्रिष्वपि समयसारेषु ।
नोदयति यः स्थापयितुं, गणमात्मानं च स च गणी ॥२०॥

(प्र.अ.) – **'नाणं०'** इत्यादि, **ज्ञानदर्शनचारित्रे**ष्वपि **समयसारेषु गच्छमात्मानं च स्थापयितुं**[3] प्रेरयति **स** आचार्यः कथ्यते ॥२०॥

(द्वि.अ.) – **'नाणंमि०'** इत्यादि, **ज्ञाने दर्शने चारित्रे त्रिष्वपि समयसारेषु गणमात्मानं च स्थापयितुं** प्रेरयति **स** आचार्यः कथ्यते इति गाथार्थः ॥२०॥

**पिंडं उवहिं सिज्जं, उग्गमउप्पायणेसणासुद्धं ।**
**चारित्तरक्खणट्ठा, सोहिंतो होइ सचरित्ती ॥२१॥**

---

१. 'तो को अन्नो' **A-D-E-F-H**, अत्र पुनः **B-C-G**-प्रतपाठः । २. 'तिसु य' **F**-प्रते । ३. '०पयित्वाप्रे०' इति **A**-प्रते ।

पिण्डमुपधिं शय्यां, उद्गमोत्पादनैषणाशुद्धम् ।
चारित्ररक्षणार्थं, शोधयन् भवति सचारित्री ॥२१॥

(प्र.अ.) – '**पिंडं०**' इत्यादि, **चारित्रं** = संयमम्, तस्य **रक्षणार्थं पिण्डम्** = आहारादि, **उपधिं** = वस्त्रादि, **शय्यां** = पीठफलकादि **उद्गमोत्पादनैषणादोष( ४२ )-शुद्धं शोधयन्** = उत्पादयन् **स चारित्रवान् भवति** = चारित्रयुक्तो भवति ॥२१॥

(द्वि.अ.) – '**पिंडं०**' इत्यादि, निज**चारित्ररक्षणार्थं पिण्डम्, उपधिं, शय्या-मुद्गमोत्पादनैषणादिदोषशुद्धं शोधयेत्** = उत्पाद्य परिहरन् यो वर्त्तते **स चारित्रवान् भवती**ति ॥२१॥

**अपरिस्सावि सम्मं, समपासी चेव होइ कज्जेसु ।**
**सो रक्खइ चक्खुं पिव, सबाल-वुड्ढाउलं गच्छं ॥२२॥**

अपरिश्रावी सम्यक्, समदर्शी चैव भवति कार्येषु ।
स रक्षति चक्षुरिव, सबालवृद्धाकुलं गच्छम् ॥२२॥

(प्र.अ.) – '**अपरि०**' इत्यादि, **सम्यग्**[१] **अपरिश्रावी सर्वकार्येषु समदृष्टिर्भवति चक्षुरिव सबालवृद्धाकुलं गच्छं रक्षति** इति गाथार्थः ॥२२॥

(द्वि.अ.) – '**अपरि०**' इत्यादि, **सम्यग् अपरिश्रावी सर्वकार्येषु** समदृष्टिर्भवति **स** आचार्य**श्चक्षुरिव सबालवृद्धाकुलं गच्छं रक्षती**ति योगः ॥२२॥

**सीयावेइ विहारं, सुहसीलगुणेहिं जो अबुद्धीओ ।**
**सो नवरि लिंगधारी, संजम**[२]**जोएण णिस्सारो ॥२३॥**

सीदयति विहारं सुखशीलगुणैर्योऽबुद्धिकः ।
स नवरि लिङ्गधारी संयमयोगेन निस्सारः ॥२३॥

(प्र.अ.) – '**सीआ०**' इत्यादि, **यो** = गुरु**र्विहारेऽप्रतिबद्धो** गवचरणलक्षणे शीतलो हि प्रमादतः सुखशीलो भवति । **सुखशीलगुणैर्यो**ऽज्ञानो = ज्ञानरहितः सन् **स नवरं** = केवलं **लिंगधारी** कथ्यते, स **संयमसारेणासारः** प्रोच्यते ॥२३॥

---

१. 'सम्यग् परिश्रावी' इति **B-C**-प्रतपाठः । २. 'संजमसारेण नि०' **E-F**-प्रतपाठः

(द्वि.अ.) – **'सीआ०'** इत्यादि, **विहारे** शीतलोऽलसो भवति **सुखशीलगुणैर्यो**ऽज्ञानो = ज्ञानरहितः **स** केवलं **लिंगधारी** = यतिवेषवान् **संयमसारेण निःसारः** कथ्यते ॥२३॥

**कुल-गाम-नगर-रज्जं, पयहिय जो तेसु कुणइ हु[1] ममत्तं ।**
**सो नवरि लिंगधारी, संजम[2]जोएण [3]निस्सारो ॥२४॥**

कुलग्रामनगरराज्यं प्रहाय यस्तेषु करोति हु ममत्वम् ।
स नवरि लिङ्गधारी, संयमयोगेन निस्सारः ॥२४॥

(प्र.अ.) – **'कुल०'** इत्यादि, **कुल**राज्यं **ग्राम**राज्यं **नगरराज्यं 'पयहिअ'**त्ति त्यक्त्वा पुनस्तेषु हि निश्चितं **ममत्वं करोति स** = गुरु**र्नवरं** = लिंगधारी, **संयमयोगेन निस्सारो** ज्ञातव्यः ॥२४॥

(द्वि.अ.) – **'कुल०'** इत्यादि, **यः कुल**राज्यं **ग्राम**राज्यं **नगरराज्यं** त्यक्त्वा पुनस्तेषु हि निश्चितं **ममत्वं** करोति **स** केवलं **लिंगधारी, संयमसारेण निःसारः** कथ्यते ॥२४॥

**विहिणा जो उ चोएइ, सुत्तं अत्थं च गाहई ।**
**सो धण्णो, सो अ पुण्णो अ, स बंधू मुक्खदायगो ॥२५॥**

विधिना यस्तु चोदयति, सूत्रमर्थं च ग्राहयति ।
स धन्यः स च पुण्य एव, स बन्धुर्मोक्षदायकः ॥२५॥

(प्र.अ.) – **'विहिणा०'** इत्यादि, **यो** गणि**र्विधिना प्रेरयति** शिष्याणां चोदनादिकं च ददाति, **सूत्रार्थं च ग्राहयति स धन्यः** कृत**पुण्यः स** एव **बंधुः स मोक्षदायक** इति ॥२५॥

(द्वि.अ.) – **'विहि०'** इत्यादि, **यो विधिना प्रेरयति** = चोदनादिकं प्रयच्छति, **सूत्रार्थं च ग्राहयति स धन्यः** कृत**पुण्यः स बंधुः स मोक्षदायकः** ॥२५॥

**स एव भव्वसत्ताणं, चक्खूभूए विआहिए ।**
**दंसेइ जो जिणुद्दिट्ठं, अणुट्ठाणं जहट्ठिअं ॥२६॥**

---

१. 'अ' D-प्रते । २. 'संजमसारेण नि०' G-प्रते । ३. 'नीसारो' F-प्रते ।

स एव भव्यसत्त्वानां, चक्षुर्भूतो व्याहृतः ।
दर्शयति यो जिनोद्दिष्ट-मनुष्ठानं यथास्थितम् ॥२६॥

(प्र.अ.) – '**स एव०**' इत्यादि, **स एव** पूर्वोक्तलक्षणाचार्यो **भव्यसत्त्वानां चक्षुर्भूतो व्याहृतः** = कथितः **यो जिनोपदिष्टमनुष्ठानं यथास्थितम्** = यथाभाषितं दर्शयति ॥२६॥

(द्वि.अ.) – '**स एव०**' इत्यादि, **स एवाचार्यो भव्यसत्त्वानां चक्षुर्भूतो व्याहृतः** = कथितो **यो जिनोपदिष्टमनुष्ठानं यथास्थितं दर्शयति** ॥२६॥

**तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ ।**
**आणं अइक्कमंतो, सो काउरिसो, न सप्पुरिसो ॥२७॥**

तीर्थकरसमः सूरिः सम्यग् यो जिनमतं प्रकाशयति ।
आज्ञामतिक्रामन् सः, कापुरुषः न सत्पुरुषः ॥२७॥

(प्र.अ.) – '**तित्थ०**' इत्यादि, तीर्थं = चातुर्वर्णसंघलक्षणं करोतीति तीर्थकृत्, तत्समम् = तत्तुल्यो भवति गुरु**र्यः सम्यक्** प्ररुपणया **जिनमतं प्रकाशयति** = प्रकटीकरोति स **तीर्थंकरसमो** गुरुर्ज्ञातव्यः । यो गुरुर्जिना**ज्ञां** विपरीतप्ररूपणया **अतिक्रामति स** गुरुर्न कथ्यते, **कापुरुषः** = कुत्सितपुमान्, अत एव कुगुरुः कथ्यते इति सम्बन्धः ॥२७॥

(द्वि.अ.) – '**तित्थय०**' इत्यादि, **यः सम्यक् जिनमतम्** = तीर्थंकरभाषितं **प्रकाशयति** स **तीर्थंकरसमानः सूरिः** प्रोक्तः । यः पुनः तीर्थंकरा**ज्ञाम् अतिक्रामति** = उल्लंघयति **स कापुरुषः** कथ्यते, **न** तु **सत्पुरुषः** ॥२७॥

**भट्ठायारो सूरी १, भट्ठायाराणुविक्खओ[1] सूरी २ ।**
**उम्मग्गठिओ सूरी ३, तिन्निवि मग्गं पणासंति ॥२८॥**

भ्रष्टाचारः सूरिर्भ्रष्टाचारोपेक्षकः सूरिः ।
उन्मार्गस्थितः सूरिस्त्रयोऽपि मार्गं प्रणाशयन्ति ॥२८॥

---

१. '०णुवेक्खओ' - A-D-F-G-H-प्रतपाठः, अत्र पुनः B-C-प्रत्यनुसारेण ।

(प्र.अ.) – '**भट्ठा०**' इत्यादि, **भ्रष्टाचारसूरिः, भ्रष्टाचाराणां** विनेयानाम**ुपेक्षकः सूरि**र्यो चोदनादिकं न ददाति, च = पुनः उन्मार्गस्थितः प्रवर्त्तको वा **सूरि**रिति त्रयः, एवं **त्रयोऽपि** जिनोक्तं **मार्गं प्रणाशयन्ति** = जिनाज्ञामुत्थापयन्ति = विराधयन्ति ॥२८॥

(द्वि.अ.) – '**भट्ठा**' इत्यादि, **भ्रष्टाचारः सूरिः, भ्रष्टाचाराणां** स्वशिष्याणाम**ुपेक्षकः सूरि**स्तेषां न नोदनादिकं प्रयच्छति, **उन्मार्गस्थितः सूरिः**, एते **त्रयोऽपि मार्गं** जिनानां **प्रणाशयन्ति** = जिनाज्ञां विराधयन्तीत्यर्थः ॥२८॥

**उम्मग्गठिए सम्मग्गनासए[1] जो उ सेवए सूरिं ।**
**निअमेणं सो गोअम ! अप्पं पाडेइ संसारे ॥२९॥**

उन्मार्गस्थितान् सन्मार्गनाशकान् यस्तु सेवते सूरीन् ।
नियमेन स गौतम ! आत्मानं पातयति संसारे ॥२९॥

(प्र.अ.) – '**उम्मग्ग०**' इत्यादि, **उन्मार्गे स्थितम्, सन्मार्गनाशकम्** - जिनोक्त-मार्गभेदकम्[2], एवंविधं **सूरिं** कर्मनिर्जरार्थी सन् **यः** पुमान् **सेवते,** हे **गौतम ! स** जीवो निश्चयेन **आत्मानं संसारावटे प्रपातयति** ॥२९॥

(द्वि.अ.) – '**उम्मग्ग०**' इत्यादि, **उन्मार्गस्थितम्, सन्मार्गनाशकम्, य** एवंविधं **सूरिं सेवते । हे गौतम ! स निश्चयेन आत्मानं संसारे पातयति** ॥२९॥

**उम्मग्गठिओ एक्को वि नासए[3] भव्वसत्तसंघाए ।**
**तं मग्गमणुसरंतं[4], जह कुत्तारो[5] नरो होइ ॥३०॥**

उन्मार्गस्थित एकोऽपि नाशयति भव्यसत्त्वसङ्घातान् ।
तन्मार्गमनुसरन्तं यथा कुतारो नरो भवति ॥३०॥

(प्र.अ.) – '**उम्मग्ग०**' इत्यादि, दार्ष्टान्तिकयोजना - एवंविधो गुरुरुपसेवते यत्कुरुते तदा **उन्मार्गस्थित एकोऽपि** गुरुर्मुख्यो मुख्यतां लब्ध्वा स्वोपदेशप्ररूपणादिभिर-सत्यमार्गमुपदिश्य भव्यसत्त्वान् कारयति, कारयित्वा तदुपदिष्टसत्यमार्गनिरतान् **भव्यसत्त्वान्**

---

१. 'सम्मत्त०' E-F । २. 'जिनोक्त भेदनाशकम्' इति A-प्रते, 'जिनोक्तमार्गदेशकम्' इति C-प्रते । ३. '०ए सव्व०' F-प्रते । ४. '०मणुसरंते' A-आदिषु । ५. 'कुत्तारू' A-D-F-G-प्रतिषु ।

= भव्यसत्त्वसमूहं च नाशयति = भ्रमाडयति । दृष्टान्तमाह - **यथा कुत्तारः** कुत्सिततारको नाविकः **नरो भवति** स बहून् पृष्टलग्नान् जनान् नद्यादौ मज्जयति, स्वयं निपततीति गाथार्थः ॥३०॥

(द्वि.अ.) – '**उम्म०**' इत्यादि, **उन्मार्गस्थित एकोपि** मुख्यः **सन्मार्गमनुसरंतं भव्यसमूहं नाशयति** = भ्रमयति संसारारण्ये । दृष्टांतमाह = **यथा कुत्तारः** = कुत्सिततारको **नरो भवति** स बहून् पृष्टिलग्नान् जीवान् नद्यादौ मज्जयति स्वकमात्मानमपि सार्द्धम् ॥३०॥

**उम्मग्गमग्गसंपट्ठिआणं[१], साहूण गोअमा ! [२]नूनं ।**
**संसारो अ अणंतो, होइ य[३] सम्मग्गनासीणं ॥३१॥**

उन्मार्गमार्गसम्प्रस्थितानां साधूनां गौतम ! नूनम् ।
संसारश्चानन्तो भवति सन्मार्गनाशिनाम् ॥३१॥

(प्र.अ.) – '**उम्मग्ग०**' इत्यादि, **उन्मार्गे संप्रस्थितानां** = चलितानां च = पुनः **सन्मार्गनाशिनां** = कुमार्गोपदेशकानां नामतः **साधूनां** [४]न भावतः, एवंविधानां हे **गौतम !** निश्चयेन अनन्तसंसारो **भवति** ॥३१॥

(द्वि.अ.) – **उन्मार्गमार्गसंप्रस्थितानां** = चलितानाम्, **सन्मार्गनाशिनां** हे **गौतम !** नूनमनन्तः **संसारो भवति** ॥३१॥

**सुद्धं सुसाहुमग्गं, कहमाणो ठवइ तइअपक्खम्मि ।**
**अप्पाणं, इयरो पुण गिहत्थधम्माओ चुंक्कुत्ति[५] ॥३२॥**

शुद्धं सुसाधुमार्गं कथयन् स्थापयति तृतीयपक्षे ।
आत्मनमितरः पुनर्गृहस्थधर्माद् भ्रष्ट इति ॥३२॥

(प्र.अ.) – '**सुद्धं०**' इत्यादि, **शुद्धम्** = दोषरहितं **सुसाधुमार्गं कथयन्** = आह, **आत्मानं तृतीयपक्षे** = संविग्नपाक्षिकमार्गे **स्थापयति । इतरः पुनः** उत्सूत्रभाषको

---

१. '०ण सूरीण' **A-D-F-G-H**-प्रतपाठः । २. 'णूणं' **A-D**-आदिषु । ३. 'होई स' **E**-प्रते । ४. 'साधूनां भावतः' इति **B-C**-प्रतपाठः । ५. 'चक्कु त्ति' **E-G**, 'चुक्केति' **A-D**, 'चुक्को त्ति' **F-H** ।

**गृहस्थ** उभयभ्रष्ट इति गाथार्थः ॥३२॥

(द्वि.अ.) – '**सुद्धं०**' इत्यादि, **शुद्धं सुसाधुमार्गं कथयन्** = शुद्धप्ररूपक इति, **आत्मानं तृतीयपक्षे** = संविग्नपाक्षिकमार्गे **स्थापयती**ति । **इतरः पुनः** उत्सूत्रभाषको **गृहस्थधर्मादपि** भ्रष्टः, आस्तां तावद् यतिधर्मः, गृहस्थेऽपि न भवतीति ॥३२॥

**जइवि न [1]सक्कं काउं, सम्मं जिणभासिअं अणुट्ठाणं ।**
**[2]तो सम्मं भासिज्जा, जह भणिअं खीणरागेहिं ॥३३॥**

यद्यपि न शक्यं कर्तुं सम्यग् जिनभाषितमनुष्ठानम् ।
ततः सम्यग् भाषेत यथा भणितं क्षीणरागैः ॥३३॥

(प्र.अ.) – '**जइवि०**' इत्यादि, **यद्यपि** कथंचित् प्रमादात् भ्रश्यति, अत एव आलस्यादियोगेन कर्मयोगेन वा सामग्र्यभावेन वा **जिनभाषितं** = प्ररूपित**मनुष्ठानं सम्यक्कर्तुं** सत्क्रियया **न शक्नोति तदा** ततो **यथा क्षीणरागाः** = केवलिनस्तैः **सम्यग्** प्ररूपणया प्ररूपितं तथा सम्यग् भाषितानुसारेण स्वयमेव प्ररूपयेत् इति गाथार्थः ॥३३॥

(द्वि.अ.) – '**जइवि०**' इत्यादि, **यद्यपि जिनभाषितमनुष्ठानं सम्यक् कर्तुं न शक्नोति, तदा यथा क्षीणरागैः** सर्वज्ञै**र्भणित**मनुष्ठानादि तथा **सम्यग् भाषेत** ॥३॥

**[3]ओस्सन्नोऽवि विहारे, कम्मं सोहेइ सुलभबोही य ।**
**चरणकरणं विसुद्धं, उववूहिंतो परूविंतो ॥३४॥**

अवसन्नोऽपि विहारे, कर्म शोधयति सुलभबोधिश्च ।
चरणकरणं विशुद्धं, उपबृंहयन् प्ररूपयन् ॥३४॥

(प्र.अ.) – '**ओसन्नो०**' इत्यादि, **विहारेऽवसन्नो** क्रियायां **चरणविशुद्धमुपबृंहन्** शुद्धं **प्ररूपयेत्**, एवंविधो मुनिः **कर्माणि शोधयति, सुलभबोधिश्च** भवति ॥३४॥

(द्वि.अ.) – '**ओसन्नो०**' इत्यादि, **विहारेऽवसन्नेऽपि** = संयमक्रियायामलसोऽपि **चरणकरण**मार्गं **विशुद्धमुपबृंहयन्** = प्रशंसयन्, शुद्धं च **प्ररूपयन्**, एवंविधः साधुः

---

१. 'सक्कइ का०' F-प्रते । २. 'ता' E-प्रते । ३. 'उस्सन्नो' B-C-प्रतपाठः ।

**कर्माणि शोधयति सुलभबोधिश्च** भवति ॥३४॥

**सम्मग्गमग्गसंपट्ठिआण, साहूण कुणइ वच्छल्लं ।**
**ओसहभेसज्जेहि य, सयमन्नेणं तु कारेइ[1] ॥३५॥**

सन्मार्गमार्गसंप्रस्थितानां, साधूनां करोति वात्सल्यम् ।
औषधभैषज्यैश्च स्वयं अन्येन तु कारयति ॥३५॥

(प्र.अ.) – '**सम्मग्ग०**' इत्यादि, **सन्मार्गप्रस्थितानां साधूनां करोति** वैयावृत्यम्, **औषधं भेषजश्च स्वयं** करोति **अन्येन कारापयती**ति गाथार्थः ॥३५॥

(द्वि.अ.) – '**सम्म०**' इत्यादि, **सन्मार्गमार्गसंप्रस्थितानां साधूनां वात्सल्यम् औषधभेषजैश्च स्वयं** करोति, **अन्येन** वा गृहस्थादिना **कारयति** स संविग्नपाक्षिकः साधुः आराधको भवति ॥३५॥

**भूए अत्थि भविस्संति, केइ तेलुक्क[2]नमि[3]अकमजु[4]अला ।**
**जेसिं परहिअकरणि[5]क्कबद्धलक्खाण वोलिही कालो ॥३६॥**

भूताः सन्ति भविष्यन्ति, केचित् त्रैलोक्यनतक्रमयुगलाः ।
येषां परहितकरणैकबद्धलक्षाणां गमिष्यति कालः ॥३६॥

(प्र.अ.) – '**भूए०**' इत्यादि, इत्थं **त्रैलोक्याः** = स्वर्गमर्त्यपातालरूपास्तेषां प्रणयन-शीलाः **क्रमयुगा**श्चरणारविंदाः, अत एव सर्वत्र पूज्याः, एवंविधाः विशिष्टाचाराः अनुष्ठानवन्तः **केचित्** सत्पुरुषाः सुगुरवो अतीतकाले **भविष्यन्ति,** येषां सत्पुरुषाणां = **परहितकरणैक-निबद्धलक्षाणां कालः** = बोधिलाभो गमिष्यति, एभिर्लक्षणैः संविग्नपाक्षिका ज्ञायन्ते इति गाथार्थः ॥३६॥

(द्वि.अ.) – '**भूए०**' इत्यादि, **त्रैलोक्यनतक्रमयुगलाः** = त्रिलोकीजनप्रणतपादद्वयाः पूज्या इति यावत्, एवंविधाः **केचित्** = सत्पुरुषाः **भूतास्सन्ति भविष्यन्तीति, येषां परहितकरणैकबद्धलक्षानां कालः** सर्वोऽपि '**वोलही**'**ति** अतिक्रमिष्यति स संविग्नपाक्षिकः

१. 'कारेई' H-प्रते । २. 'तेलोक्क०' H-प्रते । ३. '०नमंसणीय०' D-E-F-G-H । ४. '०जुयले' H-आदिषु । ५. '०करणेक्क०' H-आदिषु ।

पूज्यो भवतीति ॥३६॥

**विपर्यासेनाऽऽह –**

**तीआणागयकाले, केई होहिंति गोयमा ! सूरी ।**
**जेसिं नामग्गहणेऽवि[1], होइ[2] नियमेण पच्छित्तं ॥३७॥**

अतीतानागतकाले, केचिद्भविष्यन्ति गौतम ! सूरयः ।
येषां नामग्रहणेऽपि, भवति नियमेन प्रायश्चित्तम् ॥३७॥

(प्र.अ.) – **'तीआणा०'** इत्यादि, **अतीतानागतकाले केचित्** सूरयोऽतीवदुष्टाः, अशीलाः, अनुष्ठानादिवन्तो, महारम्भिणः, सपरिग्रहाः, विषययुक्ताः, अब्रह्मचारिणो, लिङ्गमात्रजीविनः एवंविधा अगुणोपेता भूता भविष्यन्ति सन्ति च, **येषामभिधानग्रहणेन नियमेन** = निश्चयेन **प्रायश्चित्तं** = महत्तपोरूपं **भवती**ति गाथार्थः ॥३७॥

(द्वि.अ.) – **'तीया०'** इत्यादि, **अतीतेऽनागते** च **काले केचिन्नि**र्गुणाः सूरयः भूता **भविष्यन्ति** च, **येषां नामग्रहणे**ऽपि = अभिधानस्मृतावपि **नियमेन प्रायश्चित्त**-मापद्यते, सदोषदुष्टत्वात् ॥३७॥

**यतः प्रोक्तमस्ति –**

**सयरी[3]भवंति अणविक्खयाइ, जह भिच्चवाहणा लोए ।**
**पडिपुं[4]च्छाहिं चोयण, तम्हा उ गुरू सया भयइ[5] ॥३८॥**

स्वेच्छाचारीणि भवन्ति, अनपेक्षया यथा भृत्यवाहनानि लोके ।
प्रतिपृच्छाभिश्चोदनाभिः, तस्मात्तु गुरुः सदा भजते ॥३८॥

(प्र.अ.) – **'सय०'** इत्यादि, **यथा अनपेक्षया** = शिक्षारहितत्वेन **लोके भृत्य-वाहनादयः सयरीभवन्ती**ति = स्वेच्छाचारिणो भवन्ति, तस्माद् कारणादेवं ज्ञात्वा **प्रति-पृच्छादिभिः** सारणा-वारणा-चोदना-प्रतिचोदनाभिश्च सुशिष्यस्य सत्यापयतीति गाथार्थः ॥३८॥

---

१. '०हणेण हो०' E-F-G । २. 'होज्ज' H-प्रते, 'हुज्ज' - A-प्रते । ३. 'सइरी०' H-प्रते । ४. 'पडिपुच्छ सोहि चोयण' A-H-आदिषु । ५. 'भयई' H-प्रते ।

(द्वि.अ.) – **'जउ'ति यतो** भणितम् - **'सई०'** इत्यादि, **यथा अनपेक्षया** = शिक्षाविहीनत्वेन **लोके भृत्यवाहनादयः** स्वेच्छाचारिणो भवन्ति **चोदनप्रतिचोदनादि-भिस्तस्माद् गुरुः** स्वशिष्यान् **सत्यापयन्ति** ॥३८॥

**जो ऊ पमायदोसेणं, आलस्सेणं तहेव य ।**
**सीसवग्गं न चोएइ, तेण आणा विराहिया ॥३९॥**

यस्तु प्रमाददोषेणालस्येन तथैव च ।
शिष्यवर्गं न प्रेरयति तेनाज्ञा विराधिता ॥३९॥

(प्र.अ.) – **'जो उ प०'** इत्यादि, **यः** आचार्यपदवीमासाद्य **आलस्यादिप्रमाद-दोषवशतो**ऽन्वहं **स्वशिष्यवर्गं न चोदयति** = चोदनादि न कुर्यात्, **तेन** निश्चितमाचार्येण श्रीमज्जि**नाज्ञा विरोधितेति** गाथार्थः ॥३९॥

(द्वि.अ.) – **'जो उ०'** इत्यादि, **यस्तु** आचार्यः **प्रमाददोषेण** शिथिलताशंका-तिरेकादिदोषैः **स्वशिष्यवर्गम्** = स्वपरिवारम् **आलस्यादि**दोषेण च **न चोदयति** = न प्रेरयति संयमाध्वनि, **तेना**चार्येण जि**नाज्ञा विराधिता** ॥३९॥

**संखेवेणं मए [१]सोम्म !, वन्नियं गुरुलक्खणं ।**
**गच्छस्स लक्खणं धीर !, संखेवेणं निसामय ॥४०॥**

संक्षेपेण मया सौम्य ! वर्णितं गुरुलक्षणम् ।
गच्छस्य लक्षणं धीर ! संक्षेपेन निशामय ॥४०॥

(प्र.अ.) – **'संखेवे'** इत्यादि, हे **सौम्य**दर्शन ! हे शिष्य ! समासेन = **संक्षेपेण वर्णितम्** = उपदर्शितं **गुरुलक्षणम्** = आचार्यस्वरूपम्, अथ हे **धीर** ! हे पण्डित ! **संक्षेपेण गच्छस्य लक्षणम्** = स्वरूपं त्वं सावधानमनाः शृणु, अहं ब्रवीमीति गुरुवाक्यं शिष्यस्य सावधानकरणार्थम् ॥४०॥

(द्वि.अ.) – **'संखे०'** इत्यादि, हे **सौम्य**शिष्य ! **मया संक्षेपेण गुरुलक्षणं वर्णितम्,** अथ हे **धीर**पण्डित ! **संक्षेपेण गच्छलक्षणं** शृणु ॥४०॥

---

१. 'सोम' F-प्रते ।

**गीअत्थे जे सुसंविग्गे, अणालस्सी दढव्वए ।**
**अक्खलियचरित्ते सययं, रागदोसविवज्जिए ॥४१॥**

गीतार्थो यो सुसंविग्नः अनालस्यी दृढव्रतः ।
अस्खलितचारित्रः सततं, रागद्वेषविवर्जितः ॥४१॥

(प्र.अ.) – '**गीअ०**' इत्यादि, गीताः = ज्ञाता अर्था येन स **गीतार्थः**, सुशोभनः संविग्नः = **सुसंविग्नः** = शोभनसंवेगवान्, आलस्यरहितः = **अनालस्यः**, **दृढव्रतः**, **सततमस्खलितचारित्रः** = अनतिचारसंयमधरः (रागद्वेषविवर्जितः) इति गाथार्थः ॥४१॥

(द्वि.अ.) – '**गीयत्थो०**' इत्यादि, **यो गीतार्थो** = बहुश्रुतः, **सुसंविग्नः** = संवेगवान्, **अनालस्यः** = आलस्यरहितो, **दृढव्रतः**, सततमस्खलितचारित्रो, **रागद्वेषरहितः** ॥४१॥

**निट्ठविअअट्ठमयट्ठाणे, [१]सोसिअकसाए जिइंदिए ।**
**विहरिज्जा तेण सद्धिं तु, छउमत्थेणवि केवली ॥४२॥**

निष्ठापिताष्टमदस्थानः शोषितकषायो जितेन्द्रियः ।
विहरेत् तेन सार्द्धं तु छद्मस्थेनापि केवली ॥४२॥

(प्र.अ.) – '**निट्ठवि०**' इत्यादि, **निष्ठापिताष्टमदस्थानः**, **शोषितकषायो**, **जितेन्द्रियः**, एवंविधेन तेन **छद्मस्थेनापि सार्द्धं केवली विहरेत्** = विहारं कुर्यात्, तदान्येषां च का कथा = वार्त्ता ? इति गाथार्थः ॥४२॥

(द्वि.अ.) – '**निट्ठवि०**' इत्यादि, **निष्ठापिताष्टमदस्थानः**, **शोषितकषायो**, **जितेन्द्रियः** एवंविधेन तेन **छद्मस्थेनापि सार्द्धं केवली विहरेत्** = विहारं कुर्यात्, तदाऽन्यस्य का वार्त्ता ? ॥४२॥

**तो जे अणहीयपरमत्था, गोअमा ! संजए भवे ।**
**तम्हा ते विवज्जिज्जा, दुग्गईपंथदायगे ॥४३॥**

येऽनधीतपरमार्थाः, गौतम ! संयता भवन्ति ।
तस्मात्तानपि विवर्जयेत् दुर्गतिपथदायकान् ॥४३॥

---

१. 'सुसिय०' A-D-प्रते, 'समिय०' B-C-E-F-G-H-प्रते ।

(प्र.अ.) – **'तो जे अ०'** इत्यादि, हे **गौतम ! यः संयतः साधुरनधीतपरमार्थः** = अज्ञाततत्त्वो **भवति तस्मात्तान् दुर्गतिपथदेष्टॄन्** = **दायकान्** अगीतार्थान् **विवर्जयेत्** = परिहरेदित्यर्थः ॥४३॥

(द्वि.अ.) – **'तो जे०'** इत्यादि, हे **गौतम ! यः संयतोऽनधीतपरमार्थः** = अज्ञातपरमार्थो **भवति** स मोक्षमार्गविधावनिपुण इति, **तस्मात्तान्** अगीतार्थान् **दुर्गति-पथदायकान् विवर्जयेदिति** ॥४३॥

**गीअत्थस्स वयणेणं, विसं हालाहलं पिवे ।**
**निव्विकप्पो य भक्खिज्जा, तक्खणे[१] जं समुद्दवे ॥४४॥**

गीतार्थस्य वचनेन विषं हालाहलं पिबेत् ।
निर्विकल्पश्च भक्षयेत्, तत्क्षणे यत् समुद्रावयेत् ॥४४॥

(प्र.अ.) – **'गीअ०'** इत्यादि, **गीतार्थस्य** = सम्यग्ज्ञाततत्त्वस्य गुरोरिति **वचनेन** = वाक्येन **निर्विकल्पः सन्** = आशंकाभीतिरहितः सन् **हालाहलं** महाविषं दारुणकटुक-परिणामं **विषं पिबेत्** = पानं कुर्यात्, **यस्मात्** करणात् **तत्क्षणे समुद्रवेत्** = मरणं प्राप्नोतीति गाथार्थः ॥४४॥

(द्वि.अ.) – **'गीय०'** इत्यादि, **गीतार्थस्य वचनेन निर्विकल्पः** सन् = आशंकादि-रहितः सन् **हालाहलं** = दारुणं **विषं पिबेत्** = पानं कुर्यात्, यस्मात् कारणात् **तत्क्षणम्** = समकालमेव **समुपद्रवेत्** = मरणं प्रापयेदिति ॥४४॥

**परमत्थओ विसं नो तं, अमयरसायणं खु तं ।**
**निव्विग्घं जं न तं मारे, मओऽवि अमयस्समो ॥४५॥**

परमार्थतो विषं न तदमृतरसायनं खु तत् ।
निर्विघ्नं यद् न तद् मारयति मृतोऽपि अमृतसमः ॥४५॥

(प्र.अ.) – **'परम०'** इत्यादि, **परमार्थतो** = निश्चयन्यायेन **तद्विषं न** भावि, तद्विष**ममृतरसायन**समं भवति, यद्विषं निर्विघ्नं निर्दोषं भवति = न मारयति । **स**

१. 'तक्खणा' **C-D-F-G-H**-प्रते, अत्र पुनः **A-B**-प्रतपाठः ।

**मृतोऽप्यमृत**सदृशो भवति ॥४५॥

(द्वि.अ.) – अथ **तत्परमार्थतो विषं** तन्न भवति । **खु** = निश्चितं **तद्** = विषं **अमृतरसायनं** भवति **यद्** = विषं **निर्विघ्नं** करोति **तद्** = विषं **न मारयति, स मृतोऽप्यमृतसमो** जीवन्निव भवतीत्यर्थः ॥४५॥

**[1]अगीयत्थस्स वयणेणं, [2]अमयंपि न घुंटए ।**
**जेण नो तं भवे अमयं, जं अगीयत्थदेसियं ॥४६॥**

अगीतार्थस्य वचनेनामृतमपि न पिबेत् ।
येन न तद् भवेदमृतं यदगीतार्थदेशितम् ॥४६॥

(प्र.अ.) – **'अगी०'** इत्यादि, **अगीतार्थः** अज्ञाततत्त्वः **तस्य वचनेन** अमृतं = न म्रियते यस्मादिति **अमृतमपि न घुंटयेत्** = न पिबेत् । येन **कारणेन** तदगीतार्थवचनं **अमृतं** न पिबेत् = न भवेत्, यद**गीतार्थ**वचनं **देशितं** तत्परमार्थतोऽ**मृतं न भवति** = परभवे हितकारकं न भवति ॥४६॥

(द्वि.अ.) – **'अगी०'** इत्यादि, **अगीतार्थस्य वचनेनाऽमृतं न** पिबेत् । **येन** कारणेन तदगीतार्थवचनम् **अमृतं न भवेत्, यदगीतार्थदेशितम्** ॥४६॥

**परमत्थओ न तं अमयं, विसं हालाहलं खु तं ।**
**न तेण अजरामरो हुज्जा, तक्खणा निहणं वए ॥४७॥**

परमार्थतो न तदमृतं, विषं हालाहलं खु तत् ।
न तेनाजरामरो भवेत्, तत्क्षणात् निधनं व्रजेत् ॥४७॥

(प्र.अ.) – **'परम०'** इत्यादि, परम् अगीतार्थवचनं **परमार्थतः खु** = निश्चयेन **तद् अमृतं हालाहलं विषं** भवति, **तेन अजरामरो न भवति, तत्क्षणान्निधनं व्रजेत्** = तत्कालं मरणं प्राप्नोतीत्यर्थः ॥४७॥

(द्वि.अ.) – **'परम०' तत्परमार्थतोऽमृतं** न भवति । **खु** = निश्चये तद् अमृतं

---

१. 'अग्गीयस्स' **F-G**-प्रतपाठः । २. 'अमियंपि' इति **पूर्वमुद्रिते** ।

**हालाहलविषं** भवति, तेन चामृतेन **अजरामरो न भवति, तत्क्षणान्निधनं व्रजेत्** = तत्कालं मरणमाप्नुयात् ॥४७॥

**तदगीतार्थवर्जनोपायमाह –**

**अगीयत्थकुसीलेहिं, संगं तिविहेण वोसिरे ।**
**मुक्खमग्गस्सिमे विग्घे, पहंमी तेणगे जहा ॥४८॥**

अगीतार्थकुशीलैः सङ्गं त्रिविधेन व्युत्सृजेत् ।
मोक्षमार्गस्येमे विघ्नाः, पथि स्तेनका यथा ॥४८॥

(प्र.अ.) – **'अगी०' अगीतार्थकुशीलैः** सह **संगः** = संसर्गः त्रिविधं **त्रिविधेन व्युत्सृजेत् ।** यत इमे कुशीला **मोक्षमार्गविघ्नस्य** करा अत एव लुंटाकसमाना भवन्ति । **यथा पथि** = मार्गे गच्छतः **स्तेनका** = चौराः विघ्नकरा भवन्तीति सम्बन्धः ॥४८॥

(द्वि.अ.) – **'अगी०'** इत्यादि, **अगीतार्थकुशीलैः** सह **संगः** = परिचयं **त्रिविधेन** = कृतकारितानुमतिभेदेन मनोवाक्कायभेदेन वा **व्युत्सृजेत्,** यत इमे अगीतार्थकुशीला **मोक्षमार्गस्य विघ्ना** = विघ्नकरा, **पथि** तस्करा इव = मार्गे चौरा **यथा** ॥४८॥

**पज्जलियं हुयवहं दट्ठुं, निस्संको तत्थ पविसिउं ।**
**अत्ताणं निद्दहिज्जाहि, नो कुसीलस्स अल्लिए ॥४९॥**

प्रज्वलितं हुतवहं दृष्ट्वा, निःशङ्कं तत्र प्रविश्य ।
आत्मानं निर्दहेत् नैव कुशीलमालीयेत् ॥४९॥

(प्र.अ.) – **'पज्ज०'** इत्यादि, **प्रज्वलितं** प्रज्वलंतं वा उप्फुलिंगं **हुतवहं** = वैश्वानरं **दृष्ट्वा निःशंको** = निर्भयः **तत्र प्रविश्य आत्मानं निर्दहेत्** = ज्वालयेत् = भस्मीकुर्यात्, परं **कुशीलस्य** = दुराचारिणः संगं **न** कुर्यात् ॥४९॥

(द्वि.अ.) – **'पज्ज०'** इत्यादि, **प्रज्वलितं हुतवहं दृष्ट्वा निःशंकस्तत्र प्रविश्य आत्मानं निर्दहेत्** = ज्वालयेत्, परं **कुशीलस्य** = कुत्सिताचारस्य संगं **न** कुर्यात् ॥४९॥

**पज्जलंति जत्थ [1]धगधगस्स गुरुणा वि चोइए [2]सीसा ।**
**रागदोसेण वि अणुसएण, तं गोयम ! न गच्छं ॥५०॥**

प्रज्वलन्ति यत्र धगधगायमानं गुरुणाऽपि नोदिते शिष्याः ।
रागद्वेषेणापि अनुशयेन स गौतम ! न गच्छः ॥५०॥

(प्र.अ.) – '**पज्ज०**' इत्यादि, **प्रज्वलन्ति यत्र** गच्छे **चोदना**प्रतिचोदनादिभिः **गुरुणा शिष्या [3]धगधगायमानम् अनुशयेन** = पश्चात्तापेन = 'कथमस्माभिः प्रव्रज्या गृहीता ? कथमस्य पार्श्वे वयं समाजग्मुः ?' इति पश्चात्तापेन प्रज्वलन्ति **स** हे **गौतम ! न गच्छः** ॥५०॥

(द्वि.अ.) – '**पज्ज०**' इत्यादि, **यत्र** = गच्छे **चोदना**प्रतिचोदनादिभिर्नोदिता **गुरुणापि शिष्या रागद्वेषैः अनुशयेन** पश्चात्तापेन वा, **धगधगस्से**त्यनुकरणशब्दोऽयम्, एवं **धगधगायमानाः प्रज्वलन्ति** हे गौतम ! स **गच्छो न** भवति ॥५०॥

**गच्छो महाणुभावो, तत्थ वसंताण निज्जरा विउला ।**
**सारण-वारण-चोअण-माईहिं न दोसपडिवत्ती ॥५१॥**

गच्छो महानुभावस्तत्र वसतां निर्जरा विपुला ।
स्मारणावारणाचोदनादिभिर्न दोषप्रतिपत्तिः ॥५१॥

(प्र.अ.) – '**गच्छो०**' इत्यादि, **गच्छः** = सुविहितसाधुसमुदायरूपः, स **गच्छो महानुभावो** वर्त्तते । **तत्र वसतां** मुनीनां **सारणावारणाचोदनादिभिश्च विपुला निर्जरा** भवति, **दोषप्रतिपत्तिर्न** भवति ॥५१॥

(द्वि.अ.) – '**गच्छो०**' इत्यादि, **गच्छो महानुभावो** वर्त्तते, **तत्र वसतां सारणा-वारणा-नोदनादिभिर्विपुला निर्जरा** भवति, **दोषप्रतिपत्तिर्न** भवति ॥५१॥

**गुरुणो [4]छंदणुवत्ती, सुविणीए जिअपरीसहे धीरे ।**
**न वि थद्धे न वि लुद्धे, न वि गारविए, विगहसीले ॥५२॥**

---

१. 'धगधगधगस्स' **H**-प्रते । २. 'सीसे' **C-D-E-F-G-H**, अत्र **A-B**-आदिप्रतपाठः । ३. 'धगमगायमानम्' इति **B-C**-प्रते । ४. 'छंदणुक्के' **C**-प्रते, 'छंदणुवित्ती' **A-B-D-E**-आदि ।

गुरोः छन्दानुवर्तिनः, सुविनीता जितपरीषहा धीराः ।
नापि स्तब्धा नापि लुब्धा, नापि गौरविला विकथाशीलाः ॥५२॥

(प्र.अ.) – '**गुरु०**' इत्यादि, शिष्याः **श्रीगुरूणां छंदोनुवृत्तयः** = गुरुकथितकारिणः, **सुविनीताः**, **जितपरिषहाः**, अत एव त्यक्तदेहममत्वाः, **धीराः**, **नापि स्तब्धाः**, **नापि लुब्धाः**, **न गौरविताः** = न गारवऋद्ध्यादिरूपाः, तैर्विरहिताः, **न विकथाशीलाः** = राजभक्तस्त्रीदेशकथादिविकथारहिताः ॥५२॥

(द्वि.अ.) – '**गुरुणो०**' इत्यादि, **छंदोनुवृत्तिर्गुरोः**, **सुविनीतो**, **जितपरीषहो**, **धीरो** = निर्भीको, **नापि स्तब्धो**, **नापि लुब्धो**, **न गौरवितो**, **न विकथाशीलः** ॥५२॥

**खंते दंते गुत्ते, मुत्ते वेरग्गमग्गमल्लीणे ।**
**दसविहसामायारी-आवस्सग-संजमुज्जुत्ते ॥५३॥**

क्षान्ता दान्ता गुप्ताः, मुक्ता वैराग्यमार्गमालीनाः ।
दशविधसामाचारी-आवश्यक-संयमोद्यताः ॥५३॥

(प्र.अ.) – '**खंते०**' इत्यादि, **क्षान्तो**, **दान्तो** = जितेन्द्रियो, **गुप्तो**, **मुक्तो**, **वैराग्यमार्गमालीनः** = वैराग्यप्राप्तः, **दशविधसामाचारी-आवश्यकसंयमयुक्तः** ॥५३॥

(द्वि.अ.) – '**खंते०**' इत्यादि, **क्षान्तो**, **दान्तो**, **गुप्तो**, **मुक्तो**, **वैराग्यमार्गमालीनः**, **दशविधसाधुसामाचार्यामावश्यकसंयमेषूद्युक्ताः** एवंविधः शिष्यो भवतीति ॥५३॥

**खर-फरुस-कक्कसाए, अणिट्ठ-दुट्ठाइ[१] निट्ठुरगिराए ।**
**निब्भच्छण-निद्धाडणमाईहिं न जे पउस्संति ॥५४॥**

खरपरुषकर्कशया अनिष्टदुष्टया निष्ठुरगिरा ।
निर्भर्त्सननिर्घाटनादिभिः न ये प्रद्विषन्ति ॥५४॥

(प्र.अ.) – '**खर०**' इत्यादि, एवंविधान् **खरपरुषकर्कशनिष्ठुरगिरया** = वाण्या **निर्भर्त्सननिर्घाटन**बहिःकरण**ादिभिश्च ये** शिष्याः **न प्रद्विषन्ति** = न प्रज्वलन्ति = न प्रद्वेषं गच्छन्ति, अत एव सुशिष्याः प्रोच्यन्ते ॥५४॥

---

१. '०दुट्ठाए' D-E-F-G-H-प्रतपाठः, अत्र A-B-C-प्रतपाठः ।

(द्वि.अ.) – '**खर०**' इत्यादि, **खरपरुषनिष्ठुरया गिरा** = वाण्या गुरुणा क्रियमाण्या **निर्भर्त्सननिर्घाटनादिभिश्च ये** शिष्या **न प्रद्विषन्ति** = न प्रद्वेषं गच्छन्ति ते सुशिष्याः ॥५४॥

**अथ पुनरपि सुशिष्यवर्णनामाह –**

**जे अ न अकित्तिजणए, नाऽजसजणए, नाऽकज्जकारी य ।**
**न पवयणुड्डाहकरे, कंठग्गयपाणसेसेऽवि ॥५५॥**

ये च नाकीर्तिजनका नायशोजनका नाकार्यकारिणश्च ।
न प्रवचनोड्डाहकराः कण्ठगतप्राणशेषेऽपि ॥५५॥

(प्र.अ.) – '**जे अ०**' इत्यादि, **ये** सुशिष्या स्वयमनाचारकरणेनात्मीयगुरूणां **नाकीर्त्तिजनका** = नाकीर्त्युत्पादकाः, एकदिग्गामिन्यकीर्त्तिः । **नापि** ते श्रीगुरूणा-**मपयशोजनकाः** = अपयशोत्पादकाः, सर्वदिग्व्यापी अयशः । अत एव ते **नाकार्य-कारिणः** = नामार्गगामिनः, **न प्रवचनोड्डाहकाः**, प्रवचनमध्ये उड्डाहं लोकापवादरूपम् । **कण्ठगतेऽपि प्राणशेषेऽपि** एवंविधा भवन्ति ये ते सुशिष्याः ॥५५॥

(द्वि.अ.) – '**जे अ०**' इत्यादि, **ये** च शिष्या **नापकीर्त्तिजनकाः नाप्यपयशोजनकाः नाकार्यकारिणश्च, न प्रवचनोड्डाहकारकाः कण्ठगतप्राणशेषेऽपि** एवंविधा ये ते सुशिष्याः ॥५५॥

**गुरुणा कज्जमकज्जे खर-कक्कस-दुट्ठ-निट्ठुरगिराए ।**
**भणिए तहत्ति [१]सीसा भणंति तं गोयमा ! गच्छं ॥५६॥**

गुरुणा कार्याकार्ये खरकर्कशदुष्टनिष्ठुरगिरा ।
भणिते तथेति शिष्याः, भणन्ति स गौतम ! गच्छः ॥५६॥

(प्र.अ.) – '**गुरु०**' इत्यादि, गुरुणा **कार्येऽकार्ये** उत्पन्ने च कार्ये **खरकर्कश-दुष्टनिष्ठुरगिरया** = वाण्या **भणिते** सति **सुशिष्यास्तथैवेति** = 'तहत्ति' इति **भणन्ति**, हे **गौतम ! तं गच्छं** महानुभागं = सन्मार्गप्रतिष्ठितं जानीहि ॥५६॥

---

१. 'सीसे' F-G-प्रतपाठः ।

(द्वि.अ.) – '**गुरु०**' इत्यादि, **गुरुणा कार्याऽकार्ये** च **खरकर्कशनिष्ठुरया गिरया भणिते** सति **शिष्यास्तथेति भणन्ति** यत्र गच्छे **तं गच्छं** जानीहि ॥५६॥

**दूरुज्झियपत्ताइसु ममत्तए, निप्पिहे सरीरेऽवि ।**
**जायमजायाहारे बायालीसेसणाकुसले ॥५७॥**

दूरोज्झितपात्रादिममत्वो निस्पृहः शरीरेऽपि ।
जाताजाताहारः द्विचत्वारिंशदेषणाकुशलः ॥५७॥

(प्र.अ.) – '**दुरुज्झ०**' इत्यादि, **पात्रो**पधिप्रमुखेषु वस्तुषु यत्र गच्छे साधवो **दूरोज्झितममत्वाः** = दूरीकृतममत्वभावाः, अत एव तेषु ममत्वभावं न कुर्वन्ति । यत्तेषां परिभोग्यं वस्तु तदपि न मामकीनं कथयति किन्तु मम परिभोग्यमिति सम्बन्धः । ये साधवो **निस्पृहाः** कुत्र ? **स्वशरीरेऽपि** = देहेऽपि, यात्रामात्राहारः, अत एव उदरस्य षष्टभागं न्यूनगं कुर्वन्ति । पुन**र्द्विचत्वारिंशदेषणादोषकुशला** एवंविधा यत्र साधवो भवन्ति हे गौतम ! स गच्छः ॥५७॥

(द्वि.अ.) – '**दूरु०**' इत्यादि, **पात्रो**पधिप्रमुखेषु **ममतां** दूरतस्त्यजन्ति, **शरीरेऽपि निस्पृहो, यात्रामात्रयाहार**ग्रहणनिपुणो, **द्विचत्वारिंशद्**दोषकुशलश्च गच्छवासी साधुर्भवति ॥५७॥

**तं पि न रूव-रसत्थं, न य वण्णत्थं, न चेव दप्पत्थं ।**
**संजमभरवहणत्थं, अक्खोवंगं व वहणत्थं ॥५८॥**

तमपि न रूपरसार्थं न च वर्णार्थं न चैव दर्पार्थम् ।
संयमभारवहनार्थम्, अक्षोपाङ्गमिव वहनार्थम् ॥५८॥

(प्र.अ.) – '**तंपि०**' इत्यादि, **तदपि** = एषणाशुद्धमप्याहारं **न** कुर्वन्ति, किमर्थम् ? **रूपरस**वृद्ध्यर्थम्, यतो मम कायः पुष्टो निरुपमपि रूपसंपद् भवति । तथा च **वर्णार्थम्,** मम शरीरवर्णो विशिष्टतरो भवति । **न चैव दर्पार्थम्** = दर्पस्तदर्थं, किन्तु **अक्षोपांग**मिव शरीरशकट**वहनार्थ**माहारः ओंगणसमो भवति, यथा शकटमोंगणं विना न सज्जीभवति = नोद्वहति इति गाथार्थः ॥५८॥

(द्वि.अ.) – **'तंपि०'** इत्यादि, **तमप्याहारं न रूपरसवृद्ध्याद्यर्थं, न च वर्णार्थं, न चैव दर्पार्थं,** भुंजते इति शेषः । किन्तु **संयमभारोद्वहनार्थम् । अक्षोपांगमिव वहनार्थम् ।** यथा शकटवाहनार्थं लोकोक्त्या ओंगणं भवति तदिव ॥५८॥

**तमपि कारणे भुङ्क्ते, अतः कारणमाह –**

**वेअण १ वेयावच्चे २, इरिअट्ठाए य ३ संजमट्ठाए ४ ।**
**तह पाणवत्तिआए ५, छट्ठं पुण धम्मचिंताए ६ ॥५९॥**

वेदनावैयावृत्त्येर्यार्थं च संयमार्थम् ।
तथा प्राणप्रत्ययार्थं षष्ठं पुनर्धर्मचिन्तार्थम् ॥५९॥

(प्र.अ.) – **'वेअण०'** इत्यादि, **वेदनार्थम्** – क्षुद्वेदनोपशमनाय, **वैयावृत्त्यार्थम्** = आहारग्रहणं विना न वैयावृत्त्यं भवति अत आहारग्रहणं युक्तम् । तथा **ईर्यार्थम्,** तथा **संयमार्थम्,** तथा **प्राणवृत्त्यर्थम्, षष्ठं पुनः धर्मचिन्तार्थम्** = धर्मध्यानार्थम् ॥५९॥

(द्वि.अ.) – **'वेय०'** इत्यादि, क्षुद्वेदनासहनार्थम् १, गुर्वादीनां **वैयावृत्त्यादिकरणार्थम्** २, **ईर्याशोधनार्थम्** ३, **संयमाराधनार्थम्** ४, **तथा प्राणवृत्त्यर्थम्, षष्ठं पुनः धर्मचिन्ता** = धर्मध्यानं तदर्थम् । एभिः षड्भिः कारणैराहारं गृह्णन्ति ॥५९॥

**जत्थ य जिट्ठ-कणिट्ठो, जाणिज्जइ जिट्ठवयणबहुमाणो[1] ।**
**दिवसेणवि जो जिट्ठो, न य हीलिज्जइ स गोअमा ! गच्छो ॥६०॥**

यत्र च ज्येष्ठः कनिष्ठो ज्ञायते ज्येष्ठवचनबहुमानः ।
दिवसेनापि यो ज्येष्ठो, न च हील्यते स गौतम ! गच्छः ॥६०॥

(प्र.अ.) – **'जत्थ०'** इत्यादि, **यत्र** प्रव्रज्यापर्यायेण **ज्येष्ठकनिष्ठो ज्ञायते ज्येष्ठवचनबहुमानात्, दिवसेनापि यो ज्येष्ठः** प्रव्रज्यायां स **न हील्यते** = न निन्द्यते। हे **गौतम ! स गच्छः** प्रोच्यते ॥६०॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र च ज्येष्ठकनिष्ठो ज्ञायते ज्येष्ठवचनबहुमानात्,**

१. 'जेट्ठवयण०' इति E-प्रते, 'जेट्ठविणय-बहुमाणा' D-F-G-H-प्रते, अत्र पुनः A-B-C-प्रतपाठः ।

किं बहुना ? **दिवसेनापि यो ज्येष्ठः** स लघुना **न हील्यते** = न निन्द्यते विनयकरणादिभिर्यत्र **स गौतम ! गच्छ** इत्युच्यते ॥६०॥

**जत्थ य अज्जाकप्पो[1], पाणच्चाएवि रोरदुब्भिक्खे ।**
**न य परिभुंजइ[2] सहसा, गोयम ! गच्छं तयं भणियं ॥६१॥**

यत्र चार्याकल्पः प्राणत्यागेऽपि रौरदुर्भिक्षे ।
न च परिभुज्यते सहसा, गौतम ! गच्छः स भणितः ॥६१॥

(प्र.अ.) – '**जत्थ०**' इत्यादि, **यत्र** गच्छे **आर्याकल्पम्** = आर्यया स्वलब्ध्यानीतम् = आर्यानीतं **प्राणत्यागेऽपि, रौद्रदुर्भिक्षेऽपि च न परिभुज्यते । सहसा** = सहसात्कारेणापि, हठेनापि च न परिभुज्यते हे **गौतम !** निश्चयतः **स गच्छः** ॥६१॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र** गच्छे **आर्याकल्पम्** = साध्वीप्राप्तम् आहारादि **प्राणत्यागेऽपि रौद्रदुर्भिक्षे** चापि **न परिभुंजते सहसा** = अनालोच्योत्सर्गापवादादिकारणं हे **गौतम ! तस्य गच्छ** इति **भणितं** भगवद्भिरिति ॥६१॥

**अथोत्सर्गेण जल्पनपरिचयादिकं निवारयन्नाह –**

**जत्थ य अज्जाहिं समं थेरावि न उल्लवंति[3] गयदसणा ।**
**न य झायंति थीणं, अंगोवंगाइं तं गच्छं ॥६२॥**

यत्र चार्याभिः समं, स्थविरा अपि नोल्लपन्ति गतदशनाः ।
न च ध्यायन्ति स्त्रीणा-मङ्गोपाङ्गानि स गच्छः ॥६२॥

(प्र.अ.) – '**जत्थ०**' इत्यादि, **यत्र** गच्छे हे गौतम ! **स्थविरा अपि** अत एव वयोवृद्धाः, तपोवृद्धाः, बहुश्रुता अपि, **गतदशनाः** अत एव जराकृष्टत्वेन निपतितदन्ताः **नोल्लपन्ते** उत् = प्राबल्येन बाढं न जल्पन्ति । काभिः **समम् ? आर्याभिः ।** यत्र तु **स्त्रीणामंगोपांगानि** = जघनकुचकक्षादिरूपस्थानादीनि **न ध्यायन्ति स गच्छः** ॥६२॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र च** गच्छे **आर्याभिः समं स्थविरा अपि** 'वयोवृद्धानामत्र ग्रहणं' **न उल्लपन्ति ।** कीदृशाः स्थविराः ? **गतदशनाः** = दन्तरहिता

---

१. '०कप्पं' D-F-G-H-प्रते । २. 'परिभुज्जइ' E-F-प्रते । ३. 'उल्लविंति' A-D-E-F-G-H-प्रते ।

इति । **न च स्त्रीणामंगोपांगानि** = वदनकुचजघनादीनि **ध्यायन्ति** = मनसि न स्मरन्ति, स्मरविकारहेतुत्वादिति **स गच्छ** इति ॥६२॥

**किञ्च –**

**वज्जेह अप्पमत्ता !, अज्जासंसग्गि अग्गिविससरिसी ।**
**अज्जाणुचरो साहू, लहइ अकित्तिं खु अचिरेण ॥६३॥**

वर्जयताप्रमत्ताः ! आर्यासंसर्गीः अग्निविषसदृशीः ।
आर्यानुचरः साधुर्लभतेऽकीर्तिं खु अचिरेण ॥६३॥

(प्र.अ.) – '**वज्जेह०**' इत्यादि, **अप्रमत्ताः** सन्तो यूय**मार्यासंसर्गं वर्जयत** । किम्भूतं संसर्गम् ? **अग्निविषसदृशम् । खु** यस्मा**दार्यानुचरः** = आर्यासेवकः **साधुः अचिरेण** = स्वल्पकालेन **अपकीर्त्तिं लभते** । अत एवार्यासंसर्गं वर्जयेदिति ॥६३॥

(द्वि.अ.) – '**वज्जेह०**' इत्यादि, **अप्रमत्ताः** सन्तो यूय**मार्यासंसर्गं वर्जयत** । किम्भूतं संसर्गम् ? **अग्निविषसदृशं** = विषाग्निसमानं, पूर्वनिपातः प्राकृतत्वात् स्त्रीत्वं च । **खुर्यस्मात् आर्यानुचरः साधुरचिरेण** = अल्पकाले**नापकीर्त्तिं लभते** । अत एवार्यासंसर्गं वर्जयेदिति ॥६३॥

**थेरस्स तवस्सिस्स व, बहुस्सुअस्स व पमाणभूयस्स ।**
**अज्जासंसग्गीए, जणजंपणयं [१]हविज्जाहि ॥६४॥**

स्थविरस्य तपस्विनो वा, बहुश्रुतस्य वा प्रमाणभूतस्य ।
आर्यासंसर्ग्या जनवचनीयता भवेत् ॥६४॥

(प्र.अ.) – '**थेरस्स०**' इत्यादि, **स्थविरस्य, तपस्विनो, बहुश्रुतस्य, प्रमाणीभूतस्य** = सर्वजनमान्यस्य एवंविधस्यापि पुरुषस्यापि **आर्यासंसर्ग्या जनवचनीयता** = जनापवादो **भवति** । अत एव आर्यासंसर्गं वर्जयेदिति ॥६४॥

(द्वि.अ.) – '**थेर०**' इत्यादि, **स्थविरस्य, तपस्विनो, बहुश्रुतस्य, प्रमाणभूतस्य** = सर्वजनमान्यस्य, एवंविधस्यापि पुरुषस्या**प्यार्यासंसर्ग्या जनवचनीयता** = जनापवादो

---

१. 'हवेज्जाहि' **D-E-F-G-H**-प्रतपाठः ।

**भवति** । अत एवार्यासंसर्गं वर्जयेदिति ॥६४॥

**किं पुण तरुणो अबहुस्सुओ अ न य वि हु विगिट्ठतवचरणो ।**
**अज्जासंसग्गीए, जणजंपणयं न पाविज्जा ? ॥६५॥**

किं पुनस्तरुणोऽबहुश्रुतश्च न चापि हु विकृष्टतपश्चरणः ।
आर्यासंसर्ग्या जनवचनीयतां न प्राप्नुयात् ? ॥६५॥

(प्र.अ.) – '**किं पुण०**' इत्यादि, **किं पुनस्तरुणोऽबहुश्रुतश्च न च विकृष्टतपश्चरः** । एवंविधोऽपि स **आर्यासंसर्गाज्जनापवादं न प्राप्नुयादिति** गाथार्थः ॥६५॥

(द्वि.अ.) – '**किं पुण०**' इत्यादि, तर्हि **किंपुनस्तरुणोऽबहुश्रुतश्च** न च **विकृष्टतपश्चरणः** । एवंविधः स **आर्यासंसर्ग्या जनवचनीयतां न प्राप्नुयात्** ? अपि तु प्राप्नुयादित्यर्थः ॥६५॥

**[1]जइवि सयं थिरचित्तो, तहावि [2]संसग्गिलद्धपसराए ।**
**अग्गिसमीवे व घयं, विलिज्ज चित्तं खु अज्जाए ॥६६॥**

यद्यपि स्वयं स्थिरचित्तस्तथापि संसर्ग्या लब्धप्रसरया ।
अग्निसमीपे इव घृतं, विलीयेत चित्तं खु आर्यया ॥६६॥

(प्र.अ.) – '**जइवि०**' इत्यादि, **यद्यपि स्वयं स्थिरचित्तः** साधुर्भवति **तथापि संसर्गिलब्धप्रसरया आर्यया साधुचित्तं** विलीयेत = रागवद् भवति । **यथाग्निसमीपे घृतं विलीयते** तथा मदनवह्नितापेन साधुमनो हि विलीयेत = रागवद् भवति । अत आर्यासंसर्गं वर्जयेत् साधुः ॥६६॥

(द्वि.अ.) – '**जइ०**' इत्यादि, **यद्यपि स्वय**मात्मना **स्थिरचित्तः** साधुस्**तथापि संसर्गिलब्धप्रसरयाऽऽर्यया** साधुचित्तं विलीयते । यथा**ग्निसमीपे घृतं विलीयते** ॥६६॥

**सव्वत्थ [3]इत्थिवग्गंमि, अप्पमत्तो सया अवीसत्थो ।**
**नित्थरइ बंभचेरं, तव्विवरीओ न नित्थरइ ॥६७॥**

---

१. 'जयवि' G-प्रते । २. '०सग्गल०' F-प्रते । ३. 'अत्थि०' G-प्रते ।

सर्वत्र स्त्रीवर्गेऽप्रमत्तः सदा अविश्वस्तः ।
निस्तरति ब्रह्मचर्यं, तद्विपरीतो न निस्तरति ॥६७॥

(प्र.अ.) – '**सव्वत्थ०**' इत्यादि, **सर्वत्र स्त्रीवर्गे अप्रमत्तः** सन् **सदा अविश्वस्तः** = स्त्रीवर्गेऽविश्वासवान् । एवंविधो **ब्रह्मचर्यं निस्तरति** निर्व्यूढं, **तद्विपरीतो न निस्तरति** ॥६७॥

(द्वि.अ.) – '**सव्व०**' इत्यादि, **सर्वत्र स्त्रीवर्गेऽप्रमत्तः** सन् **सदा अविश्वस्तः**, एवंविधः साधुः **ब्रह्मचर्यं निस्तरति** = निर्वाहं करोति, **तद्विपरीतश्च न निस्तरति** ॥६७॥

**[1]सव्वत्थेसु विमुत्तो, साहू सव्वत्थ होइ [2]अप्पवसो ।**
**सो होइ अणप्पवसो, अज्जाणं अणुचरंतो उ ॥६८॥**

सर्वार्थेषु विमुक्तः साधुः सर्वत्रात्मवशो भवति ।
स भवत्यनात्मवशो आर्यायाः अनुचरन् तु ॥६८॥

(प्र.अ.) – '**सव्वत्थ०**' इत्यादि, **सर्वार्थेषु विमुक्तः**, **साधुरिति** गम्यम्, **आत्मवशो भवति** । च पुनः **आर्याणाम्** = साध्वीनाम् **अनुचरत्वम्** कुर्वन् **स** साधुः **नात्मवशो भवति** । लोके साधोरार्यासदृशी बन्धनोपमा नास्ति ॥६८॥

(द्वि.अ.) – '**सव्वत्थ०**' इत्यादि, **सर्वार्थेषु विमुक्तः साधुरात्मवशो भवति** । **आर्याणामनुचरत्वं** कुर्वन् **स** साधुः **अनात्मवशो भवति** = परवशो भवति, साध्व्यधीनकार्यत्वात् ॥६८॥

**अत्र दृष्टान्तमाह –**

**खेलपडिअमप्पाणं, न तरइ जह मच्छिआ विमोएउं ।**
**अज्जाणुचरो साहू, न तरइ [3]अप्पं विमोएउं ॥६९॥**

श्लेष्मपतितमात्मानं, न शक्नोति यथा मक्षिका विमोचयितुम् ।
आर्यानुचरः साधुर्न शक्नोत्यात्मानं विमोचयितुम् ॥६९॥

---

१. 'सव्वत्तो वि विमुत्तो' F-प्रते । २. 'अपवेसो' F-G-प्रते । ३. 'अप्पा वि' E-F-G-प्रते ।

(प्र.अ.) – '**खेल०**' इत्यादि, यथा **श्लेष्मपतितमात्मानं मोचयितुं मक्षिका** न शक्नोति । [१]**तथा आर्यानुचरः साधुरात्मानं मोचयितुं न** शक्नोति ॥६९॥

(द्वि.अ.) – '**खेल०**' इत्यादि, **श्लेष्मपतितमात्मानं न** शक्नोति **मक्षिका यथा मोचयितुं तथाऽऽर्यानुचरः साधुरात्मानं मोचयितुं न** शक्नोति ॥६९॥

**साहुस्स नत्थि लोए अज्जासरिसी हु बंधणे उवमा ।**
**धम्मेण सह [२]ठवंतो, न य सरिसो जाण[३] असिलेसो ॥७०॥**

साधोर्नास्ति लोके, आर्यासदृशी हु बन्धने उपमा ।
धर्मेण सह स्थापयतो न च सदृशो जानीह्यश्लेषः ॥७०॥

(प्र.अ.) – '**साहु०**' इत्यादि, **लोके साधोरार्यासदृशी बन्धनोपमा नास्ति** । लोके पगबंधण इति प्रसिद्धः । (यः पुनः) धर्मभ्रष्टा **धर्मेण सह स्थापयेत्** (तस्य) **आर्यासदृशं** = साध्वीसदृशम् **अश्लेषोऽबन्धनं नास्ति** ॥७०॥

(द्वि.अ.) – '**साहु०**' इत्यादि, **लोके साधोः आर्यासदृशी बन्धने उपमा नास्ति ।** धर्माद् भ्रष्टां दृष्ट्वा **धर्मेण सह स्थापयन् यासां सदृशः** = साध्वीसदृशः **अश्लेषो**ऽबन्धनं **नास्ति** ॥७०॥

**पुनः साधुशिक्षाप्रदानेन गुणवर्णनेन च गुणस्वरूपमाह –**

**वायामित्तेणवि जत्थ, भट्ठचरित्तस्स निग्गहं विहिणा ।**
**बहुलद्धि[४]जुअस्सावी, कीरइ गुरुणा तयं गच्छं ॥७१॥**

वाङ्मात्रेणापि यत्र, भ्रष्टचरित्रस्य निग्रहो विधिना ।
बहुलब्धियुतस्यापि, क्रियते गुरुणा स गच्छः ॥७१॥

(प्र.अ.) – '**वाया०**' इत्यादि, **बहुलब्धियुक्तस्यापि, भ्रष्टचारित्रस्यापि, वाङ्मात्रस्यापि गुरुणा** यत्र निग्रहो विधीयते **स गच्छः** ॥७१॥

---

१. 'तथा..........शक्नोति' इति पाठः A-संज्ञकप्रतौ नास्ति । २. 'उवेंतो' E-F-प्रते । ३. 'जाणयसिलेसा' E-प्रते, 'जाणयसिलेसो' C-प्रते, 'जाणगसिलेसो' F-H-प्रते, अत्र पुनः A-B-D-G-प्रतपाठः । ४. '०जुयस्सावी' H-प्रते ।

(द्वि.अ.) – '**वायामि०**' इत्यादि, **बहुलब्धियुक्तस्य, भ्रष्टचारित्रस्य वाङ्मात्रेणापि गुरुणा** यत्र गच्छे शिष्यस्य **निग्रहो** विधीयते **स गच्छः** ॥७१॥

**जत्थ य संनिहि-उक्खड-आहडमाईण नामगहणेऽवि ।**
**पूईकम्मा भीआ, आउत्ता कप्प-तिप्पेसु[1] ॥७२॥**

यत्र च सन्निध्युपस्कृत-आहृतादीनां नामग्रहणेऽपि ।
पूतिकर्मणः भीता आयुक्ताः कल्पत्रेपयोः ॥७२॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** गच्छे **संनिधिः** । **उक्खडे**त्यौद्देशिकं = साधूनुद्दिश्य गणनया कृतम्, च = पुनः, **अभ्याहृतम्, आदिशब्दादाधाकर्मक्रीतमिश्र-**जातादिसंग्रहः । इत्यादीनां दोषाणां संग्रहः । एतेषामपि **नामग्रहणे** साधवो भीता भवन्ति । **पूतिकर्मभीता** भवन्ति च । **कापत्रेपेषु उद्यताः**, 'कापत्रेप' इति साधुभाषा, एवंविधा साधवो यत्र भवन्ति स गच्छः ॥७२॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र संनिधिः** । **उक्खडम्** = औद्देशिकम् । **अभ्याहृतम्** इत्यादीनां दोषाणां **नामग्रहणेऽपि** साधवो भीता भवन्ति । **पूतिकर्मभीता** भवन्ति च । **कापत्रेपेषु उद्यताः**, 'कापत्रेप' इति साधुपरम्पराप्रसिद्धभाषादिविधिः । एवंविधा साधवो भवन्ति यत्र स गच्छः ॥७२॥

**मउए निहुअसहावे, हास-द्दवविवज्जिए विगहमुक्के ।**
**[2]असमंजसमकरंते, गोयरभूमऽट्ठ विहरंति[3] ॥७३॥**

मृदुका निभृतस्वभावा हास्यद्रवविवर्जिता विकथामुक्ताः ।
असमञ्जसमकुर्वन्तः गोचरभूम्यर्थं(गोचरभूम्यष्टकं)विहरन्ति ॥७३॥

(प्र.अ.) – '**मउए०**' इत्यादि, **मृदुकः** = सुकुमालस्वभावः, गंभीरचित्तः, **हास्यम्** = अन्येषामुपहसनरूपम् **द्रवः** = क्रीडारसः ताभ्यां **विवर्जितः** । च पुनः **विकथामुक्तः** । **असमञ्जसम्** = अन्यायमकुर्वन्तः, **गोचरभूमिकार्थं विहारं कुर्वन्ति** । एवंविधा यत्र साधवो भवन्ति स गच्छः ॥७३॥

---

१. '०तेप्पेसु' F-प्रते । २. 'असमंजसमकरिंते' A-आदिषु । ३. 'वियरंति' E-G-प्रतपाठः ।

(द्वि.अ.) – '**मउ०**' इत्यादि, **मृदुकः** = सुकुमालस्वभावो, गम्भीरस्वभावः, **हास्यं द्रवः** = क्रीडारसः, ताभ्यां **विवर्जितो, विकथामुक्तः । असमञ्जसम्** = साध्वनुचितम-**कुर्वन्तः, गोचरभूमिकां विहरन्तः** एवंविधा यत्र साधवः स गच्छः ॥७३॥

**मुणिणं नाणाभिग्गह-दुक्करपच्छित्तमणुचरंताणं ।**
**जायइ चित्तचमक्कं, देविंदाणं पि तं गच्छं ॥७४॥**

मुनीनां नानाभिग्रह-दुष्करप्रायश्चित्तमनुचरताम् ।
जायते चित्तचमत्कारो देवेन्द्राणामपि स गच्छः ॥७४॥

(प्र.अ.) – '**मुणिणं०**' इत्यादि, **मुनीनां नानाभिग्रहदुष्करप्रायश्चित्तमनुचरताम्** = कुर्वतां दृष्ट्वा **देवेन्द्राणामपि चित्ते चमत्कारो जायते स गच्छः** ॥७४॥

(द्वि.अ.) – '**मुणि०**' इत्यादि, **मुनीनां नानाभिग्रहदुष्करप्रायश्चित्तमनुचरतां** = कुर्वतां दृष्ट्वा **देवेन्द्राणामपि चित्ते चमत्कारो जायते** यत्र **स गच्छः** ॥७४॥

**अथ जीवरक्षादिद्वारेण गच्छस्वरूपमाह –**

**पुढवि-दग-अगणि-मारुअ-वाउ-वणस्सइ[1]-तसाण[2] विविहाणं[3] ।**
**मरणंतेऽवि न पीडा, कीरइ मणसा तयं गच्छं ॥७५॥**

पृथिव्युदका-ऽग्नि-मारुत-वायु-वनस्पति-त्रसानां विविधानाम् ।
मरणान्तेऽपि न पीडा क्रियते मनसा स गच्छः ॥७५॥

(प्र.अ.) – '**पुढवि०**' इत्यादि, **पृथ्वीदकाग्निमारुतवनस्पति**रूपानां जीवानां बहु-विचित्र**त्रसानां मनसापि मरणान्ते** रोगसंकटेऽपि विराधना **पीडा न क्रियते स गच्छः** ॥७५॥

(द्वि.अ.) – '**पुढ०**' इत्यादि, **पृथ्वीदकाग्निमरुद्वनस्पतित्रसानां विविधानां मनसाऽपि मरणान्ते पीडा न क्रियते स गच्छः** ॥७५॥

**खज्जूरिपत्तमुंजेण, जो पमज्जे उवस्सयं ।**
**नो दया तस्स जीवेसु, सम्मं जाणाहि, गोयमा ! ॥७६॥**

---

१. '०वणप्फई०' A-आदिषु । २. 'तह तसाण' D-E-F-आदिपाठः । ३. 'विविहजीवाणं' A-प्रते ।

खर्जूरीपत्रेन मुञ्जेन य उपाश्रयं प्रमार्जयति ।
न दया तस्य जीवेषु, सम्यग् जानीहि गौतम ! ॥७६॥

(प्र.अ.) – '**खज्जूर०**' इत्यादि, **खर्ज्जूरी**वृक्षस्य **पत्राणि**, तेषां पत्राणां सारवणकं प्रमार्जनकं निर्माप्य च पुन**र्मुंज**वृक्षस्य प्रमार्जनं निर्माप्य तैर्यः **उपाश्रयं प्रमार्जयति साधु**रिति तस्य हृदये जीवानामुपरि **दया** = कृपा **ना**स्ति । एतत् **सम्यक्** पूर्वं विजानीहि हे गौतम ! तस्य हृदये जीवदयाधर्मो न हि ॥७६॥

(द्वि.अ.) – '**खज्जूर०**' इत्यादि, **खर्जूरपत्रमुञ्ज**मयेन प्रमार्जनेन **यः साधुरुपाश्रयं प्रमार्जयति तस्य जीवेषु** = प्राणिषु **दया नास्ति** । हे **गौतम** ! तत् **सम्यग् जानीहि** ॥७६॥

**जत्थ य [1]बाहिर[2]पाणिअ-बिंदूमित्तंपि गिम्हमाईसु ।**
**तण्हासोसिअपाणा[3], मरणेऽवि मुणी न गिण्हंति ॥७७॥**

यत्र च बाह्यपानीयबिन्दुमात्रमपि ग्रीष्मादिषु ।
तृष्णाशोषितप्राणाः, मरणेऽपि मुनयो न गृह्णन्ति ॥७७॥

(प्र.अ.) – '**जत्थ०**' इत्यादि, **यत्र** स्थानके हे गौतम ! **बाह्यपानीयम्** = सचित्तनीरम् अप्रासुकं वारि **ग्रीष्म**कालेऽपि **तृषाशोषितप्राणा** मुनयो **बिन्दुमात्रमपि न गृह्णन्ती**ति गाथार्थः स्पष्ट इति, स गच्छः ॥७७॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र** = गच्छे **बाह्यपानीयं** = सचित्तं वारि ग्रीष्मादिषु विहरन्तो मुनय**स्तृष्णाशोषितप्राणाः** = तृष्णाशोषितवदनाः **मरणान्तेऽपि** बिन्दुमात्रं **न गृह्णन्ति** स गच्छः ॥७७॥

**इच्छिज्जइ जत्थ सया, बीयपएणावि फासुअं उदयं ।**
**आगमविहिणा निउणं, गोअम ! गच्छं तयं भणियं ॥७८॥**

इष्यते यत्र सदा द्वितीयपदेनापि प्रासुकमुदकम् ।
आगमविधिना निपुणं, गौतम ! गच्छः स भणितः ॥७८॥

---

१. 'बायर०' E-प्रते । २. '०पाणस्स बिंदुमि०' F-प्रते । ३. '०पाणे' F-प्रते ।

(प्र.अ.) – **'इच्छि०'** इत्यादि, **यत्र** = गच्छे **सदा** = निरन्तरं **द्वितीयपदे** = अपवादपदेऽपि **प्रासुकमेवोदकं** गृहीतुमिष्यते, **आगमोक्तविधिना निपुणं** यथा स्यात् तथा, हे **गौतम ! स** एव **गच्छ** [1]आश्रयतया **भणितः** ॥७८॥

(द्वि.अ.) – **'इच्छिय०'** इत्यादि, हे गौतम ! **यत्र** = गच्छे **सदा इष्यते द्वितीयपदेनापि** = अपवादपदेनापि **आगमोक्तविधिना** यथा स्यात्तथा **प्रासुकोदकं**, हे **गौतम ! स गच्छ** इति ॥७८॥

**जत्थ य सूल विसूइय अन्नयरे वा विचित्तमायंके ।**
**उप्पण्णे जलणुज्जालणाइ, [2]कीरइ न मुणि तयं गच्छं ॥७९॥**

यत्र च शूले विशूचिकायां अन्यतरस्मिन् वा विचित्रातङ्के ।
उत्पन्ने ज्वलनोज्ज्वालनादि, क्रियते न मुने ! स गच्छः ॥७९॥

(प्र.अ.) – **'जत्थ०'** इत्यादि, **यत्र** = गच्छे **शूले विशूचिकायां वा अन्यस्मिन् विचित्रातंके** = रोगोद्भवे सति यत्र **ज्वलनोज्ज्वालनम्** = अग्निप्रज्वालनं **न क्रियते स गच्छः** ॥७९॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र च शूले विशूचिकायां वा अन्यतरस्मिन् विचित्रे** = नानाविधे **आतंके उत्पन्ने** सति यत्र **ज्वलनोज्ज्वालनम्** = अग्निप्रज्वालनं **न क्रियते स गच्छः** ॥७९॥

(प्र.अ.) – **अथ कदाचित् काचिदग्निकार्ये उत्पन्ने कथं क्रियते ? तदाह** –

(द्वि.अ.) – **अग्निकार्यं कदाचिद् समुत्पन्नं भवति तदा –**

**बीयपएणं सारूविगाइ सड्ढाइमाइएहिं च ।**
**कारिंती जयणाए, गोयम ! गच्छं तयं भणियं ॥८०॥**

द्वितीयपदेन सारूपिकादि-श्राद्धादिआदिभिश्च ।
कारयन्ति यतनया, गौतम ! गच्छः स भणितः ॥८०॥

---

१. 'आश्रयः तया' इति A-प्रते । २. 'न करेइ, तं गच्छं' A-D-E-H-प्रतपाठः ।

(प्र.अ.) – '**बीअ०**' इत्यादि, **द्वितीये** = अपवाद**पदे**नापि यथागमविधिना **सारूपिकादिभिः श्राद्धादिभिर्यतनया** अग्निप्रज्ज्वालनं **कारापयति स गच्छः** । तत्र सारूपिकः कथम् ? मुण्डितोत्तमाङ्गः, शुक्लवाससां परिधायी, कछोटीमबध्नानः, आचार्यक(?अभार्यांको)भिक्षां हिण्डमानो हि सारूपिक उच्यते । ये तु शिखामुण्डितशिरसः सभार्यकास्ते सिद्धपुत्राः । त्यक्तलिङ्गचारित्रास्ते पश्चात्कृता इति त्यक्तवेषभेदाः ॥८०॥

(द्वि.अ.) – '**बीय०**' इत्यादि, **द्वितीयपदे सारूपिकादिभिः श्राद्धादिभिर्यतनया** अग्निप्रज्ज्वालनं **कारयन्ति स गच्छः** । **सारूपिकाः** = मुण्डितशिरसः, शुक्लवासः-परिधायिनः, अबद्धकच्छाः, आचार्यक(?अभार्यांको)भिक्षां हिण्डमानाः सारूपिका उच्यन्ते । यस्तु मुण्डितशिरः सशिखाको वा सभार्याकः स सिद्धपुत्रकः । सर्वथात्यक्तचारित्रगुणः स पश्चात्कृत इति व्यपदिश्यते ॥८०॥

**पुप्फाणं बीआणं, तयमाईणं च विविहदव्वाणं ।**
**संघट्टण-परिआवण, जत्थ न कुज्जा तयं गच्छं ॥८१॥**

पुष्पानां बीजानां, त्वगादीनां च विविधद्रव्याणाम् ।
सङ्घट्टनं परितापनं, यत्र न कुर्यात् स गच्छः ॥८१॥

(प्र.अ.) – '**पुप्फाणं०**' इत्यादि, **पुष्पाणां, बीजानां, त्वचादीनां च विविध**-सचित्त**द्रव्याणां संघट्टपरितापनादिकं यत्र न क्रियते स गच्छः** ॥८१॥

(द्वि.अ.) – '**पुप्फा०**' इत्यादि, **पुष्पाणां, बीजानां, त्वचादीनां च विविध**-सचित्त**द्रव्याणां संघट्टपरितापनादिकं यत्र न क्रियते स गच्छः** ॥८१॥

**हासं[1] खेड्डा कंदप्प, नाहियवायं न कीरए जत्थ ।**
**धावण डेवण लंघण-ममकाराऽवण्णउच्चरणं ॥८२॥**

हास्यं खेला कान्दर्पी नास्तिकवादो न क्रियते यत्र ।
धावनं डेपनं लङ्घनं ममकारः अवर्णोच्चारणम् ॥८२॥

(प्र.अ.) – '**हासं०**' इत्यादि, परजीवोपहसनरूप**हास्यम्**, क्रीडाम् = द्युतादिकाम्,

१. 'जइ हास खेड्डु कंदप्प नाहवायं' F-प्रते ।

**कंदर्पम्** = विषयस्याभिलाषरूपम्, **नाहियवायमिति** नास्तिकवादम् । यत उक्तम् - "दोषद्यां तेण कयाई जिअसत्तु, अंतिए पालगत्ति पट्ठविओ । केणवि पयोयणेणं नाहिआवाइ उ दुट्ठो ॥१॥" **धावनं, डेवनं** = उदयानम्, **लंघनं, ममकरो** = ममता ममीकारकरणं, **अवर्णोच्चारणम्** = अवर्णवादजल्पनं परापवादकथनं **न क्रियते** स गच्छः ॥८२॥

(द्वि.अ.) – **'हासं०'** इत्यादि, **हास्यं,** क्रीडां, **कंदर्पं, नाहियवादम्** = नास्तिकवादम् । उक्तं च - "दोषद्यां तेण कयाई अ जिअसत्तू अंतिए पालगत्ति पट्ठविओ । केणवि पयोयणेणं नाहियवादी उ दुट्ठो ॥" इति वचनात् । **धावनं, डेवनम्** = उदयानं, **लंघनं, ममकारो** = ममताकरणम्, **अवर्णोच्चारणम्** = अवर्णवादकथनम् ॥८२॥

**जत्थित्थीकरफरिसं, अंतरिअं कारणेऽवि उप्पन्ने ।**
**दिट्ठीविस-दित्तग्गी-विसं व वज्जिज्जए गच्छे ॥८३॥**

यत्र स्त्रीकरस्पर्शमन्तरितं कारणेऽपि उत्पन्ने
दृष्टिविष-दीप्ताग्नि-विषमिव वर्जयेत् गच्छे ॥८३॥

(प्र.अ.) – **'जत्थि०'** इत्यादि, **यत्र** = गच्छे 'इत्थी'ति **स्त्रीकरस्पर्शनम् अंतरितं** निरंतरितं वा **कारणे उत्पन्ने दृष्टिविषदीप्ताग्निहालाहलविषवद् वर्ज्यते** स **गच्छः** ॥८३॥

(द्वि.अ.) – **'जत्थि०'** इत्यादि, **दृष्टिविषदीप्ताग्निमिवांतरे कारणे उत्पन्नेऽपि यत्र स्त्रीकरस्पर्शं वर्जयेत्** स **गच्छः** ॥८३॥

**बालाए वुड्ढाए, नत्तुअ दुहिआइ अहव भइणीए ।**
**न य कीरइ तणुफरिसं, गोयम ! गच्छं तयं भणियं ॥८४॥**

बालाया वृद्धाया नप्तृकाया दुहिताया अथवा भगिन्याः ।
न च क्रियते तनुस्पर्शः, गौतम ! गच्छः स भणितः ॥८४॥

(प्र.अ.) – **'बाला०'** इत्यादि, यत्र **बालायाः** = पञ्चवर्षादारभ्य नववर्षं यावद् बालेत्युच्यते । **वृद्धायाः** = षष्टिसप्ततिवर्षायाः । **नप्तृकायाः दुहितृकायाश्च भगिन्या वा** सहोदराया वा **तनुस्पर्शो** = देहस्पर्शो **न क्रियते स गच्छः हे गौतम !** ॥८४॥

(द्वि.अ.) – **'बालाए०'** इत्यादि, **बालाया वृद्धाया नप्तृकाया दुहितृकाया वा भगिन्यास्तनुस्पर्शो न क्रियते हे गौतम ! स गच्छः** ॥८४॥

**किञ्च –**

**जत्थित्थीकरफरिसं, लिंगी अरिहावि सयमवि करिज्जा ।**
**तं निच्छयओ गोयम ! [१]जाणिज्जा मूलगुणभट्ठं ॥८५॥**

यत्र स्त्रीकरस्पर्शं लिङ्गी अर्होऽपि स्वयमपि (स्वयमेव) कुर्यात् ।
तं निश्चयतो गौतम ! जानीयात् मूलगुणभ्रष्टम् ॥८५॥

(प्र.अ.) – **'जत्थि०'** इत्यादि, **यत्र** = गच्छे **स्त्रीकरस्पर्शं लिंगीति** कोऽर्थः ? यतिवेषलिंगी, अथवा **अर्हन् स्वयमपि** = स्वशरीरेण **कुर्यात्, हे गौतम ! स गच्छः मूलगुणभ्रष्टं जानीहि** ॥८५॥

(द्वि.अ.) – **'जत्थि०'** इत्यादि, यत्र **लिंगी** साधुः **अर्हन्नपि स्वयं करस्पर्शं कुर्यात् हे गौतम ! तं गच्छं निश्चयतो मूलगुणभ्रष्टं जानीयादिति** ॥८५॥

**अथापवादमाह –**

**कीरइ बीयपएणं, सुत्तमभणिअं न जत्थ विहिणा उ ।**
**उप्पण्णे पुण कज्जे, दिक्खाआयंकमाईए ॥८६॥**

क्रियते द्वितीयपदेन सूत्राभणितं न यत्र विधिना तु ।
उत्पन्ने पुनः कार्ये दीक्षाऽऽतङ्कादिके ॥८६॥

(प्र.अ.) – **'कीरइ०'** इत्यादि, **यत्र** = गच्छे **द्वितीयपदा**पवादपदेनापि **सूत्रानुक्तम्** = आगमविरुद्धं **कार्ये** समुत्पन्ने चारित्ररक्षणार्थं **आतंकादिके विधिनापि न क्रियते** स गच्छः ॥८७॥

(द्वि.अ.) – **'कीरइ०'** इत्यादि, **यत्र** = गच्छे **द्वितीयपदेन** = अपवादपदेन **सूत्रानुक्तं कार्ये** समुत्पन्ने चारित्ररक्षणे **आंतकादिके विधिनापि न क्रियते** स गच्छः ॥८६॥

---

१. 'जाणेज्जा' D-E-F-G-H-प्रतेषु ।

**किञ्च –**

**मूलगुणेहिं विमुक्कं, बहुगुणकलियंपि लद्धिसंपन्नं ।**
**उत्तमकुलेऽवि जायं, निद्धाडिज्जइ, तयं गच्छं ॥८७॥**

मूलगुणैर्विमुक्तो, बहुगुणकलितोऽपि लब्धिसम्पन्नः ।
उत्तमकुलेऽपि जातो, निर्घाटयन्ति स गच्छः ॥८७॥

(प्र.अ.) – **'मूलगु०'** इत्यादि, **बहुगुणकलितं, बहुलब्धिसंपन्नमपि उत्तमकुले संजातम्,** एवंविधं **मूलगुण**भ्रष्टं सन्तं गुरुभि**र्निर्घाटीक्रियते** = तिरस्क्रियते **स गच्छः** ॥८७॥

(द्वि.अ.) – **'मूल०'** इत्यादि, **बहुगुणकलितं, लब्धिसंपन्नं, उत्तमकुलेऽपि जातं, मूलगुण**भ्रष्टं सन्तं **निर्घाटयन्ति** गुरवस्तं **गच्छं** जानीहि ॥८७॥

**जत्थ हिरण्ण-सुवण्णे, धण-धण्णे कंस-तंब-फलिहाणं ।**
**सयणाण आसणाण य, झुसिराणं चेव परिभोगो ॥८८॥**

**जत्थ य वारडिआणं, तत्तडिआणं च तहय परिभोगो ।**
**मुत्तुं सुक्किलवत्थं, का मेरा तत्थ गच्छम्मि ? ॥८९॥**

यत्र हिरण्यसुवर्णयो-र्धनधान्ययोः कांस्यताम्रस्फटिकानाम् ।
शयनानामासनानाञ्च, शुषिराणां चैव परिभोगः ॥८८॥

यत्र च रक्तवस्त्राणां, नीलपीतादिरङ्गितवस्त्राणाञ्च तथा च परिभोगः ।
मुक्त्वा शुक्लं वस्त्रं, का मर्यादा तत्र गच्छे ? ॥८९॥

(प्र.अ.) – **'जत्थ०'** इत्यादि, **यत्र** = गच्छे [१]**हिरण्यम्** = अघटित**सुवर्णम्,** घटितं **हेम** तयोः **धनं** = टंकादि, **धान्यम्** = गोधूमादि तयोः । **कांस्यम्** = कांस्यपात्रादि । **ताम्रम्** = लोहितवर्णम् । **स्फटिकम्** = रत्नजाति । तेषां **शयनानाम्, आसनानां, शुषिराणाम्** - सच्छिद्राणां **परिभोगः** क्रियते ॥८८॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र हिरण्यस्वर्णयोर्धनधान्ययोः, कांस्यताम्र-**

---

१. 'हरिण्यम्' इति **B-C**-प्रते ।

**स्फटिकानां, शयनानाम्, आसनानाम्, शुषिराणाम्** = सच्छिद्राणां **परिभोगः** ॥८८॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** = गच्छे **वारडिकानाम्** = रक्तरंगरञ्जितवस्त्राणां **तत्तडियाणं** = नीलपीतादिरंगितवस्त्राणां **परिभोगः क्रियते शुक्लवस्त्राणि मुक्त्वा, तत्र** हे गौतम ! **का मर्यादा ?** इति गाथार्थः ॥८९॥

(द्वि.अ.) – '**जत्थ य०**' इत्यादि, '**वारडियाणं**'ति रक्तवस्त्राणाम्, **तत्तडियाणम्** = नीलपीतादिरंगितवस्त्राणां मध्ये अन्यतरत् **शुक्लवस्त्रं मुक्त्वा परिभोगः** क्रियते **तत्र गच्छे का मर्यादा ?** ॥८९॥

**कांस्यताम्रादिभ्यः स्वर्णरूप्यं बह्वनर्थकारीत्यतस्तन्निषेधं दृढयन्नाह –**

**जत्थ हिरण्ण-सुवण्णं, हत्थेण पराणगं पि नो छिप्पे ।**
**कारणसमप्पियंपि हु निमिसखणद्धंपि, तं गच्छं ॥९०॥**

यत्र हिरण्यसुवर्णे हस्तेन परकीयेऽपि न स्पृशेत् ।
कारणसमर्पितेऽपि हु निमेषक्षणार्धं स गच्छः ॥९०॥

(प्र.अ.) – '**जत्थ य०**' **यत्र हिरण्यसुवर्णं हस्तेन पारकीनमपि न छिप्यते** = न गृह्यते स्पर्शेन कारणेनापि **स गच्छः । निमिषम्** = मेषोन्मेषं यावद् **क्षणार्धमपि** ॥९०॥

(द्वि.अ.) – '**जत्थ हि०**' इत्यादि, **यत्र परकीयमपि हिरण्यस्वर्णं** कारणे समुत्पन्नेऽपि **हस्तेन** साधुर्न स्पृशेत् **स गच्छः** ॥९०॥

**अथाऽऽर्यिकाद्वारेण[1] गणस्वरूपमाह –**

**जत्थ य अज्जालद्धं, पडिग्गहमाईवि विविहमुवगरणं ।**
**परिभुंजइ साहूहिं, तं गोयम ! केरिसं गच्छं ? ॥९१॥**

यत्र चाऽऽर्यालब्धं, पतद्ग्रहाद्यपि विविधमुपकरणम् ।
परिभुज्यते साधुभिः स गौतम ! कीदृशो गच्छः ? ॥९१॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** = गच्छे **आर्या** = साध्वी, तया **लब्धम्**

---

१. 'अथाऽऽर्यकाद्वारेण' इति **पूर्वमुद्रिते**, अत्र A-आदिप्रतपाठः ।

= प्राप्तम् **पतद्ग्रहादिकं विविधमुपकरणं साधुभिः परिभुज्यते** । हे **गौतम ! स कीदृशो गच्छः** ? न किञ्चिदिति गाथार्थः ॥९१॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र** = गच्छे **आर्यालब्धम्** = साध्वीप्राप्तं **पतद्-ग्रहादिकं विविधमुपकरणं साधुभिः परिभुज्यते** । हे **गौतम ! स कीदृशो गच्छो ?** न किञ्चिदिति ॥९१॥

**किञ्च –**

**अइदुल्लहभेसज्जं, बलबुद्धिविवड्डणंपि पुट्ठिकरं ।**
**अज्जालद्धं भुंजइ, का मेरा तत्थ गच्छम्मि ? ॥९२॥**

अतिदुर्लभभैषज्यं, बलबुद्धिविवर्धनमपि पुष्टिकरम् ।
आर्यालब्धं भुज्यते, का मेरा तत्र गच्छे ? ॥९२॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** = गच्छे हे गौतम ! एवंविध**मतिदुर्लभ**मपि **भेषजम्** = औषधं साध्वीप्राप्तम् = **आर्यालब्धमुपभुज्यते** = सेव्यते । भेषजं किम्भूतम् ? **बलम्** = तेजो देहस्य, **बुद्धिः** = प्रज्ञा तयो**र्विवर्धनम्** = विवर्धिकरम्, अत एव **पुष्टिकरं** देहस्य, ईदृग्विधमार्यानीतम् = आर्याप्राप्तमुपभुज्यते, **तत्र गच्छे का मेरे**ति = मर्यादेति सम्बन्धः ॥९२॥

(द्वि.अ.) – '**अइ०**' इत्यादि, यत्र **बलबुद्धिविवर्धनं पुष्टिकरम् अतिदुर्लभमपि भेषजम् आर्याप्रा**प्तं **भुज्यते** साधुभिः **तत्र गच्छे का मर्यादा ?** ॥९२॥

**एगो एगित्थिए सद्धिं, जत्थ चिट्ठिज्ज गोयमा ! ।**
**संजइए विसेसेण, निम्मेरं तं तु भासिमो ॥९३॥**

एक एकाकिस्त्रिया सार्धं यत्र तिष्ठेत् गौतम ! ।
संयत्या विशेषेण, निर्मेरं तं तु भाषामहे ॥९३॥

(प्र.अ.) – '**एगो०**' इत्यादि, एकः साधुः द्रव्यभावापेक्षयाऽत्र चतुर्भंगी । तत्र एको द्रव्यतो न भावतः, एको भावतो न द्रव्यतः, तृतीयो न भावतो न द्रव्यतः, चतुर्थो भावतो द्रव्यतोऽपि । द्वितीयतृतीयभङ्गौ (द्वितीय-चतुर्थभङ्गौ ?) शुद्धौ । द्रव्येनैकोऽसहायः

भावतोऽप्येको रागादिविवर्जित इति, **एकः स्त्रिया सार्धं यत्र तिष्ठेत्** । एकाकिन्याः **संयत्याः** सार्धं यत्र विशेषेण तिष्ठेत् । **तं** गच्छं हे गौतम ! **निर्मर्यादं भाषामहे** = कथयिष्यामः ॥९३॥

(द्वि.अ.) – **'एगो०'** इत्यादि, **एकः** साधुरे**काकिन्या स्त्रिया सार्धं यत्र तिष्ठेत्,** एकाकिन्या **संयत्या** सार्धं यत्र **विशेषेण** तिष्ठेत् **तं गच्छं** हे **गौतम ! निर्मर्यादं भाषयामः** = कथयामो वयमिति तीर्थंकरगणधराः प्राहुः ॥९३॥

**दढचारित्तं मुत्तं, आइज्जं मयहरं च गुणरासिं ।**
**[१]इक्को [२]अज्झावेई, तमणायारं, न तं गच्छं ॥९४॥**

दृढचारित्रां मुक्तां आदेयां महत्तरां च गुणराशिम् ।
एकाकी अध्यापयति, सोऽनाचारः, न स गच्छः ॥९४॥

(प्र.अ.) – **'दढचा०'** इत्यादि, **एकः साधुर्दृढचारित्रां, मुक्ताम्** = निर्लोभां निःस्पृहां निरीहाम्, **आदेयाम्** = सर्वग्राह्यवचनाम् एवंविधां **महत्तरां गुणराशिम्** एकाकिनीं साध्वी**मध्यापयति** । तं गच्छं हे गौतम ! **अनाचार**वन्तं जानीहि ॥९४॥

(द्वि.अ.) – **'दढचा०'** इत्यादि, **एकः** साधुर्यत्र = गच्छे **दृढचारित्रां, मुक्ताम्** = निर्लोभिनीं निःस्पृहाम्, **आदेयाम्** = आदेयवचनाम्, सर्वत्रग्राह्याम् = सर्वत्राग्रेसरणीमित्यर्थः । 'आरियं'ति पाठे **आर्याम्** = पूज्याम्, **महत्तराम्** = उपाध्यायपदवर्त्तिनीम् । अत एव **गुणराशिम्** । एवंविधामेकाकिनीं साध्वी**मध्यापयति** उपाध्यायादिः । **तमनाचारं** जानीहि हे शिष्य ! इत्यवधार्यम्, न तु गच्छम् ॥९४॥

**घणगज्जिय[३]-हयकुहए-विज्जूदुग्गिज्झगूढहिययाओ ।**
**अज्जा अवारिआओ, इत्थीरज्जं, न तं गच्छं ॥९५॥**

**जत्थ समुद्देसकाले, साहूणं मंडलीइ अज्जाओ ।**
**गोअम ! ठवंति पाए, इत्थीरज्जं, न तं गच्छं ॥९६॥**

---

१. 'एक्को' **H**-प्रते । २. 'अज्जावेई' **पूर्वमुद्रिते** । ३. 'य-कुहय-विज्जू गोयमा ! संजईम वि दुगिज्झ०' इति **E**-प्रते ।

घनगर्जितहयकुहकविद्युद्दुर्ग्राह्यगूढहृदया: ।
आर्या अवारिता:, स्त्रीराज्यं, न स गच्छ: ॥९५॥

यत्र समुद्देशकाले साधूनां मण्डल्यां आर्या: ।
गौतम ! स्थापयन्ति पादौ स्त्रीराज्यं न स गच्छ: ॥९६॥

(प्र.अ.) – '**घणग०**' इत्यादि, **यत्र** = गच्छे **अवारिता:** = स्वेच्छाचारिण्य: आर्या: **घनगर्जितं** कुर्वन्ति, **हयकुहकं** कुर्वन्ति = अश्ववत् कुहकं शब्दं कुर्वन्ति । आर्या किम्भूता ? **विद्युद्**ग्रहणशिक्या = तडिद्वद् **दुर्ग्राह्या, गूढहृदया** = गूढगुप्तचारित्रा एवंविधा यत्रार्या भवन्ति तत् **स्त्रीराज्यम्** ॥९५॥

(द्वि.अ.) – '**घणग०**' **यत्रावारिता** गुर्वादिना स्वेच्छाचारिण्य: **आर्या विद्युत्** = तडिदिव **दुर्ग्राह्याश्च गूढहृदयाश्च** मूढहृदया वा दुर्ग्राह्यगूढहृदया: साध्व्य: घनगर्जनादि कुर्वन्ति । तत्र **घनगर्जितम्** = मेघवद्गर्जितं कुर्वन्ति मुखविकारेण । तथा **हयकुहकम्** = अश्ववद् कुहकशब्दं यथाऽश्वो मार्गे चलयन् शब्दायते एवं शब्दकरणं हयकुहकमुच्यते, तदेवं यत्र गच्छे साध्वीभि: क्रियते तत् **स्त्रीराज्यं** परं **स गच्छो नेति** ॥९५॥

(प्र.अ.) – '**जत्थ०**' इत्यादि, **यत्र** = गच्छे **समुद्देशकाले** भोजन**मण्डल्यां** = साधुभोजनकाले साध्व्य: **पादौ स्थापयन्ति** = मण्डल्यां समागच्छन्तीत्यर्थ: । हे गौतम ! तत् **स्त्रीराज्यं न गच्छ:** ॥९६॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र** समुद्देशकालो = **साधूनां** भोजन**मण्डलिकं** समुद्देशमुच्यते तत्रार्या: **पादौ स्थापयन्ति** = तदवसरे आर्या: प्रविशन्ति । हे **गौतम ! तत् स्त्रीराज्यं न गच्छ:** ॥९६॥

**अथ सन्मुनिसद्गुणप्ररूपणेन सद्गणस्वरूपमाह –**

**जत्थ मुणीण कसाया, जगडिज्जंता वि परकसाएहिं ।**
**नेच्छंति समुट्ठेउं, सुनिविट्ठो पंगुलो चेव ॥९७॥**

**धम्मंतरायभीए, भीए संसारगब्भवसहीणं ।**
**न उईरंति कसाए, मुणी मुणीणं तयं गच्छं ॥९८॥**

**कारणमकारणेणं, अह कहवि मुणीण उट्ठहि कसाए ।**
**उदएवि जत्थ रुंभहि, खामिज्जइ जत्थ तं गच्छं ॥९९॥**

यत्र मुनीनां कषायाः दीप्यमाना अपि परकषायैः ।
नेच्छन्ति समुत्थातुं सुनिविष्टः पंगुलश्चैव ॥९७॥

धर्मान्तरायभीताः भीताः संसारगर्भवसतिभ्यः ।
नोदीरयन्ति कषायान् मुनयः मुनीनां स गच्छः ॥९८॥

कारणेन अकारणेनाथ कथमपि मुनीनां उत्तिष्ठन्ति कषायाः ।
उदयेऽपि यत्र रुध्यन्ते क्षाम्यन्ते यत्र स गच्छः ॥९९॥

(प्र.अ.) – **'जत्थ य०'** इत्यादि, **यत्र** = गच्छे **मुनीनां कषायाः परकषायैः** दीप्यमाना अपि **उत्थातुं न इच्छन्ति** । (अत्र) दृष्टान्तमाह - **सुनिविष्टपंगु**र्यथोत्थातुं न शक्नोति तद्वत् ॥९७॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र** = गच्छे **मुनीनां कषायाः परकषायै**रपि दीप्यमाना **उत्थातुं न इच्छन्ति सुनिविष्टपंगु**र्यथोत्थातुं न शक्नोति ॥९७॥

(प्र.अ.) – **'धम्मं०'** इत्यादि, **धर्मान्तरायभीताः** = धर्मविघ्नभयभ्रान्ताः । संसर्यते यत्र संसारः, स एव गर्भः, तत्र **वसतिभ्यो भीताः** । एवंविधा मुनयो अन्य**मुनीनां कषायान्** = क्रोधादीन् **नोदीरयन्ति** । हे गौतम ! **स गच्छः** ॥९८॥

(द्वि.अ.) – **'धम्मं०'** इत्यादि, **धर्मान्तरायभीताः, संसारगर्भवसतिभ्यो भीता** एवंविधा **मुनयः मुनीनां कषायान्** यत्र **नोदीरयन्ति स गच्छः** ॥९८॥

(प्र.अ.) – **'कार०'** इत्यादि, **कारणे** निष्कारणे वा । **अथवा कथमपि मुनीनां कषाया उत्पद्यन्ते** । उत्पन्नाश्च **रुध्यन्ते क्षाम्यन्ते** च **यत्र गच्छे स गच्छः** ॥९९॥

(द्वि.अ.) – **'कार०'** इत्यादि, **कारणे** निष्कारणे वा । **अथवा कथमपि मुनीनां कषाया उत्पद्यन्ते** । उत्पन्नाश्च **रुध्यन्ते क्षाम्यन्ते** च **यत्र स गच्छः** ॥९९॥

**सील-तव-दाण-भावण-चउविहधम्मंतरायभयभीए ।**
**जत्थ बहू गीयत्थे, गोयम ! गच्छं तयं भणिअं ॥१००॥**

शीलतपोदानभावनाचतुर्विधधर्मान्तरायभयभीताः ।
यत्र बहवो गीतार्था गौतम ! गच्छः स भणितः ॥१००॥

(प्र.अ.) – '**सील०**' इत्यादि, **शीलतपोदानभावनारूपचतुर्विधधर्मांतराय** = धर्म-विघ्न**भयभीता यत्र** = गच्छे एवंविधा **बहवो गीतार्था** सन्ति **स गच्छः** ॥१००॥

(द्वि.अ.) – '**सील०**' इत्यादि, **शीलतपोदानभावनारूपचतुर्विधधर्मांतरायभय-भीताः । यत्र** एवंविधा **बहवो गीतार्था** वर्त्तन्ते **स गच्छः** ॥१००॥

**उक्तमुत्तमगणस्वरूपम्, अथाधमाधमगणस्वरूपमाह –**

**जत्थ य गोयम ! पंचण्ह, कहवि सूणाण इक्कमवि हुज्जा ।**
**तं गच्छं तिविहेणं, वोसिरिअ वइज्ज अन्नत्थ ॥१०१॥**

यत्र च गौतम ! पञ्चानां, कथमपि सूनानामेकमपि भवेत् ।
तं गच्छं त्रिविधेन, व्युत्सृज्य व्रजेदन्यत्र ॥१०१॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र पञ्चानां शूनानां** मध्ये **एकोऽपि शूनाघाटको भवेत् । तं गच्छं त्रिविधेन व्युत्सृज्य** = त्यक्त्वा **अन्यत्र** गच्छेत् । तद्यथा - (१) खंडणी (२) पेषणी (३) चुल्ही (४) जलकुम्भी (५) प्रमार्जनी पञ्च शूना ।

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र पञ्चानां शूनानां** मध्ये **एकोऽपि भवेत् । तं गच्छं त्रिविधेन व्युत्सृज्य** = त्यक्त्वा **अन्यत्र** गच्छेत् । तत्र घरट्टिका (१) उदूखल (२) चूल्ही (३) पानीयगृहम् (४) प्रमार्जनिका (५) रूपा पञ्च शूना । अथ उक्तं च **शुकसंवादे** - कंडनी पेषनी चुल्हीत्यादि ॥१०१॥

**सूणारंभपवत्तं, गच्छं वेसुज्जलं [1]न सेविज्जा ।**
**जं चारित्तगुणेहिं तु उज्जलं तं तु सेविज्जा ॥१०२॥**

सूनारम्भप्रवृत्तं, गच्छं वेषोज्ज्वलं न सेवेत ।
यश्चारित्रगुणैः तूज्ज्वलस्तं तु सेवेत ॥१०२॥

(प्र.अ.) – '**सूणा०**' इत्यादि, **सूनारम्भप्रवृत्तं, वेषेणोज्ज्वलमेवंविधं गच्छं न**

---

१. 'न वासिज्जा' E-F-G-प्रते ।

**सेवेत** । **तुः** = पुनर्यो गच्छश्चारित्रगुणैरुज्ज्वलस्तं **गच्छं सेवेत** मतिमान् ॥१०२॥

(द्वि.अ.) – **'सूणा०'** इत्यादि, **सूनारंभप्रवृत्तं, वेषेणोज्ज्वलम्** एवंविधं **गच्छं न सेवेत, पुनर्यो गच्छश्चारित्रगुणैरुज्ज्वलस्तं सेवेत** ॥१०२॥

**जत्थ य मुणिणो कयविक्कयाइं कुव्वंति [1]संजमब्भट्ठा ।**
**तं गच्छं गुणसायर ! विसं व [2]दूरं परिहरिज्जा ॥१०३॥**

यत्र च मुनयः क्रयविक्रयादि कुर्वन्ति संयमभ्रष्टाः ।
तं गच्छं गुणसागर ! विषमिव दूरतः परिहरेत् ॥१०३॥

(प्र.अ.) – **'जत्थ य०'** इत्यादि, **यत्र** = गच्छे **मुनयो क्रयविक्रयाणि कुर्वन्ति,** नित्यं **संयमः** = सप्तदशविधः ततो **भ्रष्टाः** सन्तः कुर्वन्ति । हे **गुणसागर !** = हे गुणसमुद्र ! हे गुणनिधान ! हे गुणज्ञाता ! **तं गच्छं विषमिव दूरं** यथा स्यात् तथा **परिहरेत्** साधुः ॥१०३॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र मुनयः क्रयविक्रयाणि कुर्वन्ति** संयमभ्रष्टाः सन्तः । हे **गुणसागर ! तं गच्छं विषमिव दूरं परिहरेत्** ॥१०३॥

**आरंभेसु पसत्ता, सिद्धंतपरंमुहा विसयगिद्धा ।**
**मुत्तुं मुणिणो गोयम ! वसिज्ज मज्झे सुविहियाणं ॥१०४॥**

आरम्भेषु प्रसक्ताः सिद्धान्तपराङ्मुखा विषयगृद्धाः ।
मुक्त्वा मुनीन् गौतम ! वसेत् मध्ये सुविहितानाम् ॥१०४॥

(प्र.अ.) – **'आरं०'** इत्यादि, **आरम्भेषु प्रसक्ताः, सिद्धान्तपराङ्मुखाः, विषयगृद्धाः** एवंविधान् **मुनीन् मुक्त्वा सुविहितानां मध्ये वसेत्** = वासं कुर्यादिति गाथार्थः ॥१०४॥

(द्वि.अ.) – **'आरं०'** इत्यादि, ये **आरम्भेषु प्रसक्ताः, सिद्धान्तपराङ्मुखाः, विषयगृद्धाः** = विषयासक्ताः, एवंविधान् **मुनीन् मुक्त्वा सुविहितानां मध्ये वसेत्** = वासं कुर्यात् ॥१०४॥

---

१. 'संजमुब्भट्ठा' H-प्रते । २. 'दूरे' E-प्रते ।

**तम्हा सम्मं निहालेउं, गच्छं सम्मग्गपट्ठियं ।**
**वसिज्जा पक्ख मासं वा, जावज्जीवं तु गोयमा ! ॥१०५॥**

तस्मात्सम्यग् निभाल्य, गच्छं सन्मार्गप्रस्थितम् ।
वसेत पक्षं मासं वा, यावज्जीवं तु गौतम ! ॥१०५॥

(प्र.अ.) – '**तम्हा०**' इत्यादि, **तस्मात् सम्यग् निभाल्य** = विलोक्य **सन्मार्गप्रस्थितं गच्छं** प्रति **पक्षं मासं यावज्जीवं वा** सेवेत ॥१०५॥

(द्वि.अ.) – '**तम्हा०**' इत्यादि, **तस्मात् सम्यग् निभाल्य** = सत्यं विचार्य **सन्मार्गप्रस्थितं गच्छं पक्षं मासं वा यावज्जीवं वा** सेवेत ॥१०५॥

**खुड्डो[1] वा अहवा सेहो, जत्थ रक्खे उवस्सयं ।**
**तरुणो वा जत्थ एगागी, का मेरा तत्थ भासिमो ? ॥१०६॥**

क्षुल्लो वाऽथवा शैक्षो यत्र रक्षेत् उपाश्रयम् ।
तरुणो वा यत्र एकाकी का मर्यादा तत्र भाषामहे ? ॥१०६॥

(प्र.अ.) – '**खुड्डो वा०**' इत्यादि, **यत्र** = गच्छे **क्षुल्लोऽथवा** नवदीक्षितः साधु**रुपाश्रयं रक्षते** (रक्षेत्), **एकाकी तरुणः** साधुर्यत्रोपाश्रयं[2] रक्षेत्, तत्र **का मर्यादेति** वयं **भाषामहे** ॥१०६॥

(द्वि.अ.) – '**खुड्डो०**' इत्यादि, **यत्र क्षुल्लोऽथवा** नवप्रव्रजितो विनेय एकाकी **उपाश्रयं रक्षेत्, एकाकी तरुणः** साधुर्यत्रोपाश्रयं रक्षेत्, तत्र का **मर्यादा** इति वयं **भाषामहे** ॥१०६॥

**जत्थ य एगा खुड्डी, एगा तरुणी उ रक्खए वसहिं ।**
**गोयम ! तत्थ विहारे, का सुद्धी बंभचेरस्स ? ॥१०७॥**

यत्र चैकाकिनी क्षुल्लिका एकाकिनी तरुणी तु रक्षति वसतिम् ।
गौतम ! तत्र विहारे, का शुद्धिः ब्रह्मचर्यस्य ? ॥१०७॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्रैका क्षुल्ला एकाकी तरुणी** चोपाश्रयं **रक्षति,**

---

१. 'खुड्डो वुड्ढो तहा सेहो' इति D-E-F-H-प्रते । २. 'उपाश्रयो' इति B-प्रते ।

**गौतम ! तत्र विहारे ब्रह्मचर्यस्य का शुद्धिः ?** अपि तु न काऽपीत्यर्थः ॥१०७॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र चैका क्षुल्ला एकाकी तरुणी** चोपाश्रयं **रक्षति, हे गौतम ! तत्र विहारे ब्रह्मचर्यस्य का शुद्धिः ?** अपि तु न काऽपीत्यर्थः ॥१०७॥

**जत्थ य उवस्सयाओ, [१]बाहिं गच्छे दुहत्थमित्तंपि ।**
**एगा रत्तिं समणी, का मेरा तत्थ गच्छस्स ? ॥१०८॥**

यत्र चोपाश्रयात् बहिर्गच्छेद् द्विहस्तमात्रामपि ।
एकाकिनी रात्रौ श्रमणी, का मर्यादा तत्र गच्छस्य ? ॥१०८॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्रोपाश्रयाद् बहिरेकाकिनी रात्रौ श्रमणी द्विहस्तमात्रामपि** भूमिं **गच्छेत्,** तत्र का मर्यादा ? मर्यादारहितः स गच्छः श्रेष्ठो न हि ॥१०८॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्रोपाश्रयाद् बहिरेकाकिनी रात्रौ श्रमणी द्विहस्तमात्रामपि** भूमिं **गच्छेत्, तत्र** गच्छे **का मर्यादा ?** ॥१०८॥

**जत्थ य एगा समणी, एगो समणो य जंपए [२]सोम ! ।**
**नियबंधुणा वि सद्धिं, तं गच्छं गच्छगुणहीणं ॥१०९॥**

यत्र च एकाकिनी श्रमणी एकाकी साधुश्च जल्पते सौम्य ! ।
निजबन्धुनापि सार्द्धं, तं गच्छं गच्छगुणहीनम् ॥१०९॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्रैकाकिनी श्रमणी** एकाकिना **निजबन्धु**साधुनाऽपि **सार्धं** हे **सौम्य**वदनेति गुरुवाक्यं (जल्पति), **तं गच्छं गच्छगुणहीनम्** = गच्छगुणविमुक्तं जानीहि ॥१०९॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्रैकाकिनी श्रमणी** एकाकिना **निजबन्धुनाऽपि सार्धं जल्पति** । अथवा एकाकी साधुर्निजभगिन्याऽपि सार्धं जल्पति । **हे सौम्य ! तं गच्छं गुणहीनं** जानीहि ॥१०९॥

---

१. 'राइं' **A-D**-प्रते । २. 'सोम्म' **D-G**-प्रते ।

**जत्थ जयार-मयारं, समणी जंपइ गिहत्थपच्चक्खं ।**
**पच्चक्खं संसारे, अज्जा पक्खिवइ अप्पाणं ॥११०॥**

यत्र जकारमकारं, श्रमणी जल्पति गृहस्थप्रत्यक्षम् ।
प्रत्यक्षं संसारे, आर्या प्रक्षिपति आत्मानम् ॥११०॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, यत्र = गच्छे हे गौतम ! **श्रमणी** साध्वीति कथ्यमाना, गृहे तिष्ठतीति **गृहस्थास्तेषां प्रत्यक्षम्** = तेषां समक्षम् गृहस्थराटि**श्चकाररूपा जल्पति** । सा आर्या **प्रत्यक्षं** निजात्**मानम्** = निजजीवं **संसारे** = भवे **क्षिपति** ॥११०॥

(द्वि.अ.) – 'जत्थ०' इत्यादि, **यत्र यकारमकारं श्रमणी गृहस्थप्रत्यक्षं जल्पति,** हे गौतम ! **साऽऽर्याऽऽत्मानं संसारे क्षिपति प्रत्यक्षम्** ॥११०॥

**जत्थ य गिहत्थभासाहिं[1], भासए अज्जिआ सुरुट्ठावि ।**
**तं गच्छं गुणसायर ! समणगुणविवज्जियं जाण ॥१११॥**

यत्र च गृहस्थभाषाभिः भाषते आर्या सुरुष्टाऽपि ।
तं गच्छं गुणसागर ! श्रमणगुणविवर्जितं जानीहि ॥१११॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** = गच्छे **आर्या सुरुष्टा** = क्रोधवती सती अन्यार्यां प्रति **गृहस्थभाषाभिर्भाषते** = जल्पते, **अपि** निश्चयेन **गुणसागर !** = गुणसमुद्र ! **तं गच्छं श्रमणगुणविवर्जितं** = भ्रष्टं **जानीहि** ॥१११॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **सुरुष्टाऽप्यार्या यत्र गृहस्थभाषाभिः भाषते,** हे **गुणसागर ! तं गच्छं गुणविवर्जितं जानीहि** ॥१११॥

**गणिगोअम ! जा उचिअं, सेयं वत्थं विवज्जिउं ।**
**सेवए चित्तरुवाणि, न सा अज्जा वियाहिया ॥११२॥**

गणिन् गौतम ! या उचितं श्वेतवस्त्रं विवर्ज्य ।
सेवते चित्ररूपाणि, न सा आर्या व्याहृता ॥११२॥

---

१. 'भासाइ भा०' D-G-प्रते ।

(प्र.अ.) – '**गणि०**' इत्यादि, हे **गौतम ! या** आर्या **श्वेतवस्त्रं निवार्य** = परिहार्य सति योगे वा अन्यानि वस्त्राणि विचित्राणि = नीलपीतादिरंगरंजितानि वस्त्राणि **सेवते** = उपभुज्यते स गच्छो न कथ्यते । च पुनर**र्या सा** साध्वी नोच्यते ॥११२॥

(द्वि.अ.) – '**गणि०**' इत्यादि, हे **गौतमगणि ! या** आर्या **श्वेतं वस्त्रं निवार्य चित्ररूपाणि** = विचित्ररंगानि वस्त्राणि **सेवते, सा आर्या न व्याहृता** ॥११२॥

**सीवणं तुन्नणं भरणं, गिहत्थाणं तु जा करे ।**
**तिल्लउव्वट्टणं वा वि, अप्पणो य परस्स य ॥११३॥**

सीवनं तुन्नं भरणं, गृहस्थानां तु या करोति ।
तैलोद्वर्तनं वापि, आत्मनोऽपरस्य च ॥११३॥

(प्र.अ.) – '**सीवणं०**' इत्यादि, सीव्यते इति **सीवनम्,** कुपस्थलिका-तस्पाटिका-कुंचलीकादीनाम् । **तुननं** प्रसिद्धम् । **भरणम्** = कुंचलिकादीनां स्वच्छवस्त्राणां मुखपोतिकादीनां भरणं वा, एतद् कर्म **गृहस्थानां या** आर्या **करोति, तेलोद्वर्त्तनं चापि** लोकाना**मात्मनश्च** या करोति, सा आर्या न कथ्यते ॥११३॥

(द्वि.अ.) – '**सीव०**' इत्यादि, **या** आर्या **गृहस्थानां सीवनं, तुननं, भरणं** वस्त्रादीनां **करोति, तेलोद्वर्त्तनं चापि आत्मनः परस्य च** करोति । सा आर्या नोच्यते ॥११३॥

**गच्छइ सविलासगई, सयणीअं तूलिअं सबिब्बोअं ।**
**उव्वट्टेइ सरीरं, सिणाणमाईणि जा कुणइ ॥११४॥**

गच्छति सविलासगतिः शयनीयं तूलिकां च सबिब्बोकम् ।
उद्वर्त्तयति शरीरं स्नानादीनि या करोति ॥११४॥

(प्र.अ.) – '**गच्छइ०**' इत्यादि, या आर्या **सविलासा गतिः** - सविभ्रमा गतिस्तया **गच्छति** = व्रजति । कथम् ? **सबिब्बोकम्** = हावभावसहितम्, हावो मुखविकारः स्याद्, भावः चित्तसमुद्भवः, विलासो नेत्रजो ज्ञेयः, हावभावसहितं यथा स्यात् तथा कुरुते । च पुनः **तूलिकां** करोति, रुतपूरितां गुसदवरिकादिकं प्रस्तारयति । **स्वशरीर-**

**मुद्वर्त्तयति** = तैलादिना अभ्यंगयति । **स्नानादीनि** करोति ॥११४॥

(द्वि.अ.) – **'गच्छ०'** इत्यादि, या **सविलासगतिर्गच्छति** । कथम् ? **सबिब्बोकं** यथा स्यात् तथा, तत्र बिब्बोकः = हावभावादिविकारः । तथा **तूलिकां** शयनार्थं मयूर-पिच्छादीनां करोति । गुप्तदवरिकादिकं प्रस्तारयति । तथा **शरीरमुद्वर्त्तयति** = तैलादिना अभ्यंगयति । **स्नानादीनि** साधुजनानुचितानि **करोति** । अनाचीर्णत्वाच्छेषानाचीर्णोपलक्षण-मिदम् ॥११४॥

**गेहेसु गिहत्थाणं, गंतूण कहा कहेइ काहीया ।**
**तरुणाइ अहिवडंते, अणुजाणे[1] साइ पडिणीया ॥११५॥**

गृहेषु गृहस्थानां गत्वा कथां कथयति काथिका ।
तरुणादीन् अभिपततः अनुजानाति सा प्रत्यनीका ॥११५॥

(प्र.अ.) – **'गेहे०'** इत्यादि, **गृहेषु गत्वा** धर्मकथाम् = प्रतिबोधरूपां **कथयति काथिका । तरुणादीन् अभिपततो अनुजानाति । सा** = आर्या गच्छ**प्रत्यनीका** भवति ॥११५॥

(द्वि.अ.) – **'गेहे०'** इत्यादि, तथा **गृहस्थानां गृहे** या आर्या धर्मकथां **कथयति काथिका** आहाराद्यर्थं तेषामावर्जनाय, **सा** = आर्या गच्छ**प्रत्यनीका** ज्ञातव्या ॥११५॥

**किञ्च –**

**वुड्ढाणं तरुणाणं, रत्तिं अज्जा कहेइ जा धम्मं ।**
**सा गणिणी गुणसायर ! पडिणीआ होइ गच्छस्स ॥११६॥**

वृद्धानां तरुणानां रात्रौ आर्या कथयति या धर्मं ।
सा गणिनी गुणसागर ! प्रत्यनीका भवति गच्छस्य ॥११६॥

(प्र.अ.) – **'वुड्ढा०'** इत्यादि, **वृद्धानां, तरुणानाम्** = द्वात्रिंशद्वार्षिकीयानां पुरतः या **आर्या** धर्मकथां **कथयति** । हे गौतम ! हे **गुणसागर ! सा गणिनी** मुख्या साध्वी गच्छ**प्रत्यनीका** वर्त्तते ॥११६॥

---

१. 'जाणे जा उ सा पडणी' **A-D-G**-प्रते ।

(द्वि.अ.) – '**वुड्ढा०**' इत्यादि, **वृद्धानां**, **तरुणानां** पुरुषाणामग्रे **रात्रौ याऽऽर्या** धर्मकथां **कथयति**, हे **गुणसागर** ! गौतम ! **सा गणिनी** = मुख्यसाध्वी गच्छ**प्रत्यनीका भवति** ॥११६॥

**जत्थ य समणीण-मसंखडाइं गच्छंमि नेव जायंति ।**
**तं गच्छं गच्छवरं, गिहत्थभासाउ नो जत्थ ॥११७॥**

यत्र च श्रमणीनामसंखडानि गच्छे नैव जायन्ते ।
स गच्छः गच्छवरः गृहस्थभाषास्तु न यत्र ॥११७॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, **यत्र** = गच्छे **श्रमणीनामसंस्कृतादीनि** = परस्परं कलहादीनि **गच्छे नैव जायन्ते** = नैवोत्पद्यन्ते । **यत्र** = गच्छे **गृहस्थभाषा न** भाष्यते, **तं गच्छं** श्रेष्ठम् = **वरं** प्रधानं जानीहि ॥११७॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, **यत्र** = गच्छे **श्रमणीनां** मिथो**ऽसंस्कृतादि** परस्परं कलहादि **नैव जायते** = नोत्पद्यते, पापश्रेण्यादिहेतुत्वाच्च कलहो रात्रिर्न क्रियते । **तं गच्छं गच्छवरम्** = सर्वगच्छप्रधानं जानीहि । **यत्र च गृहस्थभाषाः** साध्वीभि**र्नो**च्यते इति गाथार्थः ॥११७॥

**जो जत्तो वा जाओ, नालोयइ दिवसपक्खियं वावि ।**
**सच्छंदा[१] समणीओ, मयहरियाए न ठायंति ॥११८॥**

यो यावान् वा जातः नालोचयति दैवसिकं पाक्षिकं वापि ।
स्वच्छन्दाः श्रमण्यः महत्तरिकाया न तिष्ठन्ति ॥११८॥

(प्र.अ.) – '**जो जा०**' इत्यादि, **यो यत्रा**तीचारो **जातो** भवति स अतीचारस्तत्र **नालोचयति** । अथवा **दैवसिक**मतीचारं, पक्षे भवम् = **पाक्षिकं** तन्नालोच्यते = गुरुसमक्षं न प्रकटीक्रियते । च पुनः यत्र **स्वेच्छाचारिण्यः श्रमण्यः महत्तरिकायाः** = वृद्धसाध्व्याः आज्ञायां **न तिष्ठन्ति** । स गच्छो न प्रधानः ॥११८॥

(द्वि.अ.) – '**जो जत्तो०**' इत्यादि, **यो यत्रातीचारः जातः** तत्र **नालोचयति** ।

---

१. 'दाउ व सवणे मय०' F-प्रते ।

अथवा **दैवसिक**मतीचारं **पाक्षिका**तीचारं **वा** नालोचयति । च पुनः यत्र **स्वेच्छाचारिण्यः श्रमण्यः महत्तरिकाया** आज्ञायां **न तिष्ठन्ति** । स गच्छो न प्रधानः ॥११८॥

**विंटलिआणि पउंजंति, गिलाण-सेहीण नेव[1] तप्पंति ।**
**अणगाढे आगाढं, करंति आगाढि अणगाढं ॥११९॥**

विंटलिकानि प्रयुञ्जन्ते, ग्लानशैक्ष्यान् नैव तर्पयन्ति ।
अनागाढे आगाढं कुर्वन्ति आगाढे अनागाढम् ॥११९॥

(प्र.अ.) – **'विंटलि०'** इत्यादि, **विंटलिकानि** = यंत्रमंत्राणि = कामनमोहनरूपादीनि यत्र = गच्छे आर्या कुर्वन्ति । अनागाढे आगाढं कुर्वन्ति, आगाढे चानागाढम् ॥११९॥

(द्वि.अ.) – **'विंट०'** इत्यादि, **विंटलानि** = कुटिलकार्मणादिहेतुयंत्रमंत्राणि **प्रयुञ्जन्ति । ग्लान**रोगिणीनां प्रव्रजितसाध्वीनां न चिंतां कुर्वन्ति । **अनागाढे** कार्ये **आगाढं** कार्यं **कुर्वन्ति । आगाढे अनागाढम् ।** तत्र येन कार्येण कृतेनांतरा साधुसाध्वीनां न सरति (कार्यम्) तदागाढम् । तद्विपरीतमनागाढम् ॥११९॥

**तथा –**

**अजयणाए पकुव्वंति, पाहुणगाण अवच्छला ।**
**चित्तलयाणि अ सेवंते, चित्ता रयहरणे तहा ॥१२०॥**

अयतनया प्रकुर्वन्ति प्राघूर्णिकानामवत्सला ।
चित्तलानि च सेवन्ते, चित्राणि रजोहरणानि तथा ॥१२०॥

(प्र.अ.) – **'अजय०'** इत्यादि, यत्र **प्राघूर्णिकानाम्** = ग्रामादागतसाध्वीनां भक्तिं न **कुर्वन्ति** तत्र ग्रामस्था आर्याः । च पुनः **चित्रलकानि** विचित्रवस्त्राणि वा । चित्रलकानि = सारपाशाः एकीबेकीप्रभृतयः तानि **सेवन्ते । तथा रजोहरणे** विचित्रविज्ञानं कुर्वन्ति ॥१२०॥

(द्वि.अ.) – **'अज०'** इत्यादि, यत्रा**यतनया** प्रवर्त्तन्ते । **प्राघुर्णिकानां** = साध्वीनाम् **अवत्सला** इति न भक्तिं कुर्वन्ति । तथा चित्रलकानि = चित्रविचित्राणि वस्त्राणि ।

---

१. 'नेय' E-F-G-H-प्रते, 'नेव तिप्पंति' D-प्रते ।

**चित्रलकानि** = क्रीडाहेतुसारिपाशकादीनि **सेवन्ते । तथा रजोहरणे** विचित्रविज्ञानानि भरतादीनि कुर्वन्ति ॥१२०॥

**गइ-विब्भमाइएहिं, आगारविगार तह [1]पगासंति ।**
**[2]जह [3]वुड्ढाण मोहो, समुईरइ किं तु तरुणाणं ? ॥१२१॥**

गतिविभ्रमादिभिः आकारविकारं तथा प्रकाशयन्ति ।
यथा वृद्धानां मोहः समुदीर्यते किं तु तरुणानाम् ? ॥१२१॥

(प्र.अ.) – **'गइवि०'** इत्यादि, आर्या **गतिविभ्रमादिकैराकारविकारं तथा प्रकाशयन्ति यथा वृद्धनरगणे मोहः समुदीर्यते,** पुनः **का** कथा **तरुणानाम्** ? ॥१२१॥

(द्वि.अ.) – **'गइ०'** इत्यादि, यत्राऽऽर्या **गतिविभ्रमैः** = गतिविलासादिकैः **आकृति-विकारं तथा प्रकाशयन्ति यथा वृद्ध**पुरुषगणेऽपि **मोहो** = मैथुनेच्छा **समुदीर्यते,** तर्हि **किं** पुनस्**तरुणानाम्** ? ॥१२१॥

**बहुसो उच्छोलिंती, मुह-नयणे हत्थ-पाय-कक्खाओ ।**
**[4]गिण्हेइ रागमंडल, सोइंदिअ तह य [5]कब्बट्टे ॥१२२॥**

बहुशो उच्छोलयन्ति मुखनयनानि हस्तपादकक्षाः ।
गृह्णन्ति रागमंडलं श्रवणेन्द्रियं तथैव कल्पस्थाः ॥१२२॥

(प्र.अ.) – **'बहु०'** इत्यादि, यार्या **मुखनयने हस्तपादकक्षा बहुशो** = वारंवारं **क्षालयन्ति ।** रागमंडलयन्त्रं गृह्णाति । अथवा रागमंडलं = रागसमूहं वा करोति । यथा 'कव्वट्टे'ति तरुणपुरुषाणां श्रोत्रेन्द्रियसंतोषं प्राप्नुवन्ति । सा साध्वी स्वेच्छाचारिणी प्रोच्यते। अत्रोत्तरार्द्धम् – 'गिण्हइ रायमंडणभोइति य तह कब्बट्टे' या साध्वी **कब्बट्टे** गृहबालकान् **गृह्णाति,** तेषां [6]**रमण**क्रीडकानि **मंडनं** = शरीरभूषणं च कुर्वन्ति, बालकान् भोजयन्ति ॥१२२॥

---

१. 'पगासिंति' A-D-E-F-G-H-प्रते । २. 'जह कमढगाण मोहो' F-प्रते, 'जह कब्ब(प्प)ट्ठगाण मोज्ञे' E-G-प्रते । ३. 'वुड्ढाणवि मोहो' D-H-प्रते । ४. 'गिन्हइ रामण मंडण भोइंति य तह' F-प्रते । ५. 'कप्पट्टे' G-प्रते, 'कब्बट्टे' H-आदिषु, 'कप्पस्स' F-प्रते । ६. 'मरण' इति A-प्रते ।

(द्वि.अ.) – याऽऽर्या **बहुशो** = वारंवारं **हस्तपादकक्षाः मुखनयने** च **उच्छालयति** = क्षालयति । **तथा रागमंडलं** यंत्रविशेषं रागसमूहं वा **गृह्णाति** = करोति । यथा 'कब्बट्टे'ति तरुणपुरुषाणां श्रोत्रेन्द्रियसंतोषं प्राप्नुवन्ति । सा स्वेच्छाचारिणी = ब्रह्मचर्यप्रतिकूला कथ्यते । अत्रोत्तरार्धं पाठांतरं वा यथा – 'गिण्हइ रामणमंडणभोइति य तहय कब्बट्टे'त्ति गृहस्थडिम्भान् गृह्णाति । तेषां च रामणकानि = क्रीडनकानि यच्छति । मंडनं = शरीरभूषणं करोति । भोजयति च स्वसुखभक्षिकादिकां तानिति ॥१२२॥

**जत्थ य थेरी तरुणी, थेरी तरुणी अ अंतरे सुयइ ।**
**गोअम ! तं गच्छवरं, वरनाण-चरित्तआहारं ॥१२३॥**

यत्र च स्थविरा तरुणी, स्थविरा तरुणी च अन्तरिताः ।
स्वपन्ति गौतम ! तं गच्छवरं वरज्ञानचारित्राधारम् ॥१२३॥

(प्र.अ.) – **'जत्थ य०'** इत्यादि, **यत्र स्थविरा तरुणी अन्तरिता स्वपन्ति**, हे **गौतम ! तं गच्छं वरज्ञानचारित्राधारं** जानीहि ॥१२३॥

(द्वि.अ.) – **'जत्थ०'** इत्यादि, **यत्र स्थविरा तरुणी च** पुनः **स्थविरा तरुणी** चेति कृत्वा **सान्तरा स्वपन्ति**, हे **गौतम ! तं वरज्ञानचारित्राधारं गच्छं** जानीहि ॥१२३॥

**[1]धोयंति कंठि[2]आओ पो[3]यंति तह य दिंति पोत्ताणि ।**
**गिहकज्जचिंतगीओ, न हु अज्जा गोअमा ! ताओ ॥१२४॥**

धावन्ति कण्ठिकाः प्रोतयन्ति तथा च ददति वस्त्राणि ।
गृहकार्यचिन्तिकाः न हु आर्या गौतम ! ताः ॥१२४॥

(प्र.अ.) – **'धोवंति०'** इत्यादि, **कंठिका धोवन्ति** तथा भरणानि **प्रोतयन्ति** । प्रोतवस्त्राणि **ददति, गृहकार्यचिन्तिकाः**, हे **गौतम ! सा आर्या न** भवति ॥१२४॥

(द्वि.अ.) – **'धोइ०'** इत्यादि, **कंठिकां धोवन्ति**, तथा भरणानि **प्रोतयन्ति,**

---

१. 'धोइंति' A-D-F-G-H-प्रते । २. '०आउ' D-आदिप्रते । ३. 'पोइंति' A-आदिप्रते ।

प्रोतयित्वा च वस्त्राणि गृहस्थेभ्यो **ददति, गृहकार्यचिन्तिका:, सा आर्या न** भवति ॥१२४॥

**[1]खरघोडाइट्ठाणे, वयंति ते वा वि तत्थ वच्चंति ।**
**वेसत्थीसंसग्गी, उवस्सयाओ समीवंमि ॥१२५॥**

खरघोटकादिस्थाने व्रजन्ति ते वापि तत्र व्रजन्ति ।
वेश्यास्त्रीसंसर्गि: उपाश्रय: समीपे ॥१२५॥

(प्र.अ.) – '**खरघो०**' इत्यादि, **खरघोटकान्** नटविटपुरुषादि**स्थानानि**, तत्र साध्व्यो **व्रजन्ति**, नटविटादयस्तत्रोपाश्रये **व्रजन्ति, उपाश्रये वेश्यासंसर्गो** यत्र भवति, सा आर्या न कथ्यते ॥१२५॥

(द्वि.अ.) – '**खर०**' इत्यादि, **खरघोडा** नटविटास्तेषां **स्थाने** साध्व्यो **व्रजन्ति, अथवा** ते च **तत्र** साध्वीवसतावागच्छन्ति, **उपाश्रये वेश्यासंसर्गो** जायते ॥१२५॥

**[2]छक्कायमुक्कजोगा, धम्मकहा विगह पेसण गिहीणं ।**
**गिहि[3]निस्सिज्जं [4]बाहिंति, संथवं तह करंतीओ ॥१२६॥**

स्वाध्यायमुक्तयोगा: धर्मकथाविकथाप्रेषणगृहिणाम् ।
गृहिनिषद्यां बाधन्ते संस्तवं तथा कुर्वन्त्य: ॥१२६॥

(प्र.अ.) – '**छक्का०**' इत्यादि, **षट्कायमुक्त**संयतव्यापारा: = षट्काययतनारहिता: गृहस्थानां **धर्मकथां** कथयन्ति । **विकथां** कुर्वन्ति । गृहस्थानां **प्रेषणं** कुर्वन्ति । कार्यादौ **गृहिनिषद्यां वाहयन्ति** = गृहस्थाना[5]मासनादिकं मुञ्चन्ति । **संस्तवं** परिचयं **कुर्वन्ति** । ता: साध्व्यो न भवन्ति, स गच्छ: आचारसंवेगरहित:, विषं हालाहलं चरेत् तर्ह्यपि एतत् गच्छसंसर्गं न कुर्यात् ॥१२६॥

(द्वि.अ.) – '**छक्का०**' इत्यादि, **षट्कायमु**क्तसंयमव्यापारास्तेषां यतनां न कुर्वन्तीत्यर्थ:, गृहस्थानां **धर्मकथां** कथयन्ति, **विकथां** कुर्वन्ति, कार्यादौ **गृहिनिषद्यां वाहयन्ति**, गृहस्थानामासनादि मुञ्चन्ति, **संस्तवं** परिचयं **कुर्वन्ति** । ता: साध्व्यो न भवन्ति ॥१२६॥

---

१. 'थलघो०' **E-F-G**-प्रते । २. 'छक्कायमुक्क०' **E-H**-प्रते । ३. '०निस्सेज्जं' **H**-प्रते । ४. 'वाहिंति' **D-E-F-G-H**-प्रते । ५. 'मासातनादिक' इति **A**-प्रति ।

**समा सीस-पडिच्छीणं, चोअणासु अणालसा ।**
**गणिणी गुणसंपन्ना, पसत्थप[1]रिसाणुगा ॥१२७॥**

समाः शिष्यप्रातीच्छिकानां चोदनासु अनालस्याः ।
गणिन्यो गुणसम्पन्नाः प्रशस्तपरिषदनुगताः ॥१२७॥

(प्र.अ.) – '**समा०**' इत्यादि, स्व**शिष्यणी**-**प्रतीच्छिकानां** पठनार्थमागतानां **समा** = तुल्या भवन्ति, तथा **चोयणा**दिके उद्यमवत्यः, **प्रशस्त**परिवारयुक्ताः, एवंविधा **गणिनी** मुख्यसाध्वी **गुणसंपन्ना** कथ्यते ॥१२७॥

(द्वि.अ.) – '**समा०**' इत्यादि, स्व**शिष्यणीप्रतीच्छिकानां** पठनार्थमागतानां तुल्यस्वभावाः, **चोदनादौ** उद्यच्छन्त्यः, **प्रशस्तपरिषदनुगताः**, एवंविधा **गणिन्यो** भवन्ति ॥१२७॥

**संविग्गा भीयपरिसा य, उग्गदंडा य कारणे ।**
**सज्झाय-झाणजुत्ता य, संगहे अ विसारया ॥१२८॥**

संविग्नाः भीतपर्षदश्च उग्रदण्डा च कारणे ।
स्वाध्यायध्यानयुक्ताः सङ्ग्रहे च विशारदाः ॥१२८॥

(प्र.अ.) – '**संविग्गा०**' इत्यादि, **संविग्नाः** = संवेगवन्त्यो भवन्ति, **भीतपरिषदः** भीताः = भयभ्रान्ताः पातकेभ्यो यस्याः परिषदः सुशिष्यिण्यः आज्ञामध्ये परिवारे = आज्ञायुक्तपरिवारे तिष्ठन्ति, न तु स्वेच्छाचारिण्यः । **कारणे** कार्ये **उग्रदण्डा** = महत्तमदण्डा, अकार्ये कृते महत्तरदण्डम् = बहुदण्डम् आक्रोशनां = वर्जनारूपं करोति इति या सा उग्रदण्डकारिणी, **च** पुनः **स्वाध्यायध्यानयुक्ताः**, एवंविधा **च** पुनः **संग्रहविशारदाः**, अत एव कुशलहेयोपादेयज्ञेयोत्सर्गरूपापवादज्ञेति गाथार्थः ॥१२४॥

(द्वि.अ.) – '**संवि०**' इत्यादि, **संविग्नाः**, **भीतपरिषदः** = स्ववशीकृतशिष्यिण्यः, **कारणे उग्रदण्डाः** = अकर्त्तव्यादौ बहुदण्डप्रदाः, **स्वाध्यायध्यानसंयुक्ताः**, **संग्रहे** = शिष्यिणीनामुपकरणादीनां संरक्षणे **विशारदाः** ॥१२८॥

---

१. '०पुरिसाणुगा' पूर्वमुद्रिते, अत्र E-H-आदिप्रतपाठः ।

**जत्थुत्तर-पडिउत्तर वडिआ [1]अज्जा उ साहुणा सद्धिं ।**
**पलवंति सुरुट्ठा वी, गोयम ! किं तेण गच्छेण ? ॥१२९॥**

यत्र उत्तरं प्रत्युत्तरं वृद्धा आर्याः साधुना सार्द्धम् ।
प्रलपन्ति सरोषा अपि गौतम ! किं तेन गच्छेन ? ॥१२९॥

(प्र.अ.) – '**जत्थुत्तर०**' इत्यादि, **यत्र** = गच्छे **आर्या** कार्ये समुत्पन्ने **साधुभिः सार्धम् उत्तरं** वा ददाति । 'वडिए'त्ति कोऽर्थः ? **वृद्धाऽपि** साध्वी **सुरुष्टाऽपि प्रलपति** = रोषवती क्रुद्धा सती प्रलपति = जल्पति । हे **गौतम ! तेन गच्छेन** = मुनिसमूहेन **किं** क्रियते ? न किञ्चिदित्यर्थः ॥१२९॥

(द्वि.अ.) – '**ज०**' इत्यादि, **यत्राऽऽर्या साधुना सार्द्धम् उत्तरं प्रत्युत्तरं** वा ददाति । **वृद्धामपि** साध्वीं **सुरुष्टा प्रलपति** = सन्मुखं जल्पति । हे **गौतम ! तेन गच्छेन किं** क्रियते ? ॥१२९॥

**जत्थ य गच्छे गोयम ! उप्पण्णे कारणंमि अज्जाओ ।**
**गणिणीपिट्ठिआओ, भासंती मउअसद्देण ॥१३०॥**

यत्र च गच्छे गौतम ! उत्पन्ने कारणे आर्या ।
गणिनीपृष्टिस्थिता भाषते मृदुकशब्देन ॥१३०॥

(प्र.अ.) – '**जत्थ य०**' इत्यादि, हे **गौतम ! यत्र गच्छे कारणोत्पन्नेऽप्यार्या** लघुसाध्वी **गणिनी** गुरुणी **पृष्टिस्था** = पृष्टौ स्थित्वा **मृदुशब्देन** = मृदुसुकुमालभाषया **भाषते** स गच्छः पुण्यगुणसमुदायरूपः ॥१३०॥

(द्वि.अ.) – '**जत्थ०**' इत्यादि, हे **गौतम ! यत्र गच्छे कारणोत्पन्नेऽप्यार्या** लघु-साध्वी **गणिनीपृष्टिस्था मृदुशब्देन भाषते** स गच्छः ॥१३०॥

**माऊए दुहियाए, सुण्हाए अहव [2]भइणिमाईणं ।**
**जत्थ न अज्जा अक्खइ, गुत्तिविभेयं तयं गच्छं ॥१३१॥**

---

१. 'अज्जाओ' H-प्रते । २. 'भयणि०' E-प्रते ।

मातुः दुहितुः स्नुषायाः अथवा भगिन्यादीनाम् ।
यत्र न आर्या आख्याति गुप्तिविभेदं स गच्छः ॥१३१॥

(प्र.अ.) – **'माऊए०'** इत्यादि, **यत्र** = गच्छे आर्या **मातुर्दुहितुः** स्नुषाया **भगिन्यादीनां गुप्तिभेदं** नामभेदं **नाख्याति** । हे गौतम ! **स** एव **गच्छो** गुणसमुदायरूपः ॥१३१॥

(द्वि.अ.) – **'माऊ०'** इत्यादि, **यत्र** = गच्छे आर्या निज**मातुः** पितुः **दुहितुः स्नुषाया भगिन्यादीनां** च **गुप्तिविभेदम्** = नामगोत्रादि **न** कथयति, **स गच्छः** ॥१३१॥

**[1]दंसणियारं कुणई, चरित्तनासं जणेइ मिच्छत्तं ।**
**दुण्हवि वग्गाणऽज्जा, विहारभेयं करेमाणी ॥१३२॥**

दर्शनातिचारं करोति चारित्रनाशं जनयति मिथ्यात्वम् ।
द्वयोरपि वर्गयोः आर्याः विहारभेदं कुर्वाणाः ॥१३२॥

(प्र.अ.) – **'दंसण०'** इत्यादि, यत्र = गच्छे **दर्शनातिचारं करोति, मिथ्यात्वं** करोति = **जनयति,** चारित्रनाशं जनयति, किम्भूता साध्वी ? **द्वयोः** = साधुसाध्वी**वर्गयोर्विहारभेदं कुर्वाणा** ॥१३२॥

(द्वि.अ.) – **'दंसण०'** इत्यादि, यत्राऽऽर्या **दर्शनातिचारं करोति, मिथ्यात्वं जनयति, चारित्रनाशं** जनयति, किम्भूता साध्वी ? द्वयोः = साधुसाध्वीवर्गयोः **विहारभेदम्** = मार्गविनाशं **कुर्वाणा** ॥१३२॥

**तम्मूलं संसारं, जणेइ अज्जावि गोयमा ! नूणं ।**
**तम्हा धम्मुवएसं, [2]मुत्तुं अन्नं न भासिज्जा ॥१३३॥**

तन्मूलं संसारं जनयति आर्याऽपि गौतम ! नूणं ।
तस्मात् धर्मोपदेशं मुक्त्वा अन्यत् न भाषते ॥१३३॥

(प्र.अ.) – **'तम्मूलं०'** इत्यादि, **आर्या धर्मोपदेशं मुक्त्वा** यत्र = गच्छे अन्यद् **न भाषते** । अन्यसावद्यवचनभाषणे हे **गौतम ! तन्मूलं संसारं जनयति** = तन्मूलं संसारसमुद्रं जनयति ॥१३३॥

---

१. 'दंसणइयार' H-प्रते । २. 'मोत्तुं' D-आदिप्रते ।

(द्वि.अ.) – '**तम्मू०**' इत्यादि, **आर्या धर्मोपदेशं मुक्त्वा अन्यद् न भाषते ।** अन्यसावद्यभाषणे हे **गौतम ! तन्मूलं संसारं जनयति** ॥१३३॥

**मासे मासे उ जा अज्जा, एगसित्थेण पारए ।**
**[1]कलहे गिहत्थभासाहिं, सव्वं तीए निरत्थयं ॥१३४॥**

मासे मासे तु या आर्या एकसिक्थेन पारयेत् ।
कलहे गृहस्थभाषाभिः, सर्वं तस्याः निरर्थकम् ॥१३४॥

(प्र.अ.) – '**मासे०**' इत्यादि, **या आर्या मासे मासे** मासक्षपणं कृत्वा **चैकसिक्थेन पारणकं** करोति, एवंविधाऽपि **गृहस्थभाषां** भाषते, **कलहं** करोति, **सर्वं तस्या निरर्थकम्** ॥१३४॥

(द्वि.अ.) – '**मासे०**' इत्यादि, **याऽऽर्या मासे मासे** मासक्षपणं कृत्वा **एकसिक्थेन पारयति,** साऽपि चेद् **गृहस्थाभाषाभिः** कलहायते, तदा **तस्याः सर्वं निरर्थकम्** ॥१३४॥

**अथ कस्मादिदमुद्धरितम् ? इति दर्शयति –**

**महानिसीह-कप्पाओ, ववहाराओ तहेव य ।**
**साहु-साहुणिअट्ठाए, गच्छायारं समुद्धियं ॥१३५॥**

महानिशीथकल्पात् व्यवहारात् तथैव च ।
साधुसाध्वीनामर्थाय गच्छाचारः समुद्धृतः ॥१३५॥

(प्र.अ.) – '**महानि०**' इत्यादि, **महानिशीथात्, कल्प-व्यवहारात् तथैव, साधु-साध्वीनां हितार्थाय गच्छाचार**प्रकीर्णक**मुद्धृतम्** = तान् विचारान् विलोक्य कृतम् ॥१३५॥

(द्वि.अ.) – '**महा०**' इत्यादि, **महानिशीथात्, कल्प-व्यवहारात् तथैव, साधुसाध्वीनां हितार्थाय गच्छा**चारप्रकीर्णकं **समुद्धृतम्** ॥१३५॥

**पढंतु साहुणो एयं, असज्झायं विवज्जिउं ।**
**उत्तमं सुयनिस्संदं, गच्छायारं सुउत्तमं ॥१३६॥**

---

१. 'कलहइ' D-आदिप्रते ।

पठन्तु साधवः एतं अस्वाध्यायिकं विवर्ज्य ।
उत्तमं श्रुतनिस्यन्दं गच्छाचारं सूत्तमम् ॥१३६॥

(प्र.अ.) – '**पढंतु०**' इत्यादि, **अस्वाध्यायं वर्जयित्वा** एतं **गच्छाचारं** पठन्तु साधवो = मुनयः । किम्भूतम् ? उत्तमसिद्धान्तरहस्यभूतम्, उत्तमोत्तमम् ॥१३६॥

(द्वि.अ.) – '**पढं०**' इत्यादि, **अस्वाध्यायं वर्जयित्वा एतं गच्छाचारं साधवः पठन्तु** । किम्भूतम् गच्छाचारम् ? उत्तमं सिद्धान्तरहस्यम्, उत्तमोत्तमम् ॥१३६॥

**किञ्च –**

**गच्छायारं सुणित्ताणं, पठित्ता भिक्खुभिक्खुणी ।**
**कुणंतु जं जहाभणियं इच्छंता हियमप्पणो ॥१३७॥**

गच्छाचारं श्रुत्वा पठित्वा भिक्षवः भिक्षुण्यः ।
कुर्वन्तु यद्यथा भणितमिच्छन्तः हितमात्मनः ॥१३७॥

**॥ इति गच्छाचारप्रकीर्णकसूत्रम् ॥**

(प्र.अ.) – '**गच्छायारं०**' इत्यादि, **गच्छाचारं श्रुत्वा पठित्वा** साधुसाध्व्यः **आत्महितं** वाञ्छमाना **यद्यथा भणितं** तत्तथा **कुर्वन्तु** मुनयश्चारित्रोद्यता इति गाथार्थः ॥१३७॥

(द्वि.अ.) – '**गच्छा०**' इत्यादि, एनं **गच्छाचारं श्रुत्वा पठित्वा** साधुसाध्व्य **आत्मनो हितार्थं** वाञ्छमाना **यद्यथा भणितं** सूत्रे तत्तथा **कुर्वन्तु** ॥१३७॥

**॥ इति समाप्तं सावचूर्णिकं श्रीगच्छाचारप्रकीर्णकम् ॥**

**॥ इति श्रीगच्छाचारस्यावचूरिः पण्डितश्रीहर्षकुलेन कृता ॥**



ઓજ અને તેજ
સત્ત્વ અને શુદ્ધિ પર સમવલંબિત છે
એ બંને તત્ત્વોનું પૂરક પરિબળ એટલે જ પ્રસ્તુત કૃતિ

NAVRANG
9428 500 401